
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्री

अथ श्रीमद्भागवत एकादश स्कंध

श्रीगणेशायनमः॥ श्रीदत्तात्रेयायनमः॥ ॐनमःपरमहंसास्वादितचरणकमलचिन्मकरंदायभक्तजनमानसनिवासायश्रीरामाय॥ विजयंतेपय
नंदकृष्णपादरजःस्रजः॥ याधृतामूर्ध्निजायंतेमहेंद्रादिमहःस्रजः॥१॥ उक्तैकत्रिंशताध्यायैर्मुक्तिरेकादशोदितः॥ जायंतेयेतिहासाद्यैःसमा
सव्यासरूपतः॥२॥ नारदोवसुदेवायसमासेनान्ववर्णयत्॥ भगवानुद्धवायाथविस्तरेणोपपत्तिभिः॥३॥ तत्रतुप्रथमोध्यायेयदुवंशस्यसं
क्षयः॥ उपक्षिप्तोविरागायमौशलस्यापदेशतः॥४॥ प्रवर्तितःपरानंदकृष्णक्रीडानुवर्णिता॥ तन्निवृत्तापरानंदपदारोहोनुवर्ण्यते॥५॥ ए
वंतावद्दशमस्कंधेभूभारावतारणायनिजविभूतिविभूषितयदुवंशस्ययदुवंशावतारितसकलसुरांशस्यभगवतःश्रीकृष्णस्यतदु
चितप्रवृत्तिविडंबनेनतच्छ्रवणस्मरणपराणांपरेषामानंदकारणंक्रीडानिरूपिता॥ अथेदानीमुपरमितयोगमायावैभवस्यभक्ता

॥बादरायणिरुवाच॥ कृत्वादैत्यवधंकृष्णःसरामोयदुभिर्वृतः॥ भुवोवतारयद्भारंजविष्ठंजनयन्कलिं॥१॥छ॥छ॥

प

नामात्मतत्त्वोपदेशपूर्वकंक्रीडार्थंभूतलेऽवतारितानांचाधिकारिणांसुरांशानांमौशलापदेशेनतत्तदधिकारिपदप्रापणपूर्वकंचब्रह्माद्यनु
ग्रहायनिजपदारोहोनिरूप्यते॥ तत्रकुरुक्षेत्रयात्रायामविरक्तस्यवसुदेवस्यकर्मणाकर्मनिर्हारोयथास्यात्तथाकुरुतामित्येवंकर्मयोगंए
षवतोनारदादिभिःकर्मयोगोनिरूपितः॥ कर्मणाकर्मनिर्हारएषसाधुनिरूपितः॥ यच्छ्रद्धयाप्तवित्तेनशुक्लेनेज्येतपूरुषमित्यादिनातेन
चविशुद्धसत्त्वस्यश्रीरामकृष्णौपरमेश्वरत्वेनज्ञातवतः॥ षड्गर्भानयनाध्यायेश्रीकृष्णेनात्मतत्त्वमुपदिष्टं॥ वचोवःसमवेतार्थंतातैत
दुपमन्महे॥ यःपुत्रानसमुद्दिश्यतत्त्वग्राममुदाहृतइत्यादिना॥ तस्यविषयभोगातिशयेनपुनस्तिरोहितमासीत्॥ तदेवेदानींनारदमु
खेननवमेपंचाध्याय्यानिरूप्यते॥ तत्रप्रथमाध्यायेवैराग्योत्पादनाययदुकुलस्यब्रह्मशापापदेशेनापन्नतविषयसुखानामप्य

नियताप्रतिपाद्यते॥ ततस्त्वृतुभिर्निमिजायंतेयसंवादेनसपरिकरंमरमतत्वनिरूपणं॥ ततःषष्ठेनभगवदुद्धवसंवादप्रस्तावः॥ ततस्त्रयोविंशाद्या
उद्धवंप्रतिभगवतस्तत्वनिरूपणं॥ ततोद्वाभ्यांमौशलक्रीडैवमेकत्रिंशाद्ध्यायैरेकादशस्कंधस्यप्रवृत्तिः॥ तस्यचयथामितिव्याख्यानमार
भ्यते॥ तत्रमौशलप्रसंगार्थंपूर्वस्कंधार्थमनुवदति श्लोकद्वयेन॥ कृत्वेतिस्त्ववतारस्यतत्स्ववतारयदिसउागमोद्रष्टव्यः॥ जविष्ठंवेगवत्तरं॥
अतिशीघ्रं॥ हिंसापर्यवसायिनमित्यर्थः॥ कलिंकलहं॥१॥ एतद्विवृणोति॥ येकोपिताइति॥ सपत्नैर्दुर्योधनादिभिःकोपिताःकोपंकारिताः
सुबहुयथाभवतितथा॥ बहुवारानित्यर्थः॥ तदेवाह॥ दुर्द्यूतहेलनकचग्रहणाभिरिति॥ दुर्द्यूतंकपटद्यूतं॥ हेलनमवज्ञा॥ कचग्रहणंद्रौ

येकोपिताःसुबहुपांडुसुताःसपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् कृत्वानिमित्तमितरेतरतःसमेतान्हत्वान
पालिरहरत्क्षितिभारमीशः॥२॥

स्नेनद्रौपद्याःकेशाकर्षणं॥ एतानित्यादिर्येषांगरदानजतुगृहदाहादीनांतैःकृत्वायेकोपिताःतानन्यांश्चवान्निमित्तंकृत्वाइतरेतरतःउभयोः
पक्षयोःसमेतान्मिलितान्नृपान्हत्वाक्षितिभारंनिरहरत्तज्जहार॥ यद्वायेकोपिताःयैश्चकोपिताःतानितरेतरतःपरस्परंनिमित्तंकृत्वे
इत्यन्वयः॥ येतावत्प्रकटद्वेषाःपतनादयःतान्स्वयमेवहतवान्॥ येतुद्वेषाःबांधवद्वेषभंग्यास्थिताःतान्परस्परंनिमित्तंविधायहत्वाभू
भारमपाकृतवानित्यर्थः॥ द्वेषांश्चासंभवयतान्नृपतीन्निहत्यकृष्णोबलेनयदुभिश्चवृतोबलिष्ठैः॥ पद्भ्यांभरंनिरहरज्जनयन्कुलेस्वे
प्रीत्यादवाग्निमिववंशवनेकलिंच॥२॥ अपिचभूभारमित्यादि॥ अन्यांश्चभूभारभूताःराजपतनाःराज्ञांपतनाःसेनाःराज्ञस्तेषां

पतनाश्चेतिवा॥स्वबाहुभिर्गुप्तैःपरिरक्षितैःयदुभिर्विवाहादिच्छलेननिरस्यहत्वा॥बाहुभिरिभिरितिबहुवचनंवस्कृतश्चतुर्भुजाभिप्रा
येण॥नन्वेवंकृष्णश्चिकीर्षतीतिज्ञात्वाकथंतस्मैयादवाःक्रुध्यंतितत्राह॥अप्रमेयःप्रमातुमशक्यः॥चिंतामाह॥नन्वितिवितर्के॥र
प्रवनेर्भूमेर्भारोयद्यपिलोकप्रतीत्यागतःतथाप्यहमगतमेवमन्ये॥यद्यस्माद्विषह्यसोढुमशक्यंयादवकुलमियनेनैवस्ववंशात्
स्वयंहननमनुचितमितिसूचितं॥३॥तर्हिइदमप्यन्यैर्घातसतांतत्राह॥नैवेति॥अन्यतःदेवादिभ्योयादवकुलस्यपरिभावस्तिरस्का

भूभाररराजपतनाययदुभिर्निरस्यगुप्तैःस्वबाहुभिरचिंतयदप्रमेयः॥मन्येऽवनेर्ननुगतोप्यगतंहिभारंयद्या
दवंकुलमहोह्यविषह्यमास्ते॥३॥नैवाऽन्यतःपरिभवोऽस्यभवेत्कथंचिन्मत्संश्रयस्यविभवोन्नहनस्यनित्यं
अंतःकलिंयदुकुलस्यविधायवेणुस्तंबस्यवन्हिमिवशांतिमुपैमिधाम॥४॥एवंव्यवसितोराजन्सत्यसंक
ल्पईश्वरः॥शापव्याजेनविप्राणांसंजह्रेस्वकुलंप्रभुः॥५॥श्रीरामचंद्रायनमः॥श्रीकृष्णायवास्तु॰ ७

रोनभवेत्॥कुतःमत्संश्रयस्यमांश्रयतइतिमत्संश्रयंकुलंतस्य॥किंच॥नित्यंविभवोन्नहनस्यविभवैर्गजतुरंगादिभिः
उच्छृंखलस्य॥यद्यातर्हिदंकिमितिसंहर्त्तव्यंतत्राह॥विभवोन्नहनस्येति॥तस्मादेवंकरिष्यामीत्याह॥अंतःकलिमिति॥शां
तिंशममुपैमि॥वर्त्तमानसामीप्येवर्त्तमानावत्॥उपैष्यामि॥तदनंतरंधामवैकुंठाख्यमुपैष्यामीत्यर्थः॥४॥व्यवसितः
कृतनिश्चयःसंजह्रेउपसंहृतवान्॥५॥श्रीरामचंद्रायनमः॥श्रीदत्तात्रयायनमः॥श्रीकृष्णायपरमात्मानेनमः॥७॥७

तदेवमवतारप्रयोजनं सर्वं संपाद्य स्वलोकं जगामेत्याह ॥ श्लोकद्वयेन स्वर्म्मर्त्यैति ॥ लोकानां लावण्यस्य निर्मुक्तिस्त्यागो यया ॥ याम् अपेक्ष्य लोकेषु लावण्यं नास्तीत्यर्थः ॥ यद्वा लोकेभ्यो लावण्यस्य विनिर्मुक्तिर्दानं यतः यत्संपर्केण लोका लावण्यवंतो भवंतीत्यर्थः ॥ तस्याः स्वर्म्मर्त्यानृणां लोचनमाधाय घन्यपाकृष्य ॥ ततोऽन्यस्यावलोकने लोचनस्याप्रवृत्तेः ॥ तथा स्वगीर्भिस्ताः गिरः स्मरतां चित्तं चाधिद्य ॥ तथा पदैः तत्र तत्रांकितैस्तानि पदानीक्षमाणानाम् अन्यतो गमनादिकाः क्रिया आछिद्य तदानीं तनानां सर्वेषां चक्षुरादिप्रवृत्तीः स्वैकनिष्ठाः कृत्वेत्यर्थः ॥ ६ ॥ किंच इतउपरि जनिष्यमाणानां संसारतरणाय कौ पृथिव्यां शोभना श्लोकाः कवीनां यस्यां तां स्वकीर्तिं वितत्य विस्तार्य अनया कीर्त्या अंजसा सुखेनैव तु

स्वर्म्मर्त्यलोकलावण्यनिर्मुक्त्या लोचनं नृणां ॥ गीर्भिस्ताः स्मरतां चित्तं पदैः स्तानीक्षतां क्रियाः ॥ ६ ॥ आछिद्य कीर्तिं सुश्लोकां

वितत्य ह्यंजसा नु कौ ॥ तमोऽनया तरिष्यंतीत्यगात्स्वं पदमीश्वरः ॥ ७ ॥ राजोवाच ॥ ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनां

विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसां ॥ ८ ॥ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम ॥ कथमेकात्मनां भेद एतत्स

र्वं वदस्व मे ॥ ९ ॥ ७

निश्चितं तमस्तरिष्यंतीत्यभिप्रेत्य ईश्वरः स्वं पदं स्थानमगादिति ॥ ७ ॥ अब्रह्मण्येभ्यः अदातृभ्यो वाऽसेवकेभ्यो वा विप्राः कुप्यंति वृष्णयस्तु न तथेत्याह ॥ ब्रह्मण्यानामिति त्र्यादिना ॥ किंच कोपे जातेपि कृष्णचेतसां कथमभूत् ॥ कथं प्रादुर्भूदित्यर्थः ॥ ८ ॥ अतः स्पष्टस्य निमित्तस्याभावान्निमित्तांतरं पृछति ॥ यन्निमित्त इति ॥ एकात्मनामेकचित्तानां कथं भेदः कलहः ॥ ९ ॥ ईश्वरेछैवात्र निमित्तमिति परिहरति विभ्रदिति ॥ सकलानां सुंदराणां वस्तूनां सन्निवेशो विन्यासविशेषो यस्मिन् ॥ तद्वपुर्बिभ्रत् ॥ तर्हि किमिति सौंदर्या

॥भा॰ए॰॥
॥२॥

द्विषयपरः न सुमंगलं कर्माचरन् ॥ तत्किं कयापि कामनया न आप्तकामः तर्हि किमिति कर्माचरति ॥ धामद्वारवत्याख्यंगृहमास्थायरममाणः
गृहेरममाणानांकर्मग्राहयितुमित्यर्थः ॥ ननुकिमाप्तकामस्यगृहेरमणेनाकर्मभिर्वातत्राह ॥ उदारकीर्तिः ॥ बहुफलप्रदाकीर्तिर्यस्यसः ॥ की
र्तिवितानार्थमित्यर्थः ॥ एवंपरमैश्वर्येणवर्तमानएवकुलंसंहर्तुमैछत ॥ तत्कस्यहेतोः ॥ स्थितकृत्यशेषः ॥ स्थितःकृत्यशेषोभूभारहरणे
शेषोयस्यसः ॥१०॥ ईश्वरेछयोच्छितंब्रह्मशापनिमित्तंवक्तुमाह ॥ कर्माणीति ॥ कर्मार्थमाहूताःकर्माणिकृत्वानिसृष्टामुनयःपिंडार

श्रीशुकउवाच ॥ बिभ्रद्वपुःसकलसुंदरसंनिवेशंकर्माचरन्भुविसुमंगलमाप्तकामः ॥ आस्थायधामरममाणउदा
रकीर्तिःसंहर्तुमैछतकुलंस्थितकृत्यशेषः ॥१०॥ कर्माणिपुण्यनिवहानिसुमंगलानिगायज्जगत्कलिमलापह
राणिकृत्वा ॥ कालात्मनानिवसतायदुदेवगेहेपिंडारकंसमगमन्मुनयोनिसृष्टाः ॥११॥ ५ ५ ५ ५

कंसमगमन्नित्यन्वयः ॥ निसृष्टाःप्रस्थापिताःपूर्वोक्तामुदारांकीर्तिंवितन्वन्कर्माणिविशिनष्टि ॥ पुण्यनिवहानीत्यादित्रिभिःप
दैः ॥ कानिचिदश्वमेधादीनिकर्माणिपुण्यमेवजनयंति ॥ पुत्रोपलालनादीनितुतत्कालसुखमेवकुर्वंति ॥ प्रायश्चित्तादीनि
पापमेवहरंति ॥ एतानितुसर्वतोमुखानीत्याह ॥ पुण्यनिवहानि ॥ कीर्तनादिनापुण्यानिवहंतिप्रापयंतीति ॥ तथासुमंगलानिस्व
तिसुखात्मकानिगायतोजगतःकलिमलापहराणिकृत्वा ॥ मुनिप्रस्थापनेहेतुः ॥ कालात्मनासंहाररूपेणयदुदेवगेहेनिव
सता ॥ स्वकुलंसंजिहीर्षतेत्यर्थः ॥ पिंडारकंततोनातिदूरेतीर्थविशेषणं ॥११॥ श्रीरामचंद्रायनमः ॥५॥५॥५॥५॥५॥५॥

॥राम॥
॥२॥

२२॥उपसंगृह्यपादग्रहणंकृत्वा॥२३॥२४॥प्रश्नप्रकारमाह॥द्वयेन॥तेवेषयित्वेति॥हेत्र्प्रमोघदर्शनाःविप्राः अंतर्वत्नीगर्भिणी॥वःयुष्मान्
साक्षात्प्रष्टुंविलज्जतीलज्जमानाअस्मन्मुखेनपृच्छति॥प्रसोष्यंतीआसन्नप्रसवाकिंस्वित्संजनयिष्यतिकन्यांवापुत्रंवातद्ब्रूत॥२५॥प्रल

विश्वामित्रोसितःकण्वोदुर्वासाभृगुरंगिराः॥ कश्यपोवामदेवोऽत्रिर्वसिष्ठोनारदादयः॥२२॥ क्रीडंतस्तानुपव्रज्य
कुमारायदुनंदनाः॥ उपसंगृह्यपप्रछुरविनीताविनीतवत्॥२३॥ तेवेषयित्वास्त्रीवेषैःसांबंजांबवतीसुतं॥ एषा
पृछतिवोविप्राअंतर्वत्न्यसितेक्षणा॥२४॥ प्रष्टुंविलज्जतीसाक्षात्प्रब्रूतामोघदर्शनाः॥ प्रसोष्यंतीपुत्रकामाकिं
स्वित्संजनयिष्यति॥२५॥ एवंप्रलब्धामुनयोतानूचुःकुपितान्नृप॥ जनयिष्यतिवोमंदामुशलंकुलनाशनं॥२६॥
तछ्रुत्वातेऽतिसंत्रस्ताविमुच्यसहसोदरं॥ सांबस्यददृशुस्तस्मिन्मुशलंकुलनाशनं खल्वयस्मयं॥२७॥ किंकृतं
मंदभाग्यैर्नःकिंवदिष्यंतिनोजनाः॥ इतिविव्हलितागेहानादायमुशलंययुः॥२८॥ तच्चोपनीयसदसिपरिम्लानमु
खश्रियः॥ राज्ञआवेदयांचक्रुःसर्वयादवसन्निधौ॥२९॥ श्रुत्वामोघंविप्रशापंदृष्ट्वाचमुशलंनृप॥ विस्मिताभ
यसंत्रस्ताबभूवुर्द्वारकौकसः॥३०॥ ७॥ ७॥

ब्धाः वंचिताः॥२६॥तस्मिन्नुदरे अयस्मयंलोहमयं॥२७॥मंदभाग्यैर्नोऽस्माभिःकिमेतत्कृतंनः अस्मान्किंवदिष्यंतीतिविव्ह
लिताःसंतोमुशलमादायगेहान्ययुः॥२८॥राज्ञेउग्रसेनायनतुश्रीकृष्णाय॥२९॥३०॥श्रीरामचंद्रायनमः॥श्रीदत्तात्रया॥

आहुकः उग्रसेनः सोपि श्रीकृष्णमपृष्ट्वैव प्रास्यत् प्रक्षिप्तवान् ॥ अस्य मुशलस्य चूर्णीक्रियमाणस्यावशेषितं लोहं प्रास्यत् ॥ २१ ॥ तरलैः तरंगैः
॥ २२ ॥ अन्यैर्मत्स्यैः सह ॥ शल्ये शराग्रे ॥ २३ ॥ ज्ञाताः सर्वे अर्थाः येन सः ॥ ईश्वरोपि समर्थोपि सन् अन्यथा कर्तुं नैच्छत् ॥ किंतु अन्वमोदत ॥ यतः का
लरूपी ॥ २४ ॥ इत्येकादशे प्रथमः ॥ १ ॥ द्वितीये निमिजायंतसंवादेन नारदः ॥ धर्मान्भागवतान्भक्त्या वसुदेवाय पृच्छते ॥ १ ॥ अभीक्ष्णं प्रस्थापि

तच्चूर्णं विद्या मुशलं यदुराजः स आहुकः ॥ समुद्रसलिले प्रास्यल्लोहं चास्यावशेषितं ॥ २१ ॥ कश्चिन्मत्स्योग्रसील्लोहं चू
र्णानि तरलैस्ततः ॥ उह्यमानानि वेलायां लग्नान्यासन्किलैरकाः ॥ २२ ॥ मत्स्यो गृहीतो मत्स्यघ्नैर्जालेनान्यैः सहार्णवे ॥ त
स्योदरगतं लोहं स शल्ये लुब्धकोऽकरोत् ॥ २३ ॥ भगवान् ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा ॥ कर्तुं नैच्छद्विप्रशापं कालरू
प्यन्वमोदत ॥ २४ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे अष्टादशसाहस्र्यां संहितायां वैयासिक्यां शुक
परीक्षितसंवादे यदुकुलविप्रशापो नाम प्रथमोध्यायः ॥ १ ॥ छ ॥ श्रीशुक उवाच ॥ गोविंदभुजगुप्तायां द्वारवत्यां कु
रूद्वह ॥ अवात्सीन्नारदोऽभीक्ष्णं कृष्णोपासनलालसः ॥ १ ॥ को नु राजन्निंद्रियवान्मुकुंदचरणांबुजं ॥ न भजेत्सर्वतो मृत्यु
रुपास्यममरोत्तमैः ॥ २ ॥ तमेकदा तु देवर्षिं वसुदेवो गृहागतं ॥ अर्चितं सुखमासीनमभिवाद्येदमब्रवीत् ॥ ३ ॥ छ छ छ

तोपि पुनः अवात्सीदित्यर्थः ॥ ननु नारदस्य दक्षादिशापान्नैकत्र वासः संभवतीत्याशंक्याह ॥ गोविंदभुजगुप्तायामिति ॥ न तस्यां शा
पादेः प्रभव इत्यर्थः ॥ कृष्णोपासने लालसा औत्सुक्यं यस्य सः ॥ १ ॥ यद्भजनं मुक्तानामपीच्छामौत्सुक्यं तत्को नाम न भजेदित्याह ॥
कोन्विति ॥ इंद्रियवानिति ॥ इंद्रियवत्त्वमात्रमेव यत्राधिकारिविशेषणमित्यर्थः ॥ सर्वतः सर्वेष्वपि लोकेषु मृत्युर्यस्य सः ॥ २ ॥ ३ ॥ छ छ छ

यथापित्रोर्यात्राआगमनंअपत्यानांस्वस्तयेमंगलाय॥यथाचउत्तमश्लोकस्यवर्त्मभक्तानांमहतांयात्राकृपणानांस्वस्तये॥तथाभगवद्भक्तस्यभगवत्तो
यात्रासर्वदेहिनांस्वस्तयेइति॥४॥देवैरपिमहतामुपमानमनुचितमित्याह॥भक्तानामिति॥देवानांचरितमतिवृष्ट्यादिभिर्भूतानांदुःखायापिभवति॥
साधूनांतुयासहजानांअच्युतआत्मायेषांतेषां॥५॥किंच॥सुखंकुर्वंतोपिदेवाःभजनानुसारेणकुर्वंति॥नतथासाधवइत्याह॥भजंतीति॥छायेव

श्रीवसुदेवउवाच॥भगवन्भवतोयात्रास्वस्तयेसर्वदेहिनां॥अचिंत्य कृपणानांयथापित्रोरुत्तमश्लोकवर्त्मनां॥४॥भूतानां
देवचरितंदुःखायचसुखायच॥सुखायैवहिसाधूनांत्वादृशामच्युतात्मनां॥५॥भजंतियेयथादेवान्देवाअपितथैवतान्॥
छायेवकर्मसचिवाःसाधवोदीनवत्सलाः॥६॥ब्रह्मंस्तथापिपृच्छामोधर्मान्भागवतांस्तव॥यान्श्रुत्वाश्रद्धयामर्त्योमु
च्यतेसर्वतोभयात्॥७॥अहंकिलपुरानंतंप्रजार्थोभुविमुक्तिदं॥अपूजयंनमोक्षायमोहितोदेवमायया॥८॥यथा
विचित्रव्यसनाद्भवद्भिर्विश्वतोभयात्॥मुच्येमह्यंजसैवाद्धातथानःशाधिसुव्रत॥९॥श्रीशुकउवाच॥राजन्नेवंकृ
तप्रश्नोवसुदेवेनधीमता॥प्रीतस्तमाहदेवर्षिर्हरेःसंस्मारितोगुणैः॥१०॥५

यथापुरुषोयावत्करोतितावदेवतस्यछायापि॥तथाकर्मसचिवाःर्मैकेसहायाः॥६॥तदेवंयद्यपिभवतआगमनमात्रेणैववयंकृतार्थास्तथापिपृ
च्छामः॥तवेति॥तवयैर्धर्मैःप्रसन्नोभगवान्तानित्यर्थः॥७॥ननुत्वत्तोपिकिमन्योभगवत्प्रसादपात्रमस्तीत्याह॥अहंकिलेति॥प्रजार्थोऽपूजयं
पुत्रलाभप्रयोजनःसन्पूजितवान्॥किलेति॥सूतीगृहेभगवद्वाक्यमनुस्मरति॥८॥अतोयथामुच्येमहितथानोऽस्मान्शाधिशिक्षय॥विचि
त्राणिव्यसनानियस्मिन्तस्मात्संसारात्॥तथापिविश्वतःसर्वतोभयंयस्मिन्तस्मात्॥भवद्भिर्हेतुभूतैःअंजसाअनायासेनअद्धासाक्षात्॥९॥
॥हरेर्गुणैर्वर्णनीयत्वेनप्रस्तुतैर्हरिंसंस्मारितःइत्यर्थः॥१०॥७॥

प्रीतिमाविष्करोति॥ सम्यगिति त्रिभिः॥ पप्रच्छसे पप्रच्छ हि॥ विश्वभावनान् सर्वबोधकान्॥२१॥ उद्धवः आस्तिक्येन गृहीतः॥ अनुमोदितः परैः क्रि-
यमाणः संस्कृतः॥ सद्धर्मो भागवतो धर्मः॥ देवद्रुहे वसुदेवे स्पर्धः॥ यद्वा देवेभ्यो विसृष्टैश्च चक्षुर्हंति येतानपि॥२२॥ किंच त्वया महानुपकारः कृ-
तः इत्याह॥ त्वयेति॥ पुण्ये श्रवणकीर्त्तने यस्य सः॥२३॥ अत्रापि भगवद्धर्मनिर्णयेपि विदेहस्य जनकस्य॥२४॥ आर्षभाणामुत्पत्तिं सान्वयां

नारद उवाच॥ सम्यगेतद्व्यवसितं भवता सात्वतर्षभ॥ यत्पृच्छसे भागवतान् धर्मांस्त्वं विश्वभावनान्॥२१॥ श्रुतोनु
पठितो ध्यात आदृतो वानुमोदितः॥ सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोपि हि॥२२॥ त्वया परमकल्याणः पुण्यश्रवण
कीर्त्तनः॥ स्मारितो भगवानद्य देवो नारायणो मम॥२३॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ आर्षभाणां च सं
वादं विदेहस्य महात्मनः॥२४॥ प्रियव्रतो नाम सुतो मनोः स्वायंभुवस्य यः॥ तस्याग्नीध्रस्ततो नाभिरृषभस्तत्सु
तः स्मृतः॥२५॥ तमाहुर्वासुदेवांशं मोक्षधर्मविवक्षया॥ अवतीर्णं सुतशतं तस्यासीद्ब्रह्मपारगं॥२६॥ तेषां तु
भरतो ज्येष्ठो नारायणपरायणः॥ विख्यातं वर्षमेतद्यन्नाम्ना भारतमुत्तद्भुतं॥२७॥

विविच्य कथयति सप्तभिः॥ प्रियव्रत इति स्पष्टं॥२५॥ मोक्षधर्मविवक्षया मोक्षधर्माणां प्रवर्त्तनेच्छया अवतीर्णं वासुदेवांशं आहुः॥ तस्य
च वेदपारगं सुतशतमासीत्॥२६॥ तेषां ऋषभसुतानां मध्ये नवयोगेश्वराणां चरितं वक्ष्यन् इतरेषां चरितं ततो विविच्याह॥ तेषामि
ति॥ एतत् अजनाभं नाम वर्षं यस्य नाम्ना भारतमित्यद्भुतं विख्यातमासीत्॥ एतेन तस्य कर्मातिरेको निरूपितः॥२७॥

इमां पृथ्वीं गृहान्निर्गतः हरिमुपासीनः सेवमानः सन्॥१८॥ नव सुताः नवद्वीपपतयः नवानां ब्रह्मावर्तादिखंडानां पतयः अस्य भारतवर्षस्य॥ एकाशी
ति सुताः कर्ममार्गप्रवर्त्तकाः ब्राह्मणाः अभवन्॥१९॥ अर्थशंसिनः परमार्थनिरूपकाः॥ श्रमणाः श्रमवंतः आत्माभ्यासे कृतश्रमा इत्यर्थः॥ वातरशना
दिगंबराः आत्मविद्यायां विशारदाः निष्णाताः निपुणाः पारं गता इत्यर्थः॥२०॥२१॥ तेषां परमहंसस्य चरितमाह॥ द्वाभ्यां॥ त एत इति॥ भगवद्रूपं वि

स भुक्तभोगां त्यक्त्वेमां निर्गतस्तपसा महरिं॥ उपासीनस्तत्पदवीं लेभे वै जन्मभिस्त्रिभिः॥१८॥ तेषां नव नवद्वीपपतयोऽस्य समं
ततः॥ कर्मतंत्रप्रणेतारः एकाशीतिर्द्विजातयः॥१९॥ नवाऽभवन्महाभागा मुनयो ह्यर्थशंसिनः॥ श्रमणा वातरशना आ
त्मविद्याविशारदाः॥२०॥ कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः॥ आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः॥२१॥ त एते भ
गवद्रूपं विश्वं सदसदात्मकं॥ आत्मनोऽव्यतिरेकेण पश्यंतो व्यचरन्महीं॥२२॥ अव्याहतेष्टगतयः सुरसिद्धसाध्यगंधर्वय
क्षनरकिन्नरनागलोकान्॥ मुक्ताश्चरंति मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि कामं॥२३॥ त एकदा नि
मेः सत्रमुपजग्मुर्यदृच्छया॥ वितायमानमृषिभिरजनाभे महात्मनः॥२४॥ तान् दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृप॥ य
जमानोऽग्नयो विप्राः सर्व एवोपतस्थिरे॥२५॥छ

श्वं पश्यंतः सदसदात्मकं स्थूलसूक्ष्मरूपं॥ तच्च आत्मनः स्वस्य अव्यतिरेकेण पश्यंतः॥२२॥ अव्याहता अप्रतिहता इष्टा अभिप्रेता गति
र्येषां ते। मुक्ताः अनासक्ताः॥२३॥ महात्मनो निमेः वितायमानमनुष्ठीयमानं अजनाभे भारतवर्षे॥२४॥ यजमानो निमिः अग्नयः आ
हवनीयादयः विप्राः ऋत्विगादयः॥२५॥ श्रीरामचंद्रायनमः॥ श्रीदत्तात्रयायनमः॥ श्रीदिगंबरायनमः॥ श्रीरामचंद्रायनमः॥छ

अभिप्रेत्य ज्ञात्वा॥२६॥ स्वरूपैश्चैव रोचमानान् तत्त्वाभरणादिप्रकारैः ब्रह्मपुत्रोपमान् सनत्कुमारादिसदृशान्॥२७॥ परमप्रीतः सन् तद्दर्शनमभिनंदति द्वा-
भ्यां। मन्य इति॥ ननु भगवतः पार्षदानां कथं मनुष्योपलब्धिस्तत्राह। विष्णोरिति॥ विष्णुभक्ताः लोकपावनार्थं सर्वत्र पर्यटंतीत्यर्थः॥२८॥ मया दुर्लभं
लब्धं अहो भाग्यमित्याह। दुर्लभ इति॥ बहवो देहा भवंति येषां ते देहिनो जीवास्तेषां क्षणभंगुरोपि मानुषो देहो दुर्लभः परमपुरुषार्थसाधनत्वात्॥

विदेहस्तानभिप्रेत्य नारायणपरायणान्॥ प्रीतः संपूजयांचक्र आसनस्थान् यथार्हतः॥२६॥ तान् रोचमानान् स्वरूपेण ब्रह्म
पुत्रोपमान् नव॥ पप्रच्छ परमप्रीतः प्रश्रयावनतो नृपः॥२७॥ विदेह उवाच॥ मन्ये भगवतः साक्षात् पार्षदान् वो मधुद्विषः॥ वि
ष्णोर्भूतानि लोकानां पावनाय चरंति हि॥२८॥ दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः॥ तत्रापि दुर्लभं मन्ये वैकुंठप्रियद
र्शनं॥२९॥ अत आत्यंतिकं क्षेमं पृच्छामो भवतोऽनघाः॥ संसारेऽस्मिन् क्षणार्धोपि सत्संगः सेवधिर्नृणां॥३०॥ धर्मान् भा
गवतान् ब्रूत यदि नः श्रुतये क्षमं॥ यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः॥३१॥ नारद उवाच॥ एवं ते निमि
नापृष्टा वसुदेव महत्तमाः॥ प्रतिपूज्याब्रुवन् प्रीत्या ससदस्यर्त्विजं नृपं॥३२॥ ७ ७ ७ ७ ७ ७ ७ ७ ७

वैकुंठः प्रियो येषां॥ वैकुंठस्य वा प्रिया स्तेषां दर्शनं॥२९॥ हे अनघा निरवद्याः भवतः युष्मान् आत्यंतिकं क्षेमं पृच्छामः यतः क्षणार्धकाललवोपि
सत्संगः सेवधिः निधिलाभे यथानंदो भवति तथाऽपरमानंद इत्यर्थः॥३०॥ तदर्थं च भागवतान् धर्मान् ब्रूत॥ यदि नोऽस्माकं श्रुतये श्रवणाय क्ष
मं योग्यं भवति कथंभूतान्॥ यैर्धर्मैः प्रपन्नाय भक्ताय अजो हरिः आत्मानमपि दास्यति तान्॥३१॥ ससदस्यैः ऋत्विग्भिश्च वर्तमानं तं निमिं भगवद्धर्म
श्रवणपरा बभूवुरित्यर्थः॥३२॥ ७॥

भगवद्धर्मतद्भक्तमायातत्तरणानिच ॥ ब्रह्मकर्मावतारेहा ॥ भक्तप्राप्ययुगक्रमान् ॥ ज्ञानुक्रमेणकृतवान्नवप्रश्नान्निमिर्नव ॥ एकैकस्योत्तरंप्रोचुःकविमु
ख्यामुनीश्वराः ॥ प्रथमप्रश्नोत्तरमाहैतिकंवक्ष्येमंकथयति ॥ मन्यनकुतश्चिद्भयंयस्मात्तदकुतश्चिद्भयं ॥ अत्रसंसारे ॥ असदात्मभावात् ॥ असतिदेहा
दावात्मभावान्नातःनित्यंसर्वदाउद्विग्नबुद्धेः ॥ विश्वात्मनासर्वथानिःशेषं ॥ यत्पादांबुजोपासनेभीर्निवर्ततेतान् ॥ ३३ ॥ भागवतधर्मलक्षणमा
ह ॥ येवाइति ॥ मन्वादिमुखेनवर्णाश्रमादिधर्मानुक्त्वाऽतिरहस्यत्वात्स्वमुखेनैवभगवताविदुषामपिपुंसांअंजःसुखेनैवात्मलब्धयेयेवै
उपायाःप्रोक्ताःतान्भागवतान्धर्मान्विद्धि ॥ ३४ ॥ अंजःपदेनोक्तंसुकरत्वंविवृणोति ॥ यानिति ॥ यानास्थायाश्रित्ययोगादिष्विवनप्र

कविरुवाच ॥ मन्येऽकुतश्चिद्भयमच्युतस्यपादांबुजोपासनमत्रनित्यं ॥ उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मनायत्रनिवर्ततेभीः ॥ ३३ ॥ येवैभगवताप्रोक्ताउपायाह्यात्मलब्धये ॥ अंजःपुंसामविदुषांविद्धिभागवतान्हितान् ॥ ३४ ॥ यानास्थायनरोराजन्नप्रमाद्येतकर्हिचित् ॥ धावन्निमील्यवानेत्रेनस्खलेन्नपतेदिह ॥ ३५ ॥ ७ ॥ ७

माद्येतविघ्नैर्नहन्येत ॥ किंचनिमील्यनेत्रेधावन्नपिइहयेषुभागवतधर्मेषुनस्खलेत् ॥ निमीलनंत्वत्राज्ञानं ॥ यथाहुः ॥ श्रुतिस्मृ
तीउभेनेत्रेविप्राणांपरिकीर्त्तिते ॥ एकेनविकलःकाणोद्वाभ्यामंधःप्रकीर्तितः ॥ अज्ञात्वापीत्यर्थः ॥ यथापादन्यासस्थानमतिक्रम्य
शीघ्रंपरतःपादन्यासेनगतिर्धावनं ॥ तद्वदत्रापिकिंचित्किंचिदतिक्रम्यातिशयप्रमत्तनुष्ठानं ॥ तथाऽनुतिष्ठन्नपिनस्खलेत्नप्रत्य
वायीस्यात् ॥ तथानपतेत्फलान्नभ्रश्येत् ॥ ब्राह्मणादीनामुक्तान्धर्मान्कांश्चिदकुर्वाणोभागवतान्धर्मान्श्रवणादीनकुर्वा
णस्तत्फलंप्राप्नुयादितिभावः ॥ ३५ ॥ श्रीदत्तात्रयायनमः ॥ श्रीरामचंद्रायनमः ॥ श्रीदिगंबरायनमः ॥ श्रीरामचंद्रायनमः ॥ ७ ॥ ७

॥भा॰ए॰॥
॥८७॥

ननुकेतेभगवद्धर्माःईश्वरार्पितसर्वकर्माण्यपीत्याह॥कायेनेति॥आत्मनाचित्तेनाऽहंकारेणवा॥अनुसृतोयःस्वभावस्तस्मात्॥अयमर्थः॥नकेवलं
विधितःकृतमेवेतिनियमःस्वभावानुसारिलौकिकमपीति॥तथाचभगवद्गीतासु॥यत्करोषियदश्नासियज्जुहोषिददासियत्॥यत्तपस्यसिकौं
तेयतत्कुरुष्वमदर्पणमिति॥यद्वाननुकायादीनामेकर्मनात्मनइत्याशंक्याह॥अध्यासेनअनुसृतात्ब्राह्मणादिस्वभावाद्यत्करोतीत्यर्थः॥त
त्सकलंपरस्मैपरमेश्वरायनारायणायेतिसमर्पयेत्॥तथासतिसकलमपिकर्मभगवतोधर्मोभवतीतिभावः॥३६॥ननुकिमेवंपरमेश्व
रभजनेन॥अशोकल्पितभयस्यज्ञानैकनिवर्त्यत्वादित्याशंक्याह॥भयमिमिति॥यतोभयंतन्मायया भवेत्अतोबुधोबुद्धिमान्तमेवाभजे

कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावाऽनुसृतःस्वभावात्॥करोतियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयेत्तत्॥३६॥
भयंद्वितीयाभिनिवेशतःस्यादीशादपेतस्यविपर्ययोऽस्मृतिः॥तन्माययाऽतोबुधआभजेत्तंभक्त्यैकयेशंगुरुदेवतात्मा॥३७॥

त॥ननुभयंदेहाद्यभिनिवेशतोभवति॥सचदेहाहंकारःतःसचस्वरूपास्मरणात्॥किमत्रतस्यमायाकरोतिअतआह॥ईशादपेतस्ये
ति॥ईशाविमुखस्यतन्माययाऽस्मृतिः॥भगवतःस्वरूपाऽस्फूर्तिःततोविपर्ययोदेहोस्मीति॥ततोद्वितीयाभिनिवेशात्भयंभवति॥
एवंहिप्रसिद्धंलौकिकीष्वपिमायासु॥उक्तंचभगवता॥दैवीह्येषागुणमयीममभायादुरत्यया॥मामेवयेप्रपद्यंतेमायामेतांतरंति
तेइति॥अतःकारणात्एकयाअव्यभिचारिण्याभक्त्याभजेत्किंचगुरुदेवतात्मागुरुरेवइष्टदेवताईश्वरःआत्माप्रेष्ठश्चयस्यतथादृष्टिः
सन्नित्यर्थः॥३७॥श्रीरामचंद्रकृष्णागोविंदायनमः॥श्रीकृष्णायपरमात्मनेनमः॥श्रीदत्तात्रयायनमः॥श्रीकृष्णायपरमात्मनेनमः

॥राम॰॥
॥८७॥

ननु विषयविक्षिप्तचित्तस्य कुतोऽव्यभिचारिणी भक्तिः संभवति कुतस्तरामभयं ॥ तत्र न तावद्विषयो नाम वास्तवोऽस्ति किंतु मनोविलासमात्रं ॥ अतो
मनोनियमनेन भजनादभयं स्यादित्याह ॥ अविद्यमानोपीति ॥ द्वयः द्वैतप्रपंचः ध्यातुः पुंसः धिया मनसा ॥ स्वप्नमनोरथश्च यथेत्यर्थः ॥ तत्त स्मात्क
र्माणि संकल्पयति च यत्तन्मनः बुधस्तन्निरुंध्यान्नियच्छेत् ॥ ततश्चैकया मनस्याभजतादभयं स्यादित्यर्थः ॥ ३८ ॥ एतदसंतात्र्यक्यमित्यात्रांक्य सुगम
मार्गमाह ॥ शृण्वन्निति ॥ तदर्थकानि तानि जन्मानि कर्माणि च अर्थयिषांतानि ॥ ननु तान्यपि साकल्येन ज्ञातुमशक्यानीत्याशंक्याह ॥ यानि लोके प्रसि
द्धानि गीतानि तानि शृण्वन्गायंश्च विचरेत् ॥ असंगो निस्पृहः ॥ ३९ ॥ एवं भजतः संप्राप्तप्रेमलक्षणभक्तियोगस्य संसारधर्मातीतां गतिमाह ॥

अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा ॥ तत्कर्मसंकल्पविकल्पकं मनो बुधो निरुंध्यादभयं ततः स्यात् ॥ ३८ ॥
शृण्वन्सुभद्राणि रथांगपाणेर्जन्मानि कर्माणि च यानि लोके ॥ गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंगः ॥ ३९ ॥ एवं
व्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ॥ हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥ ४० ॥ खं
वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन् ॥ सरित्समुद्रांश्च हरेः शरीरं यत्किंचिद्भूतं प्रणमेदनन्यः ॥ ४१ ॥ ४१

एवमिति ॥ एवं व्रतं वृत्तं यस्य सः स्वप्रियस्य हरेर्नामकीर्त्या जातोऽनुरागो यस्य सः अत एव द्रुतचित्तः श्लथहृदयः ॥ कदाचिद्भक्तपराजितं भ
गवंतं माकलय्य उच्चैर्हसति ॥ एतावंतं कालमुपेक्षितोऽस्मि इति रोदिति ॥ अयोत्सुक्याद्रौति आक्रोशति ॥ हे हरे मामनुगृहाणेति ॥ अ
ति हर्षेण गायति ॥ जितं जितमिति नृत्यति ॥ किं दांभिकवत्परान्प्रतारयितुं न ॥ उन्मादवत् ग्रहगृहीतवत् ॥ लोकबाह्यः निरत्रपः ॥ ४० ॥
किंच खमिति ॥ सत्त्वानि भूतानि ॥ आकाशादि यत्किंचि[illegible]तमात्रं हरेः शरीरमिति मत्वा प्रणमेत् ॥ संभावनायां लिङ् ॥ ४१ ॥ नन्वियाम
रूढयोगानामपि बहुजन्मदुर्लभा गतिः कथं नामकी[illegible]नमात्रेणैकस्मिन्नेव जन्मनि भवेदित्याशंक्य सदृष्टांतमाह ॥ भक्तिरिति ॥ प्र

भा॰ ए॰
९

पद्यमानस्यहरिंभजतःपुंसः॥अतःभक्तिःप्रेमलक्षणा॥परेशानुभवःप्रेमास्पदभगवद्रूपस्यस्फूर्तिः॥तयानिवृत्तस्य॥ततोऽन्यत्रगृहादिषुविरक्तिरि
त्येषत्रिकःएककालःभजनसमकालएवस्यात्॥यथाअश्नतोभुंजानस्यतुष्टिःसुखं॥पुष्टिरुदरभरणं॥क्षुन्निवृत्तिश्चप्रतिग्रासंस्युः॥उपलक्षणमेत
त्॥प्रतिसिक्थंयथास्युस्तद्वत्॥एवमेकैकस्मिन्भजनेकिंचित्किंचित्प्रेमादित्रिकेजायमानेऽनुवृत्त्याभजतःपरमप्रेमादिजायते॥बहुग्रासभोजिन
इवपरमतुष्ट्यादि॥४२॥ततश्चभगवत्प्रसादेनकृतार्थोभवतीत्याह॥इत्यच्युतांघ्रिमिति॥४३॥भागवतस्यभवंतीत्युक्तेतस्यलक्षणंपृच्छति॥अ
थेति॥यद्धर्मःयस्मिन्धर्मेपरिनिष्ठितः॥यादृशःयत्स्वभावः॥यथाचरतिवर्त्तते॥यत्ब्रूते॥वायैश्चलिंगैर्भगवतःप्रियोभवति॥तंब्रूतइत्यर्थः

भक्तिःपरेशानुभवोविरक्तिरन्यत्रचैषत्रिककएककालः॥प्रपद्यमानस्ययथाश्नतःस्युस्तुष्टिःपुष्टिःक्षुदपायोनुघासं॥४२
इत्यच्युतांघ्रिंभजतोनुवृत्त्याभक्तिर्विरक्तिर्भगवत्प्रबोधः॥भवंतिवैभागवतस्यराजन्ततःपरांशांतिमुपैतिसाक्षात्॥
॥४३॥राजोवाच॥अथभागवतंब्रूतयद्धर्मोयादृशोनृणां॥यथाचरतियद्ब्रूतेयैर्लिंगैर्भगवत्प्रियः॥४४॥हरिरु
वाच॥सर्वभूतेषुयःपश्येद्भगवद्भावमात्मनः॥भूतानिभगवत्यात्मन्येषभागवतोत्तमः॥४५॥ ७ ७ ७ ७

घु

४४॥यद्धर्मइत्यस्योत्तरमाह॥त्रयेण॥सर्वभूतेष्विति॥आत्मनःस्वस्यसर्वेभूतेषुब्रह्मभावेनसमन्वयंयःपश्येत्॥तथाब्रह्मरूपेआत्म
निअधिष्ठानेभूतानिचयःपश्येत्॥यद्वाअनंतस्याद्यभावात्तत्वादात्माहिरंतोहरिरितितंत्रोक्तेः॥आत्मनोहरेःसर्वभूतेषुमशकादिष्वपि
नियंतृत्वेनवर्त्तमानस्यभगवद्भावंनिरतिशयैश्वर्यमेवयःपश्येत्॥नतुतस्यतारतम्यंतथात्मनिहरावेवभूतानिचपश्येत्॥कथं
भूतेभगवति॥अप्रच्युतैश्वर्यादिरूपेनपुनर्जडमलिनभूताश्रयत्वेनजाड्यादिप्रसक्त्याऐश्वर्यादिप्रच्युतिंपश्येत्॥सर्वत्रपरि
पूर्णंभगवत्तत्वंपश्यन्भागवतोत्तमइत्यर्थः॥४५॥श्रीदत्तात्रयायनमः॥श्रीरामचंद्रायनमः॥श्रीदिगंबरायनमः॥७॥७ ७ ७

राम॰
९

प्रेमचमैत्रीचकृपाचउपेक्षाचताःईश्वरादिषुचतुर्षुयःकरोतिसमध्यमोभागवतः॥एवंभूतस्यभेदस्यदर्शनात्॥४६॥आर्चायांप्रतिमाया
मेवहरिबुध्यापूजामीहतेकरोति॥नतद्भक्तेषुअन्येषुब्राह्मणादिषुचसुतरांनकरोतिसप्राकृतःप्रकृतप्रारंभः अबुधुनैवप्रारब्धभक्तिः
शनैःशनैःउत्तमोभविष्यतीत्यर्थः॥४७॥पुनरपित्रिभिःश्लोकैरभ्यर्हितत्वादुत्तमभागवतस्यैवलक्षणानित्याह॥गृहीत्वापीति॥श्रीवासु
देवाविष्टचित्तोनगृण्हाति॥तावदिंद्रियैरर्थान्गृहीपीयपित्राद्यर्थः॥इदंविश्वं॥४८॥किंच॥देहादीनांसंसारधर्मैर्जन्माप्ययादिभिर्यो
हरेःस्मृत्याविमुह्यमानःसभागवतप्रधानः॥तत्रदेहस्यधर्मौजन्माप्ययौ॥प्राणस्यक्षुत्पिपासे॥मनसोभयं॥बुद्धेस्तृष्णा॥इंद्रिया
ईश्वरेतदधीनेषुबालिशेषुद्विषत्सुच॥प्रेममैत्रीकृपोपेक्षायःकरोतिसमध्यमः॥४६॥अर्चायामेवहरयेपूजांयःश्रद्धयेहते
नतद्भक्तेषुचान्येषुसभक्तःप्राकृतःस्मृतः॥४७॥गृहीत्वापींद्रियैरर्थान्योनद्वेष्टिनकांक्षति॥विष्णोर्मायामिदंपश्यन्सवैभा
गवतोत्तमः॥४८॥देहेंद्रियप्राणमनोधियांयोजन्माप्ययक्षुद्भयतर्षकृच्छ्रैः॥संसारधर्मैरविमुह्यमानःस्मृत्याहरेर्भागवतप्र
धानः॥४९॥नकामकर्मबीजानांयस्यचेतसिसंभवः॥वासुदेवैकनिलयःसवैभागवतोत्तमः॥५०॥नयस्यजन्मकर्मभ्यांनवर्णाश्र
मजातिभिः॥सज्जतेऽस्मिन्नहंभावोदेहेवैसहरेःप्रियः॥५१॥नयस्यस्वःपरइतिवित्तेष्वात्मनिवाभिदा॥सर्वभूतसमःशांतःसवै
णांकृच्छ्रंश्रमःतैरविमुह्यमानः॥४९॥कामाश्चकर्माणिचबीजानिचवासनाःतेषांवासुदेवएकनिलयआश्रयोयस्यसः॥५०॥एतेनगृ
हीत्वापीतिश्लोकश्रयेणद्वेषमोहहर्षकामादिरहितश्चरतिइति॥यथाचरतिरस्यस्यान्तरमुक्तं॥यैर्लिंगैर्भगवत्प्रियइस्येत्युत्तर
माह॥नयस्येति॥जन्मकुलंकर्मतपआदिजातयःअनुलोमप्रतिलोमजाःमूर्द्धावसिक्तादयः॥अस्मिन्देहेअहंकाररहितैःस
त्कुलकर्मादिलिंगैःहरेःप्रियोभवतीत्यर्थः॥५१॥वित्तेषुस्वीयंपरकीयमितित्यात्मनिस्वः॥५२॥छ॥श्रीदत्तात्रयायनमः॥७२

भा॰ ए॰
९

किंचत्रिभुवनविभवहेतवेपित्रैलोक्यराज्यार्थमपिलवार्द्धमपिनिमिषार्द्धमपिभगवत्पदारविंदंभजतायोनलंचेतिसवैष्णवाग्र्यः॥ननुलवार्द्धमात्रेपि
भजनोपरमेचेतावान्लाभोभवेत्॥तत्कुतोनलेत्तत्राह॥अकुंठस्मृतिःभगवत्पदज्ञतोऽन्यत्सारंनास्तीयेवंरूपाऽविकुंठात्वनपगतास्मृतिर्यस्यसः
भगवत्पदतोऽन्यत्सारंनास्तीतिकुतःअवस्माह॥अजितैहरावेवआत्मायेषांतथाभूतैःसुरादिभिरपिसुदुर्लभात्॥किंतुकेवलंविमृग्यात्॥तदपेक्षयास
र्वस्यतुच्छत्वंस्मरन्यायोनचलतीत्यर्थः॥५३॥अपिचविषयाभिसंधिनाचलनंकामेनाऽतिसंतापेसतिभवेत्सचसंसतुभगवत्सेवानिवृत्तौनसंभवतीत्याह॥
भगवतइति॥उरुविक्रमौचतौअंघ्रीचतयोःशाखाःअंगुलयःतासुअंगुल्यादिषुनखनिचतानिमणयइवतेषांचंद्रिकात्रीतरुादीप्तिस्तयानिर

त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात्। नचलतिभगवत्पदारविंदाल्लवनिमिषार्द्धमपिसवैष्णवा
ग्र्यः॥५३॥भगवतउरुविक्रमांघ्रिशाखानखमणिचंद्रिकयानिरस्ततापे। हृदिकथमुपसीदतांपुनःसःप्रभवतिचंद्रइवोदि
तेऽर्कतापः॥५४॥विसृजतिहृदयंनयस्यसाक्षाद्धरिरवशाभिहितोप्यघौघनाशः। प्रणयरशनयाधृतांघ्रिपद्मःसभवतिभाग
वतप्रधानउक्तः॥५५॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेनारदवसुदेवसंवादेद्वितीयोध्यायः॥२॥छ॥छ॥छ॥

स्तःकामादितापोयस्मिन्तस्मिन्नुपसीदतांभजतांहृदिकथंपुनःसःतापःप्रभवति॥चंद्रेउदितेअर्कतापइव॥नयस्यस्वःपरइत्यादि
नाश्लोकत्रयेणयाद्दशाइत्यस्योत्तरमुक्तंवेदितव्यं॥यत्तूक्तंतेइत्यस्यचहरिनामातीतिज्ञातव्यं॥५४॥उक्तसमस्तलक्षणसारमाह॥
विसृजतीति॥हरिरेवस्वयंसाक्षात्तस्यहृदयंनविसृजतिनमुंचति॥कथंभूतःअवशेनाप्यभितमात्रेपिअघौघंनाशयति॥स्त
त्किंनविसृजतियतःप्रणयरशनयाधृतंहृदयेनिबद्धंअंघ्रिपद्मंयस्यसःसभागवतप्रधानउक्तोभवति॥५५॥इत्येकादशेद्विती
यः॥२॥छ॥छ॥श्रीरामचंद्रायनमः॥श्रीकृष्णायनमः॥श्रीरामचंद्रायनमः॥श्रीदत्तात्रयायनमः॥छ॥छ॥छ॥छ॥छ॥छ॥॥॥

रामः
९

मायातत्तरणंब्रह्मकर्मप्रश्नचतुष्टये॥ तृतीयेतत्तरं दत्तंआर्षभैर्मुनिभिःपृथक्॥१॥ विष्णोर्मायामिदंपश्यनिरुक्तंततोमायांपृच्छति॥ परस्येति॥ हेभगवंतः
॥१॥ ननूक्तलक्षणोभगवांतोभक्त्याकृतार्थस्याःकिंबहुभिःप्रश्नैःअतआह॥ नानुतृप्यइति॥ संसारतापैर्नितरांतप्तोअहंतस्यतापस्यभेषजंहरिकथाम्
तरूपंयुष्मद्वचोजुषमाणोनानुतृप्यामि॥२॥ मायायाःस्वरूपतोनिरूपणाऽसंभवात्सृष्ट्यादिद्वारेणनिरूपयितुमाह॥ एभिरिति॥ आद्यःपुरुषःस्व
यात्मात्स्याभूतानामात्माकारणभूतःएभिःस्वसृष्टैःमहाभूतैरुच्चावचानिभूतानिससर्ज॥ एषामायाभगवतइतिचरमश्लोकपदस्यप्रतिश्लोकः
कमनुषंगःकिमर्थंससर्ज॥ स्वमात्रात्मप्रसिद्धये॥ स्वंमिमीतियःउपास्तेसःस्वमातातस्याऽत्मनोजीवस्यप्रकृष्टायैप्रसिद्धये॥ यद्वा॥ स्वांशभूतानां
जीवानांमात्रात्मप्रसिद्धयेविषयभोगाय॥ आत्मप्रसिद्धयेमोक्षायचेत्यर्थः॥ तदुक्तंचेदस्तुतौ॥ बुद्धींद्रियमनःप्राणान्जनानामसृजत्प्रभुः॥ मात्रार्थं

राजोवाच॥ परस्यविष्णोरीशस्यमायिनामपिमोहिनीं॥ मायांवेदितुमिच्छामोभगवंतोब्रुवंतुनः॥१॥ नानुतृप्येजुषन्युष्म
द्वचोहरिकथामृतं॥ संसारतापनिस्तप्तोमर्त्यस्तत्तापभेषजं॥२॥ अंतरिक्षउवाच॥ एभिर्भूतानिभूतात्मामहाभूतैर्महाभुजः॥
ससर्जोच्चावचान्याद्यःस्वमात्रात्मप्रसिद्धये॥३॥ एवंसृष्टानिभूतानिप्रविष्टःपंचधातुभिः॥ एकधादशधात्मानंविभज
न्जुषतेगुणान्॥४॥ गुणैर्गुणान्सभुंजानआत्मप्रद्योतितैःप्रभुः॥ मन्यमानइदंसृष्टमात्मानमिहसज्जते॥५॥७९ ६९

चभवार्थंचआत्मनेऽकल्पनायचइति॥ एवंजीवोपकरणार्थंपंचधातुभिःमहाभूतैःसृष्टानिभूतानिअंतर्यामितयाप्रविष्टःएकधामन
सादशधाबाह्येंद्रियरूपेणआत्मानंविभजन्गुणान्तत्तद्विषयान्जुषतेजोषयतीत्यर्थः॥ यद्वातंआत्मानंप्रतिगुणान्विभजन्जुषतेप्री
यतइत्यर्थः॥४॥ सचजीवःआत्मनाअंतर्यामिणाप्रद्योतितैर्गुणैरिंद्रियैर्गुणान्विषयान्भुंजानःइदंसृष्टंशरीरमात्मानंमयानइदंशरीरादौ
सज्जति॥ अतएवसंसरतीभावः॥ ननुभुंजानःकथंसज्जतेभुंजानोभोगसमाप्तौमुच्यतइतिचेत्तत्राह॥ कर्माणीति॥५॥७९॥६९॥७९॥६९॥

कर्मभिः कर्मेंद्रियैश्च सनिमित्तानि सवासनानि कर्माणि कुर्वन् सन् तत्तत्सर्वकर्मफलं गृण्हन् भ्रमतीह॥ अयं देहभृत् संसारान्न मुच्यते॥ कथं सुखेतरं सुखदुः
खात्मकं कर्मफलं॥६॥ कियंतं कालं भ्रमति तत्राह॥ इत्थमिति॥ बद्धिति॥ मोक्षमभिव्याप्य बहूनि भूतानि वहंतीति तथा॥ ताः सर्गप्रलयौ उत्पत्तिमरणे का
रणं॥७॥ धातूनां महाभूतानामुपप्लवेनाशहेतावासन्ने॥ व्यक्तं कार्यं॥ द्रव्यं स्थूलं॥ गुणः सूक्ष्मं तदात्मकं अव्यक्तायत्रव्यं प्रतिनेतुमाकर्षति सा यया
सूर्यः॥८॥ नाशहेतून्नाह॥ शतवर्षेति॥ तस्मिन् काले उपचितश्चासौ उष्णश्चासौ अर्कश्च॥ यद्वा तेन कालेनोपचितमुष्णत्वं यस्य सः त्रीन् लोकान्
प्रतियिष्यति॥९॥ एवं मायामयीं सृष्टिमुक्त्वा प्रलयं दर्शयितुमारभते॥ पातालतमिलैति॥ ऊर्ध्वशिखो ऊर्ध्वज्वालः विष्वक् सर्वतः॥१०॥ सांवर्त्तकः

कर्माणि कर्मभिः कुर्वन् सनिमित्तानि देहभृत्॥ तत्तत्कर्मफलं गृण्हन् भ्रमतीह सुखेतरं॥६॥ इत्थं कर्मगतीर्गच्छन् बद्धभूतवहाः
पुमान्॥ आभूतसंप्लवात्सर्गप्रलयावश्नुते ऽवशः॥७॥ धातूपप्लव आसन्ने व्यक्तं द्रव्यं गुणात्मकं॥ अनादिनिधनः कालो ह्य
व्यक्तायापकर्षति॥८॥ शतवर्षं ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि॥ तत्कालोपचितोष्णार्को लोकांस्त्रीन्प्रतयिष्यति॥९॥ पा
तालतलमारभ्य संकर्षणमुखानिलः॥ दहन्नूर्ध्वशिखो विष्वग्वर्द्धते वानिरितः॥१०॥ सांवर्त्तको मेघगणो वर्षति स्म शतं समाः॥
धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट्॥११॥ ततो विराजमुत्सृज्य वैराजः पुरुषो नृप॥ अव्यक्तं विशते सूक्ष्मं निरिंधन

प्रलयकर्त्ता॥ धाराभिः न तु बिंदुभिः हस्तिहस्ताभिस्तत्प्रमाणाभिः॥११॥ ततः उपाधिलयात् वैराजः पुरुषोऽव्यक्तं कारणं प्रविशति॥ ननु ब्रह्मणा स
हते सर्वे संप्राप्ते प्रतिसंचरे॥ परस्यांते कृतात्मानः प्रविशंति परं पदमिति श्रुतेः॥ यावदधिकारमवस्थितिराधिकारिणामिति न्यायाच्च वैराजश
ब्दाऽभिधेयस्य ब्रह्मणः परमभागवतत्वान्मोक्ष एव संगच्छते॥ नान्येषामिव कारणमात्रप्रवेशः सत्यं॥ अश्वमेधादियाजिनां सत्यलोकं गतानाम
मप्यभक्तानामावृत्तिश्चश्रवणादिन्नकलेमच ब्रह्मणोपि प्रकृतौ लयः पुनरुत्पत्तिश्चेति मोक्षपरोर्लभ्यसूचनायैवमुक्तमित्यविरोधः॥ यद्वा
केनापि प्रमाणेन न व्यज्यत इत्यव्यक्तं ब्रह्मैव तत्प्रवेशोऽनच मोक्ष एवोक्तः इति द्रष्टव्यं॥१२॥ श्रीरामचंद्रायनमः॥ श्रीदत्तात्रयायनमः॥ छ॥

एवं विराजो लयमुक्त्वा तत्कारणानां महदादिपृथिव्यंतानां प्रतिलोम्येन लयमाह ॥ वायुनेति ॥ वायोर्हि गंधहरत्वं प्रसिद्धं ॥ सांवर्त्तकेन वायुना हृतगंधा
अत एव गंधस्य व्यावर्त्तकस्य गतत्वात् सलिलत्वाय कल्पते ॥ सलिले लीयत इत्यर्थः ॥ तदुत्तरस्ते तेन वायुना एव हृतो रसो यस्य तत् ॥ ज्योतिषि लीयत इ
त्यर्थः ॥ १३ ॥ तमसश्च रूपतिरस्कारित्वं प्रसिद्धं सांवर्त्तकेन तमसा अवकाशेन आकाशेन स्वकारणेन ॥ १४ ॥ कालात्मना ॥ शब्दस्यादिकाल एव ना
शः प्रसिद्धः तद्रूपेणात्मना ईश्वरेण आत्मनि तामसेऽहंकारे ॥ इंद्रियाणि बुद्धिश्च राजसेऽहंकारे ॥ मनो वैकारिकैर्देवैः सह सात्त्विकाहंकारे ॥ एवं
त्रिविधैः स्वगुणैः स्वकार्यैः ॥ अहं अहंकारः आत्मनि महति स च प्रकृताविति द्रष्टव्यं ॥ १५ ॥ त्रिवर्णा त्रिगुणा माया श्रवणभीतं राजानं तन्निवर्त्ति

वायुनाहृतगंधाभूःसलिलत्वायकल्पते ॥ सलिलंतद्धृतरसंज्योतिष्ट्वायोपकल्पते ॥ १३ ॥ हृतरूपंतुतमसावायौज्योतिः
प्रलीयते ॥ हृतस्पर्शोऽवकाशेनवायुर्नभसिलीयते ॥ १४ ॥ कालात्मनाहृतगुणंनभआत्मनिलीयते ॥ इंद्रियाणिम
नोबुद्धिःसहवैकारिकैर्नृप ॥ १५ ॥ प्रविशंतिह्यहंकारंस्वगुणैरहमात्मनि ॥ १५ ॥ एषामायाभगवतःसर्गस्थित्यंतकारिणी
त्रिवर्णावर्णिताऽस्माभिःकिंभूयःश्रोतुमिच्छसि ॥ १६ ॥ राजोवाच ॥ यथैतामैश्वरीमायांदुस्तरामकृतात्मभिः ॥ तरंत्यंजःस्थूल
धियोमहर्षइदमुच्यतां ॥ १७ ॥ प्रबुद्धउवाच ॥ कर्माण्यारभमाणानांदुःखहत्यैसुखायच ॥ पश्येत्पाकविपर्यासंमिथुनीचारिणां

श्रवणं स्वयमेव छंदयति ॥ किंभूय इति ॥ १६ ॥ एवमनुकंपितस्तन्निवृत्त्युपायमेव पृच्छ ॥ यथैतामिति ॥ यद्यपि तन्माययातो बुध आभजेत्तमि
ति ॥ भक्तिस्तारकत्वेनोक्तैव तथापि किं भक्तिरेव अन्योपि वा तत्रोपायास्तीति ज्ञातुं पुनः प्रश्नः ॥ अकृतात्मभिः अवशीकृतांतःकरणैः स्थू
लधियः स्थूले शरीरे धीः अहंधीर्येषां ते ॥ १७ ॥ भक्तिव्यतिरेकेण नास्त्यन्य उपाय इति अभिप्रेत्य भक्तिमेव ससाधनां निरूपयति ॥ तत्र
प्रथमं वैराग्यद्वारा गुरूपासत्तिमाह ॥ चतुर्भिः ॥ कर्माणीति ॥ दुःखहत्यै दुःखप्रतीकाराय ॥ पाकविपर्यासं फलवैपरीत्यं ॥ मिथुनीचारिणां
मिथुनीभूय वर्त्तमानानां ॥ १८ ॥ ७ ॥

भा॰ ए॰ ।। ११ ।।

कर्मभिःसाधितान्अपिविनाशित्वादुःखहेतवइतिचपश्येदित्याह।।निसार्त्तिदेनेति।।आत्मनःस्वस्यमृत्युरूपेणचलैःअनित्यैःअपत्याभिश्च।।१९।।
एवंलोकंपरमिति।।कर्मनिर्मितत्वात्नश्वरं।।तथाचश्रुतिः।।तद्यथेहकर्मजितोलोकःक्षीयतएवमेवामुत्रपुण्यजितोलोकःक्षीयतइति
किंचवर्त्तमानसमयेपिदुःखयुक्तंपश्येदित्याह।।सतुल्यातिशयध्वंसंसहतुल्येनअतिशयेनध्वंसेनचवर्त्तमानां।।अथतुल्येस्पर्द्धा।।अति
शयेअसूया।।ध्वंसालोचनेभयादिकंचापरिहार्यमित्यर्थः।।यथाखंडमंडलपतीनांमिथःस्पर्द्धादितद्वत्।।२०।।उक्तमंश्रेयोज्ञातुमिच्छुःशाब्दे
ब्रह्मणिवेदाख्येन्यायतोनिष्णातं।।तत्त्वज्ञं।।अन्यथासंशयनिरासकत्वायोगात्।।परेचब्रह्मणिअपरोक्षानुभवेननिष्णातं।।अन्यथासंबोधसंचा

नित्यार्त्तिदेनवित्तेनदुर्लभेनात्ममृत्युना। गृहापत्याप्तपशुभिःकाप्रीतिःसाधितैश्चलैः।।१९।।एवंलोकंपरंविद्यान्नश्वरंकर्मनि
र्मितं।सतुल्यातिशयध्वंसंयथामंडलवर्त्तिनां।।२०।।तस्माद्गुरुंप्रपद्येतजिज्ञासुःश्रेयउत्तमं।शाब्देपरेचनिष्णातंब्रह्मण्यु
पशमाश्रयं।।२१।।तत्रभागवतान्धर्मान्शिक्षेद्गुर्वात्मदैवतः।अमाययानुवृत्यायैस्तुष्येदात्मात्मदोहरिः।।२२।।सर्वतो
मनसोऽसंगमादौसंगंचसाधुषु।दयांमैत्रींप्रश्रयंचभूतेष्वद्धायथोचितं।।२३।।शौचंतपस्तितिक्षांचमौनंस्वाध्यायमा

रायोगात्।।परेब्रह्मणिनिष्णातत्वद्योतकमाह।।उपशमाश्रयमिति।।२१।।गुरुरेवात्मादैवतंचयस्यसः।।अनुवृत्यासेवया।।यैर्धर्मैःव
स्तुतःआत्माआत्मप्रदश्चोपासकानां।।यथाबलिप्रभृतीनां।।२२।।यथोचितमिति।।दीनेषुदयां।।समेमैत्रींउत्तमेषुप्रश्रयं।।शिक्षे
दित्यर्थः।।२३।।शौचंबाह्यंमृज्जलादिभिः।।अभ्यंतरंचअदंभादिशिक्षेदित्यर्थः।।तपःस्वधर्माचरणं।।तितिक्षांक्षमां।।मौनंवृथावाचाम
नुच्चारणं।।स्वाध्यायंअधिकारानुरूपंवेदपाठादिकं।।आर्जवमवक्रतां।।ब्रह्मचर्यंयस्ययथाह्युचितं।।ऋतुषुस्वदारानियमादि।।अत
एवगृहस्थस्यब्रह्मचर्यंऋतुगामित्वं।।अहिंसाभूतेष्वद्रोहं।।द्वंद्वसंज्ञयोःशीतोष्णसुखदुःखादिरूपयोः।।समत्वंहर्षविषादराहित्यं।।२४।।६९

राम ।। ११ ।।

आत्मेश्वरान्वीक्षां सच्चिद्रूपाऽत्मेक्षां नियंतृत्वेनेश्वरेक्षां च ॥ कैवल्यमेकांतशीलत्वं ॥ अनिकेततां गृहाद्यभिमानराहित्यं विविक्तचीरवसनं विजन
पतितानां वस्त्रखंडानां च वल्कलानां वा परिधानं ॥ शांतिदयातितिक्षापरसाद्गुणयुक्तं ॥ २५ ॥ भागवते भगवत्प्रतिपादके ॥ अत्यन्त्रशास्त्रा
दौ यात्मनिंदातां ॥ मनःप्राणायामैः वाचो मौनेन ॥ कर्मणोऽनीहया दंडं ॥ सत्यं यथार्थभाषणं ॥ शमदमौ अंतःकरणबाह्येंद्रियनिग्रहौ ॥ २६ ॥ ह
रेर्जन्मकर्मगुणानां श्रवणादि ॥ तदर्थे हर्युद्देशेन सर्वकर्म ॥ विशेषतश्च यज्ञदानादि यत्तत्तदर्थे विशेषेत ॥ इष्टं दत्तमित्यादेर्यो भावेनिष्ठा ॥ व
त्तं सदाचारः ॥ आत्मनः प्रियं गंधपुष्पादि दारादीनप्यालस्यपरस्मै परमेश्वराय निवेदनं तत्सेवकतया समर्पणं यत्तत्कुर्वीत ॥ २८ ॥ श्री
सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततां ॥ विविक्तचीरवसनं संतोषो येनकेनचित ॥ २५ ॥ श्रद्धां भागवते शास्त्रे निंदामन्य
त्र चापि हि ॥ मनोवाक्कायदंडं च सत्यं शमदमावपि ॥ २६ ॥ श्रवणं कीर्त्तनं ध्यानं हरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानां च तद
र्थेऽखिलचेष्टितं ॥ २७ ॥ इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियं ॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनं ॥ २८ ॥ ए
वं कृष्णात्मनाथेषु मनुष्येषु च सौहृदं ॥ परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥ २९ ॥ परस्परानुकथनं पावनं भ
गवद्यशः ॥ मिथो रतिर्मिथस्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥ ३० ॥ स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिं ॥ भक्त्या
कृष्ण एवात्मा नाथश्च येषां कृष्णात्मा आत्मनो जीवस्य नाथो येषामिति वा तेषु ॥ उभयत्र स्थावरे जंगमे च या परिचर्या सा तां ॥ विशेषतो न
षु तत्रापि साधुषु स्वधर्मशीलेषु ततोपि महत्सु भागवतेषु ॥ २९ ॥ तैश्च सह संगम्य यत्पावनं भगवद्यशस्तस्य परस्परानुकथनं शिक्षे
त ॥ यद्वा यशः प्रतितत्स्पर्द्धादि त्यागेन मिथो रतिः रमणं ॥ या च तुष्टिः सुखं या च निर्वृतिः समस्तदुःखनिवृत्तिः तां च शिक्षेत ॥ ३० ॥
एवं वर्त्तमानानां परमानंदप्राप्तिमाह ॥ स्मरंत इति द्वयेन ॥ भक्त्या साधनया भक्त्या संजातया प्रेमलक्षणया भक्त्या ॥ तदेवाह ॥ ३१ ॥ ध ॥ ध

संजातया भक्त्या बिभ्रत्युत्पुलकां तनुं ॥ ३१ ॥

अजं हरिं अनुशीलयंति। तल्लीलां अभिनयंति। एवं परमेस निर्वृताः संतस्तूष्णीं भवंति॥ २२॥ उपसंहरति। इतीति। भगवद्धर्मोत्पन्नया भक्त्या॥ २३॥ नारायणपरो मायां तरतीत्युक्ते पृच्छति। नारायणाभिधानस्येति। निष्ठां स्वरूपं। अयं भावः। ब्रह्मैव तावन्नारायण इति। भगवानिति। परमात्मेति चोच्यते। तदुक्तं॥ वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते इति। तथा नारायणे भगवति। तदिदं विश्वमाहितं। गृहीतमायोरुगुणः स्वतः॥ इत्यादिषु। तत्र किमेभिः शब्दैर्निर्विशेषं तदेव वस्तूच्यते। अस्ति वा

क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः। नृत्यंति गायंत्यनुशीलयंत्यजं भवंति तूष्णीं परमेत्य निर्वृताः॥ २२॥ इति भागवतान्धर्मान्शिक्षन्भक्त्या तदुत्थया। नारायणपरो मायामंजस्तरति दुस्तरां॥ २३॥ श्रीराजोवाच॥ नारायणाभिधानस्य ब्रह्मणः परमात्मनः। निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः॥ २४॥ पिप्पलायन उवाच॥ स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च। देहेंद्रियासुहृदयानि चरंति येन संजीवितानि तदवेहि परं नरेंद्र॥ २५॥ छ

कोपि विशेषांश इति तत्रोत्तरमाह॥ २४॥ स्थित्युद्भवेति। अयमर्थः॥ अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः॥ स्वयं च अहेतुः हेतुरहितः॥ स नारायण इति परमेव तत्त्वमवेहि। स्वप्नजागरसुषुप्तिषु सत् अनुवर्तमानं यत्। वक्ष्यति। तुरीयं त्रिषु संततमिति। बहिश्च समाध्यादौ यत्सत् तद्ब्रह्मेति परमेव तत्त्वमवेहि। देहेंद्रियप्राणमनांसि येन संजीवितानि संचरंति प्रवर्तंते तत्परमात्मेति परमेव तत्त्वमवेहि॥ एवं लक्षणभेदैर्नारायणादिनामभिरुच्यमपि परमेकमेव तत्त्वं जानीहि॥ २५॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

र

अवेहीत्यनेनविषयत्वंप्राप्तंनिषेधयति।।नैतदिति।।तत्तत्परंतत्त्वंमनोनविशतिनविषयीकरोति।।वागुतवागपि।।चक्षुश्च।।आत्माबुद्धिश्च।।प्राणश्च
क्रियाशक्त्यानप्राप्नोति।।अन्यानींद्रियाणि।।यथाऽनलंस्वाःस्वांशभूताअर्चिषोविस्फुलिंगादयोनप्रकाशयंति।।नदहंतिच।।तथाजडाअसुमन
आदिषुवृत्तिषुअभिव्यज्यमानस्यात्मप्रकाशस्यतत्तद्वृत्तिप्रकाशकस्यनतत्प्रकाशविषयत्वं।।तथाचश्रुतिः।।प्राणस्यप्राणमुतचक्षुषश्च
क्षुरुतश्रोत्रस्यश्रोत्रमन्नस्यान्नंमनसोयन्मनोविदुरिति।।तथायतोवाचोनिवर्त्ततेअप्राप्यमनसासहे।।सदिश्रुतेः।।ननुतंत्वौपनिषदंपुरु
षंपृच्छामीतिश्रुतेःशब्दगोचरत्वंप्रतीयतेतत्राह।।शब्दोपीति।।आत्मन्मूलंप्रमाणंसत्।।अर्थोक्तिंअर्थादुक्तंयथाभवतितथाह।।नसाक्षात्।।
कुतःबोधकनिषेधतया।।स्वस्यैवधर्मस्यनिषेधरूपत्वात्।।यतोवाचोनिवर्त्ततेअप्राप्यमनसासह।।यद्वाचानाभ्युतंयेनवागभ्युद्यतेतदेवब्र

नैतन्मनोविशतिवागुतचक्षुरात्माप्राणेंद्रियाणिचयथाऽनलमर्चिषःस्वाः॥५९ ५९
शब्दोपिबोधकनिषेधतयात्ममूलमर्थोक्तिमाहयदतेननिषेधसिद्धिः॥३६॥६० ६०

ह्मत्वंविद्धि।।यन्मनोनमनुतेनचक्षुषापश्यतिकश्चनैनमित्यादिश्रुतेः।।ननुतर्हिनैवाहश्रुतिःकिमिदमुच्यतेअर्थोक्तिमाह।।तत्राह।।य
दतइति।।अथातआदेशोनेतिनेति।।अस्थूलमनण्वयतोवाचोनिवर्त्ततेआप्राप्यमनसासह।।यद्वाचानाभ्युदितंमित्यादिनिषेधस्य
यत्अवधिभूतंब्रह्मऋतेविनासिद्धिर्नास्तिसर्वस्यनिषेधस्यसावधित्वादितिभावः।।३६।।ननुतर्हिप्रमाणाऽविषयत्वान्नास्तिब्रह्मेति
प्रसज्यतेअतआह।।सत्त्वमिति।।सतःस्थूलंकार्यंअसतःसूक्ष्मंकारणंतत्सर्वंब्रह्मैवभाति।।कुतःयद्यस्मात्तयोःसदसतोःपरंकार
णं।।कार्यंकारणान्नभिन्नंभवति।।वाचारंभणमितिश्रुतिः।।ननुकथंबहुविधस्यकारणंतत्राह।।उरुशक्तिःअनेकशक्तिमत्।।उरुर्महती

मायालक्षणाशक्तिर्यस्यतदितिवा॥ बहुधाभानमेवदर्शयति॥ आदौयदेकमेवब्रह्मतदेवसत्वंरजस्तमइतित्रिवृत्प्रधानंप्रवदंति॥ ततःक्रि यात्राक्त्यासूत्रंज्ञानशक्त्यामहानिति॥ तदेवप्रवदंति॥ ततःअहमितिजीवंजीवोपाधिमहंकारंचतदेवप्रवदंति॥ ततश्चज्ञानक्रियार्थफल रूपतयाज्ञानशब्देनदेवताःक्रियाइंद्रियाणि॥ अर्थाःविषयाःफलंतत्प्रकाशःसुखादिर्वा॥ तद्रूपतयाब्रह्मैवभाति॥ नहिसर्वस्वरूपेण स्वतोभासमानस्यब्रह्मणःस्वसिद्धौप्रमाणापेक्षेतिभावः॥२७॥ ननुसर्वात्मकंचेत्ब्रह्मतर्हिसर्वस्यकार्यस्यजन्मादिविकारित्वात्ब्रह्म णोपितत्प्रसंगःस्यादतआह॥ नात्मेति॥ आत्माब्रह्मनजजाननजातःजन्माद्यभावादेवतदनंतरास्तित्वलक्षणोपिविकारोनास्ति॥ जायते

सत्वंरजस्तमइतित्रिवृदेकमादौसूत्रंमहानहमितिप्रवदंतिजीवं॥ ज्ञानक्रियार्थफलरूपतयोरुशक्तिब्रह्मैवभातिसद सच्चतयोःपरंयत्॥२७॥ नात्माजजाननमरिष्यतिनैधतेऽसौनक्षीयतेसवनविद्व्यभिचारिणांहि॥ सर्वत्रशश्वदन पाय्युपलब्धिमात्रंप्राणोयथेंद्रियबलेनविकल्पितंसत्॥२८॥

अस्ति॥ विपरिणमते॥ वर्द्धते॥ अपक्षीतेनपश्यतिच॥ नैधतेनवर्द्धते॥ क्षयाभावादेपरिणामोपिनिरस्तः॥ कुतःदियस्मात्व्यभिचारिणा मागमापायिनांबालयुवादिदेहानांसवनवित्तत्कालद्रष्टा॥ नहिअवस्थावतांद्रष्टातदवस्थोभवतीत्यर्थः॥ निरवस्थः॥ कोसावा त्मातत्राह॥ उपलब्धिमात्रमिति॥ नन्वायातंतर्हिक्षणिकत्वंनेत्याह॥ सर्वत्रेति॥ सर्वत्रदेशेशश्वत्सर्वदाअनपायिअनुवर्त्तमा नं॥ ननुनीलंज्ञानंजातंपीतज्ञानंनष्टमितिप्रतीतेर्ज्ञानस्यानपायित्वमतआह॥ इंद्रियबलेनेति॥ सदेवज्ञानंइंद्रियबलेनेति विविधंकल्पितं॥ नीलाद्याकारवृत्तयएवजायंतेनश्यंति॥ नज्ञानंनाशइतिभावः॥ व्यभिचारिष्वव्यभिचारेदृष्टांतः॥ प्राणोयथे ति॥२८॥ ॐनमोभगवतेवासुदेवाय॥ श्रीदत्तात्रयायनमः॥ श्रीगुरुचरणारविंदाभ्यांनमः॥ ७॥ ७॥ ७॥ ७ ७ ७७७७७७७

दृष्टांतेविद्रूपवन्निंद्रियादिलयेननिर्विकारात्मोपलब्धिंदर्शयति॥अंडेष्विति।पेशिषुजरायुजेषुतरुषुउद्भिज्जेषु॥अविनिश्चितेषुस्वेदजेषुउपधावतिअ
नुवर्त्तते।।एवंदृष्टांतेननिर्विकारत्वंप्रदर्श्यदार्ष्टांतिकेपिदर्शयति॥कथंतर्हितदैवात्मासविकारइवप्रतीयते।यद्यदाजागरेइंद्रियगणः॥यदाच
स्वप्नेतत्संस्कारवानहंकारः॥यदातुसुषुप्तंतदातस्मिन्प्रसुप्तेइंद्रियगणेसन्नेलीनेसति।अहंकारेचसन्ने।कूटस्थःनिर्विकारएवआत्मा॥कुतः
आशयमृतेलिंगशरीरमुपाधिंविना॥विकारहेतोरुपाधेरभावादित्यर्थः॥ननुअहंकारपर्यंतस्यसर्वस्यलयेशून्यमेवशिष्यतइतदाकू
टस्थआत्माअतआह॥तदनुस्मृतिर्नःतस्यविशेषज्ञानशून्यस्यसुखात्मनःसुषुप्तिसाक्षिणःस्मृतिर्नःअस्माकंभवति॥एतावंतंकालं
सुखमहमस्वाप्संनकिंचिदवेदिषमिति॥अतोऽननुभूतस्याऽस्मरणादस्त्येवसुषुप्तावात्मानुभवः॥तथाचश्रुतिः॥यद्वैतन्नपश्यति

अंडेषुपेशिषुतरुष्वविनिश्चितेषुप्राणोहिजीवमुपधावतितत्रतत्र॥सन्नेयदिंद्रियगणेहमिचप्रसुप्तेकूटस्थआशा
यमृतेतदनुस्मृतिर्नः॥३९॥यर्ह्यब्जनाभचरणैषणयोरुभक्त्याचेतोमलानिविधमेद्गुणकर्मजानि॥तस्मिन्विशुद्धउपलभ्य
तआत्मतत्त्वंसाक्षाद्यथाऽमलदृशोःसवितृप्रकाशः॥४०॥राजोवाच॥कर्मयोगंवदतनःपुरुषोयेनसंस्कृतः॥विधूयेहाशुक

पश्यन्नवैतन्नपश्यति।नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतइति॥३९॥ननुयदिसुषुप्तौकूटस्थआत्मानुभवोभवेत्कथंपुनरपिसंसारःस्या
त्।अविद्यातत्संस्काराणांविद्यमानत्वातइतिचेत्कथंतर्हितन्निवर्त्तकोऽनुभवोभवेत्अतआह॥यर्हीति।विनैषणादिविहायकेवल
मब्जनाभस्यैवचरणेछययाउरुभक्तिस्तयापुमान्चेतसोमलानिविधमेत्नाशयेत्॥चेतएवबाकत्।।स्वगतानिमलानितयाभ
क्त्याक्षालयेत्तदातस्मिन्विशुद्धेचेतसिसतिसाक्षाद्व्यधानेनात्मतत्त्वमुपलभ्यते॥अमलयोःदृशोःसयोःयथापूर्वमेवसिद्धः
सवितृप्रकाशइति॥४०॥भक्तेःकर्मयोगाधीनत्वात्तंपृच्छति॥कर्मयोगमिति॥नैःकर्म्यंकर्मनिवृत्तिसाध्यज्ञानं॥४१॥श्रीदत्ता
त्रयायनमः॥श्रीगुरुचरणारविंदाभ्यांनमः॥श्रीदिगंबरायनमः॥श्रीविष्णावेनमः॥श्रीदत्तदिगंबरायनमः॥श्रीकृष्णगोविंदायनमः॥

प्रश्नांतरमाह। एवमिति॥ प्रश्नंपष्टव्यमर्थं॥ पितुःइक्ष्वाकोः॥ ब्राह्मणाःपुत्राःसनकादयःसर्वज्ञाअपिनाऽब्रुवन्॥ तत्रकारणमुच्यतां॥४२॥ गह
नत्वद्योतनायप्रथमंद्वितीयप्रश्नस्योत्तरमाह। कर्मेति॥ कर्मविहितं॥ अकर्मतद्विपरीतं॥ निषिद्धं॥ विकर्मविगतंकर्मविहिताकरणं॥ एतत्
त्रयंवेदवादः॥ वेदैकगम्यं॥ नलौकिकं॥ वेदस्यचईश्वरात्मत्वातईश्वराद्उद्भवत्वात्॥ अपौरुषेयत्वातइत्यर्थः॥ पुंवाक्येहिवक्तुरभिप्रायतो
ऽर्थज्ञानंचास्यं॥ अपौरुषेयेतुकेवलंपुंवाक्यंपौर्वापर्येणैवतात्पर्यावधारणंतच्चदुःकरमिति॥ तत्रकर्मादौविद्वांसोपिमुह्यंतीतिकिमुता
न्ये॥ अतस्तवतदाबालत्वातनैवाब्रुवन्निति॥४३॥ दुर्ज्ञेयंवेदतात्पर्यमाह। परोक्षवादइति॥ यत्राऽन्यथासिद्धोऽर्थस्तंगोपयितुमन्यथा

एवंप्रश्नमृषीन्पूर्वमपृच्छंपितुरंतिके॥ नाऽब्रुवन्ब्रह्मणःपुत्रास्तत्रकारणमुच्यतां॥४२॥ आविर्होत्रउवाच॥ क
र्माकर्मविकर्मेतिवेदवादोनलौकिकः॥ वेदस्यचेश्वरात्मत्वात्तत्रमुह्यंतिसूरयः॥४३॥ परोक्षवादोवेदोऽयंबालानाम
नुशासनं॥ कर्ममोक्षायकर्माणिविधत्तेह्यगदंयथा॥४४॥ नाचरेद्यस्तुवेदोक्तंस्वयमज्ञोऽजितेंद्रियः॥ विकर्मणाह्यध
र्मेणमृत्योर्मृत्युमुपैतिसः॥४५॥ छ

कत्वोच्यतेसपरोक्षवादः॥ तथाचश्रुतिः॥ तंवाएतंचतुर्हूतंसंतंचतुर्होतेत्याचक्षते। परोक्षप्रियाइवहिदेवाइत्ति। परोक्षवादत्वमेवाह।
कर्ममोक्षायेति। ननुस्वर्गाद्यर्थंकर्माणिविधत्तेनकर्ममोक्षार्थंतत्राह॥ बालानामनुशासनंयथाभवतितथा॥ अत्रदृष्टांतः॥ अगदमौ
षधंयथापिताबालमगदंपाययन्खंडलड्डुकादिभिःप्रलोभयन्पाययति॥ ददातिचतानि॥ नैतावतात्अगदपानस्यतल्लाभःप्रयोजनं॥ अ
पित्वारोग्यं॥ तथावेदोपिअवांतरफलैःप्रलोभयनकर्ममोक्षायैवकर्माणिविधत्ते॥४४॥ ननुकर्ममोक्षश्चेत्तत्पुरुषार्थस्तर्हिप्रथमेवक
र्मत्यज्यतां॥ अतआह॥ नाचरेदिति॥ अजितेंद्रियत्वात्तः॥ स्वयंयदिनाचरेत्तर्हिविकर्मणाकर्मानाचरणालक्षणेनाधर्मेणमृत्योरनंतरंमृ
त्युमेवप्राप्नोति॥ तथाचश्रुतिः॥ मृत्योःपुनर्मृत्युमापद्यतेअर्घमानःस्वकर्मभिरिति॥४५॥ छ॥

तस्माद्वेदोक्तमेककुर्वाणोननुनिषिद्धं।।ननुफलस्यश्रुतत्वात्कर्मणिक्रियमाणेतस्मिन्नासक्तिस्तत्कृतंफलंचस्यात्तन्नतुनैष्कर्म्यरूपासिद्धिरतआह।।
निःसंगःअनभिनिवेशवान्ईश्वरेऽर्पितंननुफलोद्देशेन।।ननुफलस्यश्रुतत्वात्कर्मणिकृतेसतिफलंभवेदेवन।।रोचनार्थेति।।कर्मणिरु
च्युत्पादनार्थंअगदपानेखंडलड्डुकादिवत्।।ततश्चकर्मभिरुच्यावेदार्थंसम्यग्विचारयति।।तदाच।।योवाएतदक्षरमविदित्वागार्ग्यस्मा
ल्लोकात्प्रैतिसकृपणइत्यनात्मज्ञस्यकृपणतांबोधयति।।तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतिब्रह्मचर्येणतपसाश्रद्धयायज्ञेनानाशके
नेति।।यज्ञादीनांज्ञानशेषतांचावधार्यनिःकामेषुकर्मसुप्रवर्त्तते।।ततश्चस्वर्गकामोयजेतेत्यादिभिःकामितस्यैवस्वर्गादेःफलत्वेना
वेदोक्तमेवकुर्वाणोनिःसंगोऽर्पितमीश्वरे।।नैष्कर्म्यांलभतेसिद्धिंरोचनार्थाफलश्रुतिः।।४६।।यआशुहृदयग्रंथिंनिर्जिही
र्षुःपरात्मनः।।विधिनोपचरेद्देवंतंत्रोक्तेनचकेशवं।।४७।।लब्ध्वानुग्रहआचार्यात्तेनसंदर्शितागमः।।महापुरु
षमभ्यर्चेन्मूर्त्याभिमतयात्मनः।।४८।।शुचिःसंमुखमासीनःप्राणसंयमनादिभिः।।पिंडंविशोध्यसन्न्यासकृत
रक्षोऽर्चयेद्धरिं।।४९।।अर्चादौहृदयेवापियथालब्धोपचारकैः।।द्रव्यक्षित्यात्मलिंगानिनिःपाद्यप्रोक्ष्यचास
वगमात्तुअकामितोसौनभवतीतिनैष्कर्म्यसिद्धिरेवभवतीतिभावः।।४६।।वैदिकंकर्मयोगमुक्त्वातांत्रिकमाह।।यआश्विति।।परात्मनः
परस्यैवसतःआत्मनोजीवस्यहृदयग्रंथिंअहंकाररूपंबंधनंनिहर्त्तुमिच्छुःसन्तंत्रोक्तेनविधिनाचप्रकारेणभजेत्।।तंत्रमागमः
चकाराद्वैदिकेनसह।।समुच्चयमाह।।४७।।तमेवविधिमाह।।लब्ध्वानुग्रहइत्यादिना।।तेनाचार्येणसंदर्शितःआगमःअर्च
नप्रकारोयस्यसः।।४८।।मूर्त्तेःसंमुखमासीनःआत्राद्वेनभूतशुद्ध्यादिपिंडंदेहंविशोध्यसन्न्यासैःषडंगन्यासैःकृतरक्षायेनसः
।।४९।।आदावेवद्रव्याणिपुष्पादीनिजलादिशोधनेन।।क्षितिंसंमार्जनादिना।।आत्मानमव्यग्रतयालिंगंमूर्त्तिंअनुलेपप्रक्षालनादिना
निष्पाद्ययोग्यानिकृत्वा।।५०।।६।।

पाद्यादिपात्राण्युपकल्प्य सन्निधाप्य हृदि संपूजितं श्रीमूर्त्तौ ध्यात्वा हृदादिभिः हृदयशिरःशिखाकवचनेत्रास्त्रमंत्रैः॥ मूलमंत्रेण च देवे कृतन्यासो मू
लमंत्रेणार्चयेत्॥५१॥ अंगानि हृदयादीनि उपांगानि सुदर्शनादीनि तत्सहितां सपार्षदां सपरिवारां॥ कैरुपचारैरर्चयेत् दाह॥ पाद्येति॥ आदिश
ब्देन मधुपर्कमाचमनं च॥५२॥ अक्षतास्तिलकालंकारे न तु पूजायां॥ नाक्षतैरर्चयेद्विष्णुं केतक्या च महेश्वरमिति निषेधात्॥ उपहारो नैवेद्यं॥
५३॥ शेषां निर्माल्यं स्वधाम्नि स्वस्थाने देवं हृदि मूर्त्तिकं उद्वास्य स्थापयित्वा पूजाविधिं समापयेदिति शेषः॥५४॥ तांत्रिकं कर्मयोगमुपसं

पाद्यादीनुपकल्प्याथ सन्निधाप्य समाहितः॥ हृदादिभिः कृतन्यासो मूलमंत्रेण चार्चयेत्॥५१॥ सांगोपांगां सपार्ष
दां तां तां मूर्त्तिं स्वमंत्रतः॥ पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः॥५२॥ गंधमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः॥
सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिं॥५३॥ आत्मानं तन्मयं ध्यायन्मूर्त्तिं संपूजयेद्धरेः॥ शेषामादाय शिरसा
स्वधाम्न्युद्वास्य सत्कृतं॥५४॥ एवमग्न्यर्कतोयादावतिथौ हृदये च यः॥ यजतीश्वरमात्मानमचिरान्मुच्यते हि सः
॥५५॥ छ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे तृतीयोऽध्यायः॥३॥ छ॥ राजोवाच॥ यानि यानीह कर्माणि यैर्यैः स्व
च्छंदजन्मभिः॥ चक्रे करोति कर्त्ता वा हरिस्तानि ब्रुवंतु नः॥१॥

हरतीति॥ एवमिति॥ इति एकादशे भागवते तृतीयोऽध्यायः॥३॥ छ॥ चतुर्थे त्ववतारेहाप्रश्नस्योत्तरमुक्तवान्॥ जायंतीनंदनो ना
म्नाद्रुमिलो नवसत्तमः॥१॥ मूर्त्तिभिमतयात्मनः इत्यनेनात्मनः प्रियमवतारं पूजयेदित्युक्ते तेष्ववतारज्ञानमपेक्षितं तथा स्तवैः
स्तुत्वा नमेद्धरिमित्युक्ते गुणकर्मज्ञानं चापेक्षितं अतः पृच्छति॥ यानि यानीति॥ कर्त्ता करिष्यति॥१॥ श्रीदत्तात्रेयाय नमः॥ श्री
रामचंद्राय नमः॥ श्रीदिगंबराय नमः॥ श्रीकृष्णाय नमः॥ श्रीराम राम राम राम राम राम राम राम राम राम राम रामाय नमः

त्वयाप्यग्रानि कालत्रयसंबंधिसकलावतारगुणकर्माणिकथयितुमशक्यानि॥ संक्षेपतस्तु कानिचित्कथयिष्यामीत्याह॥ योवाऽइत्यादिना॥ अनुक्रमिष्य
न्गणयितुमिच्छतियःसतुबालानामिवबुद्धिर्यस्यसःमंदमतिः॥ कालेनमहताकोपिमहामतिःरजांसिगणयेदिति॥ अखिलशक्तिधाम्नःअनंत
शक्त्याश्रयस्यभगवतोगुणांस्तुनैवगणयेत्॥ तथाचश्रुतिः॥ विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजांसिइत्यादि॥ २॥ तत्रादौ
पुरुषावतारमाह॥ भूतैरिति॥ यदास्वसृष्टैर्भूतैर्विराजंब्रह्मांडंपुरंनिर्मायतस्मिन्लीलयास्वांशेनजीवेनसःप्रविष्टःनतुभोक्तृत्वेन॥ प्रभ
तपुण्यस्यजीवस्यतत्रभोक्तृत्वात्॥ २॥ अथगुणस्यकर्माण्याहद्वयेन॥ यत्कायइति॥ यस्याधिष्ठेयःकायएषः॥ कायेइतिसप्तमीवा॥ तद्
दुमिलउवाच॥ योवाअनंतस्यगुणाननंताननुक्रमिष्यन्सतुबालबुद्धिः॥ रजांसिभूमेर्गणयेत्कथंचित्कालेननैवाऽखिल
शक्तिधाम्नः॥ ३॥ भूतैर्यदापंचभिरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन्॥ स्वांशेनविष्टःपुरुषाभिधानमवापनारा
यणमादिदेवः॥ ३॥ यत्कायएषभुवनत्रयसन्निवेशोयस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि॥ ज्ञानंस्वतःश्वसनतोबलमोज
ईहासत्वादिभिःस्थितिलयोद्भवआदिकर्ता॥ ४॥ आदावभूच्छतधृतीरजसाऽस्यसर्गेविष्णुःस्थितौक्रतुपतिर्द्विजधर्मसे
भूतांसमष्टिव्यष्टिजीवानांज्ञानकर्मेंद्रियाणियस्य॥ स्वतःस्वरूपभूतात्सत्वात्॥ तनुभृतांज्ञानंयस्यस्वतःसिद्धंज्ञानमितिवा॥ यस्यश्वसनतःप्राणा
त्॥ बलंदेहशक्तिःओजःइंद्रियशक्तिःईहाक्रियायश्चसत्वादिभिर्विश्वस्थितिलयोद्भवेआदिकर्ताआदिकर्तेत्यनेनतत्पूर्वकंकर्तृत्वमपिसू
चितं॥ ४॥ तद्दर्शयितुंगुणावतारद्वाराचराचरसृष्ट्यादिकर्तृत्वमाह॥ आदाविति॥ यस्यैवअनुषंगः॥ पूर्वश्लोकात्॥ यस्यरजसाअस्यजगतःस
र्गेकार्ये शतधृतिर्ब्रह्माअभूत्स्थितौविष्णुःयस्यसत्वेनेतिशेषः॥ क्रतुपतिःतत्फलदाता॥ द्विजातीनांतद्धर्माणांचसेतुः॥ पालकइत्यर्थः॥
यस्यतमसाअस्याप्ययायरुद्रोऽभूदिति॥ एतैर्ब्रह्मादिभिर्निमित्तभूतैःप्रजासुउद्भवादयोयतःभवंति॥ सआद्यःपुरुषइत्यन्वयः॥ ५॥ ७॥

ॐ॥ रुद्रोऽप्ययायतमसापुरुषःसआद्यः ×
इत्युद्भवस्थितिलयाःसततंप्रजासु॥ ५॥ ७ ×

नरनारायणावतारमाह ॥ धर्मस्येति ॥ धर्मस्य भार्यायां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन अजनि संजातः ॥ तच्चरितमाह ॥ नै
ष्कर्म्यमात्मस्वरूपं लक्ष्ये येन तत् ॥ कर्माकर्म निर्हरि रूपं वाचनारदादिभ्यो स्वयं चचार ॥ योऽद्यापि कर्माचरन्नास्ते ॥ ऋषिवर्यैर्निषेवितांघ्री
यस्य सः ॥ ६ ॥ भगवदवतारद्योतकं परमोपशमं दर्शयितुमितिहासमाह ॥ इंद्र इति द्वाभिः ॥ धाम स्थानं तपसा गृहीतुमिच्छतीति विशंक्य तपोना
शायकामं सपरिवारं प्रेषयामास ॥ स कामः बदरीं भिरूपाख्यायते यस्तं तस्याश्रमं अप्सरोगणादिभिः सह गत्वा स्त्रीणां प्रेक्षणान्येव इषवो बा
णास्तैः न तस्य माहिमानं जानाति तन्महिम्नः ॥ ७ ॥ अक्रमं अपराधं अहो अहं धीर इति विस्मयो गर्वस्तद्रहितः ॥ एजमानान् कांपभीसाकंपमा

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर ऋषिप्रवरः प्रशांतः ॥ नैष्कर्म्यलक्षणमुवाच चचार कर्म योऽद्यापि चास्त ऋ
षिवर्यनिषेवितांघ्रिः ॥ ६ ॥ इंद्रो विशंक्य मम धाम जिघृक्षतीति कामं न्ययुंक्त सगणं स बदर्युपाख्यं ॥ गत्वाऽप्सरोगणवसंतसु
मंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ॥ ७ ॥ विज्ञाय शक्रकृतमक्रममादिदेवः प्राह प्रहस्य गतविस्मय एजमानान् ॥
मा भैष्ट भो मदन मारुत देववध्वो गृह्णीत नो बलिमशून्यमिमं कुरुध्वं ॥ ८ ॥ इत्थं ब्रुवत्यभयदे नरदेव देवाः सव्रीडनम्रशि
रसः सघृणं तमूचुः ॥ नैतद्विभो त्वयि परेऽविकृते विचित्रं स्वारामधीरनिकरानतपादपद्मे ॥ ९ ॥

नान् ॥ भो विभो समर्थ ॥ हे देववध्वः मा भैष्ट ॥ बलिमातिथ्यं तान् प्रार्थयते ॥ इमं मदस्माकमाश्रमं आतिथ्याभावे शून्यप्रायः स्यादित्यर्थः ॥ ८ ॥ हे न
रदेव ॥ अभयदे श्रीनारायणे इत्थं ब्रुवति सति देवाः कामादयः सव्रीडानि नम्राणि शिरांसि येषां ते ॥ लज्जाभारेणैवावनतशिरस्का इत्यर्थः
सघृणं यथा भवति तथा कृपां जनयंत इत्यर्थः ॥ कृपायुक्तमिति वा ॥ हे विभो समर्थ ॥ मायातः परे त्वय्यविकृते स्वारामा आत्मवंतो धीराश्च ते
षां निकरैः आनतं पादपद्मं यस्य तस्मिन् ॥ ९ ॥ श्रीरामकृष्णाय नमः ॥ श्रीदत्तदिगंबराय नमः ॥ श्रीरामचंद्राय नमः ॥ श्रीकृष्णाय नमः ॥

त्वयिएतद्दक्षोभानुकंपादिनचित्रं।।अस्माकमपराधाचरणंस्वभाविकत्वान्नचित्रमित्याह॥त्वामिति।त्वांसेवतांसेवमानानांसुरैरिंद्रादिभिःकृता
अंतरायाःविघ्नाःभवंति।कस्मादित्यतआह॥स्वौकइति।स्वस्थानंस्वर्गमतिक्रम्यपरंसर्वोत्तमंतवस्थानंव्रजतां।नान्यस्यत्वामसेवमानस्य।कुतः
बर्हिषियज्ञेस्वभागान्पुरोडाशादीन्बलीस्कारान्।कथिकइवराज्ञे॥इंद्रादिभ्योददतःप्रयच्छतः।तर्हिमद्भक्तोविघ्नैःमत्र्यतितेत्याह॥धत्तइति।य
दितिनिश्चये।यतस्त्वंसर्वसुराधीश्वरोऽविताराक्षकः।असौविघ्नानांमूर्द्धिपदंमंघ्रिंधत्ते।कुतःपुनस्त्वयिविघ्नशंकेतिभावः॥१०॥त्वद्भक्तानांतु
केवलंतपश्चरतांद्वयीगतिःअस्माकंवावशंयांतिक्रोधस्यवा।तत्राऽस्मद्वशाःकामोपभोगंतावदनुभवंति।क्रोधस्यवशाःपुनरतिमंदाइ

त्वांसेवतांसुरकृताबहवोऽतरायाःस्वौकोविलंघ्यपरमंव्रजतांपदंते।नान्यस्यबर्हिषिबलीन्ददतःस्वभागान्धत्तेपदं
त्वमवितायदिविघ्नमूर्द्धि॥१०॥क्षुत्तृट्त्रिकालगुणमारुतजैह्वशैश्नानस्मानपारजलधीनतितीर्य्यकेचित्।क्रोधस्य
यांतिविकलस्यवशंपदेगोर्मज्जंतिदुश्चरतपश्चवृथोत्सृजंति॥११॥इतिप्रगृणतांतेषांस्त्रियोऽत्यद्भुतदर्शनाः।दर्शयामा
सशुश्रूषांस्वर्चिताःकुर्वतीर्विभुः॥१२॥तेदेवानुचरादृष्ट्वास्त्रियःश्रीरिवरूपिणीः।गंधेनमुमुहुस्तासांरूपौदार्यहतश्रियः॥१३॥

त्याह॥क्षुत्तडिति।क्षुत्तृट्चत्रिकालगुणाश्चशीतोष्णवर्षाणिमारुतश्चप्राणोबाह्योवाजैह्वाःजिह्वाभोगाश्चशैश्नाःगुह्योपभोगाश्चएता
न्अस्मान्अपारजलधिरूपान्अतितीर्य्याविलंघ्यगोःपदेमज्जंति।कुतःयतःविफलस्यक्रोधस्यवशंयांतिगच्छंति।किंचजलेमज्जं
तोयथाविवशाःसंतोमस्तकारोपितंभारमुत्सृजंति।तथावृथैव।नमोक्षायनचभोगायशापादिनादुश्चरंतपःउत्सृजंति।हेभगवन्
सर्वसाधनसंपन्नाःअपितत्सेवाहीनाःसंसरंतिनतरंतीत्यर्थः॥११॥स्त्रियःयोगनिर्मिताःशुश्रूषांकुर्वतीःस्वर्चिताःसुष्ठुअलंकृताः
तेषांस्वलावण्यादितपोपशमायदर्शयामास॥१२॥रूपिणीःमूर्तिमतीःश्रीरिवताःस्त्रीःदृष्ट्वातासांरूपौदार्यमहत्वेनहताश्रीःकांतिर्येषां
ते॥१३॥४॥

वध्वंवल्णीध्वं॥क्ववयंवराकाःक्वेमाःइतिचेत्तत्राह॥सवर्णासमानरूपां॥नैकाप्यस्मदनुरूपेतिचेत्तमाभवत्वनुतथापिस्वर्गस्यभूषणरूपं॥२४॥सुर
बंदिनःदेवभृत्याः॥२५॥इदमायइदंप्रतिनारायणबलमूचुः॥ध्यक्तस्तत्रासन्तासंप्राप्तः॥विस्मितश्च॥तत्रविस्मितःआसीतिवा॥२६॥अन्यानप्य
वतारांस्तच्चरितानिचाह॥हंसस्वरूपीति॥दत्तःदत्तात्रेयः॥कुमारःसनकादिः॥नःपिताऋषभःविष्णुरेवकलयाऽवतीर्णःसन्आत्मयोगम्
अवदत्॥विष्णुनाहयास्येहयग्रीवाऽवतारे॥मधुभिदासतातेनश्रुतयःआहृताःआनीताइत्यर्थः॥२७॥इलाप्रथिवीओषधयश्चगुप्ताःक्रीडेवा

तानाहदेवदेवेशःप्रणतान्प्रहसन्निव॥आसामेकतरांवृध्वंसवर्णांस्वर्गभूषणां॥२४॥ओमित्यादेशमादायनत्वातंसु
रबंदिनः॥उर्वशीमप्सरःश्रेष्ठांपुरस्कृत्यदिवंययुः॥२५॥इदमायतनम्यसदसिश्रृण्वतांत्रिदिवौकसां॥ऊचुर्नारायण
बलंशक्रस्तत्रासविस्मितः॥२६॥हंसस्वरूप्यवदद्च्युतआत्मयोगंदत्तःकुमारऋषभोभगवान्पितानः॥विष्णुःशि
वायजगतांकलयावतीर्णस्तेनाहृतामधुभिदाश्रुतयोहयास्ये॥२७॥गुप्ताप्ययेमनुरिलौषधयश्चमात्स्येक्रोडे
हतोदितिजउद्धरताम्भसःक्ष्मां॥कौर्मेधृतोऽद्रिरमृतोन्मथनेस्वपृष्ठेग्राहात्प्रपन्नमिभराजममुंचदार्त्तं॥२८॥संस्तु
न्वतोऽब्धिपतितान्श्रमणानृषींश्चशक्रंचवृत्रवधतस्तमसिप्रविष्टं॥देवस्त्रियोऽसुरगृहेपिहिताअनाथाजघ्नेऽसुरेंद्रमभ

राह्वाऽवतारे॥ग्राहाद्गजेंद्रममुंचत्मोचयामासहरिसंज्ञावतारे॥एवमादौ॥यत्राऽवतारोनामनास्तितत्रविष्णुःशिवायजगतांकलया
ऽवतीर्णःइत्यनुवर्त्तनीयं॥२८॥संस्तुन्वतःस्तुतिंकुर्वाणान्वालखिल्यान्कश्यपपार्श्वंसमिधाहरणेगतान्गोःपदेनिमग्नान्इंद्रेणोपहसि
तान्उरुसापद्योमोचयत्॥तमसिप्रविष्टंब्रह्महत्यायांप्रविष्टंमोचयामास॥असुरगृहेपिहितानिरुद्धादेवस्त्रियश्चाऽमुंचत्लोका
वतारे॥२९॥श्रीदत्तात्रयायनमः॥श्रीदिगंबरायनमः॥श्रीरामकृष्णायनमः॥श्रीरामचंद्रायनमः॥श्रीदत्तात्रयायनमः॥७॥७॥

अंतरेषुसर्वमन्वंतरेषुकलाभिःमूर्तिभिःभुवनानिअदधात्अपालयत्॥इमांक्ष्मांबलेःयःअदात्ददौ॥२०॥हैहयानांकुलस्याप्ययायभार्गवरूपोऽ
ग्निःसरामोदाशरथिःसन्सलंकंलंकायांस्थितं॥सचजयति॥वर्त्तमानकालीनोऽवतारइत्यर्थः॥२१॥भाविनंरामकृष्णावतारमाह॥भूमेरि
ति॥बुद्धावतारमाह॥वादैरिति॥अतदर्हान्यज्ञानर्हान्दैत्यान्वचनैर्विमोहयिष्यति॥कल्क्यवतारमाह॥भूभुजानिति॥न्यहनिष्यति॥२२॥२३॥
इतिएकादशेचतुर्थः॥पंचमेभक्तिहीनानांकानिष्ठाकोयुगेयुगे॥पूजाविधिरितिप्रश्नद्वयस्योत्तरमुच्यते॥२४॥त्वांसेवतांसुरकृताबहवोऽन्तरा
देवासुरेयुधिचदैत्यपतीन्सुरार्थेहत्वांतरेषुभुवनान्यदधात्कलाभिः॥भूत्वाथवामनइमामहरद्बलेःक्ष्मांयाच्ञाछलेनसम
दाददितेःसुतेभ्यः॥२०॥निःक्षत्रियामकृतगांचत्रिसप्तकृत्वोरामस्तुहैहयकुलाप्ययभार्गवाग्निः॥सोब्धिंबबंधदशकं
ठमहन्सलंकंसीतापतिर्जयतिलोकमलघ्नकीर्त्तिः॥२१॥भूमेर्भरावतरणाययदुष्वजन्माजातःकरिष्यतिसुरैरपिदुष्क
राणि॥वादैर्विमोहयतियज्ञकृतोऽतदर्हान्शूद्रान्कलौक्षितिभुजोन्यहनिष्यदंते॥२२॥एवंविधानिकर्माणिजन्मानिच
जगत्पतेः॥भूरीणिभूरियशसोवर्णितानिमहाभुज॥२३॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेचतुर्थोध्या
यः॥४॥ ॥राजोवाच॥भगवंतंहरिंप्रायोनभजंत्यात्मवित्तमाः॥तेषामशांतकामानांकानिष्ठाऽविजितात्मनां॥१॥
चमसउवाच॥मुखबाहूरुपादेभ्यःपुरुषस्याश्रमैःसह॥चत्वारोजज्ञिरेवर्णागुणैर्विप्रादयःपृथक्॥२॥
यादृशनेनश्रीहरिभक्ताःविघ्नमूर्ध्निपदंदत्वापरांगतिंयांति॥अभक्तानांतुविघ्नाःभवंतिइत्युक्तेतर्हितेषांकागतिर्भवतीतिपृच्छति॥भ
गवंतमिति॥हेआत्मवित्तमाः॥अविजितात्मनांअतएवाऽशांताकामानांकानिष्ठाकिंप्राप्यमित्यर्थः॥१॥स्वजनकस्यगुरोर्भगवतोऽना
दरात्कुरुद्रोहेणदुर्गतिंयांतीतिवक्तुंभगवतःसकाशाद्वर्णाश्रमाणामुत्पत्तिमाह॥मुखेति॥गुणैःसत्वेनविप्राःसत्वरजोभ्यांक्षत्रियः॥रज
स्तमोभ्यांवैश्यः॥तमसाशूद्रइति॥२॥ ॥

एतेषां मध्ये ये ज्ञात्वा न भजंति ये च ज्ञात्वाप्यवजानंति॥ आत्मनः प्रभवो जन्म यस्मात्तं॥ तद्भजने कृतप्रयत्नानामप्याह॥ ईश्वरमिति॥ स्थानाद्वर्णाश्र
माद्भ्रष्टाः॥ ३॥ तत्र ये ज्ञास्ते भवद्विधानामनुग्राह्या इत्याह॥ दूर इति॥ दूरे हरिकथा श्रवणं येषां ते अत एव दूरे च अच्युतकीर्त्तनं येषां ते॥ दूरे अ
च्युतकीर्त्तना श्चेति॥ ४॥ ज्ञानलवदुर्विदग्धाः स्वचिकित्सत्वादुपेक्ष्या इत्याचार्येनाह॥ विप्र इति॥ श्रौतेन उपनयनाख्येन उपलक्षणमेतत्॥ अध्य
यनादिनापि॥ हरेः पदांतिकं तद्भजनोत्तमाधिकारं प्राप्ता अपि मुह्यंति॥ कर्मफलेषु सज्जंते॥ कुतः आम्नायेषु वेदवादास्तेमोहकं तया विद्यंते॥
तदुक्तं गीतासु॥ यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः॥ वेदवादरताः पार्थ नान्यदस्तीति वादिन इत्यादिना॥ ५॥ भक्तिमार्गदार्ढ्याय तेषां मोहं

य एषां पुरुषं साक्षादात्मप्रभवमीश्वरं॥ न भजंत्यवजानंति स्थानाद्भ्रष्टाः पतंत्यधः॥ ३॥ दूरे हरिकथाः केचिद्दूरे चाच्यु
तकीर्त्तनाः॥ स्त्रियः शूद्रादयश्चैव तेऽनुकंप्या भवादृशां॥ ४॥ विप्रो राजन्यवैश्यो वा हरेः प्राप्ताः पदांतिकं॥ श्रौतेन ज
न्मनाथापि मुह्यंत्याम्नायवादिनः॥ ५॥ कर्मण्यकोविदास्तब्धा मूर्खाः पंडितमानिनः॥ वदंति चाटुकान्मूढा यया माध्व्या
गिरोत्सुकाः॥ ६॥ रजसा घोरसंकल्पाः कामुका अहिमन्यवः॥ दांभिका मानिनः पापा विहसंत्यच्युतप्रियान्॥ ७॥

प्रपंचयन्निंदति॥ कर्मणीत्यादिना॥ अकोविदाः यथा बंधकं न भवति तथा कर्त्तुमज्ञाः न त्वभिज्ञान् पृच्छंति॥ यतस्तब्धाः अनम्राः स्त
ब्धत्वे हेतुः॥ यतो मूर्खाः अपि पंडिता वयमिति मानवंतः॥ अतः अपामसोमममृता अभूम॥ अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृ
तं भवति॥ अत्र नोष्णं न च शीतं स्यान्न ग्लानिर्नाप्यरातय इत्यादिकया यया माध्व्या गिरोत्सुकाः संतो मूढास्तया चाटुकान् अप्सरो
भिः सह विहरिष्याम इत्यादि प्रियांश्च ब्दान्वदंति॥ किंच तेषां कर्माभिनिवेशात्कामक्रोधदंभादयो वर्द्धंत इत्याह॥ त्रयेण॥ रजसेति
घोराः अभिचारादिसंकल्पो येषां ते॥ अत्विवन्मन्युर्येषां ते॥ ७॥ श्रीरामचंद्रायनमः॥ श्रीदत्तात्रयायनमः॥ श्रीकृष्णायनमः॥ ७॥

कामुकत्वंप्रपंचयति।।वदंतीति।।उपासिताःस्त्रियोयैस्ते।।नतुबद्धाः।तेमैथुन्यंमिथुनसुखमेवपरंमत्वाऽइत्यादियेषुगृहेषुआशिषोवदंति।।इ
दमद्यमयालब्धमिमंप्राप्स्येमनोरथं।।इदमस्तीदमपिमेभविष्यतिपुनर्धनमित्याद्याकाराःदांभिकत्वंप्रपंचयति।।यजंतीति।।असृष्टान्नवि
धानदक्षिणं।।नसृष्टाःनसंपादिताःअन्नविधानदक्षिणायथातथायजंति।।तदाचवृत्त्यैजीविकार्थंपरंकेवलंपशून्घ्नंति।।अतद्विदःहिंसा॰
दोषाज्ञनाभिज्ञाः।।८।।मानित्वंप्रपंचयति।।श्रियेति।।श्रियाधनादिसंपदाविभूत्याऐश्वर्येणश्रियादिनाजातोयःस्मयोगर्वस्तेनअंधाधी
र्येषांते।।ईश्वरसहितान्सतःअवमन्यंते।।९।।किंचएवंवर्त्तमानास्तेवेदतत्वार्थंस्फुटमपिनजानंतीत्याह।।सर्वेष्विति।।केनरूपेणावस्थि
तंतदाह।।आत्मानमीश्वरंआत्मतयाईश्वरतयाऽवस्थितं।।एवमप्यसंगतामाह।।यथाखं।।पुरुषार्थतामाह।।अभीष्टं।।स्फुटत्वमाह।।

वदंतितेऽन्योन्यमुपासितस्त्रियोगृहेषुमैथुन्यसुखेषुचाशिषः।।यजंत्यसृष्टान्नविधानदक्षिणंवृत्त्यैपरंघ्नंतिपशू
नतद्विदः।।८।।श्रियाविभूत्याऽभिजनेनविद्ययात्यागेनरूपेणबलेनकर्मणा।।जातस्मयेनांधधियःसहेश्वरान्स
तोवमन्यंतिहरेःप्रियान्खलाः।।९।।सर्वेषुशश्वत्तनुभृत्स्ववस्थितंयथाखमात्मानमभीष्टमीश्वरं।।वेदोपगीतं
नचशृण्वतेबुधामनोरथानांप्रवदंतिवार्त्तया।।१०।।लोकेव्यवायामिषमद्यसेवानित्यास्तुजंतोर्नहितत्रचोदना।।

वेदोपगीतंचेति।।ततकुतःयतोमनोरथानांव्यवायामिषमद्यसेवाविषयाणांवार्त्तयाप्रवदंति।।१०।।ननुव्यवायादीनामपिऋतौभा
र्यामुपेयात्।।तत्रोषंभक्षयेदित्यादिनाविहितत्वात्किमेवंनिषेधतेतत्राह।।लोकइति।।व्यवायःस्त्रीसंगः।।नित्याःरागतएवनित्यप्रा
प्ताःजंतोःप्राणिमात्रस्यअतस्तत्रतासुचोदनाविधिर्नास्ति।।ननुऋतौभार्यामुपेयादितिविधिर्दृष्टःसत्यंनत्वयमपूर्वविधिःरा
गतःप्राप्तत्वात्।।किंतुनियमविधिरूपेणरागिणामभ्यनुज्ञामात्रंक्रियते।।तदाह।।व्यवस्थितिरिति।।तेषुविवाहादिषु।।कैःविवा
हयज्ञसुराग्रहैः।।विवाहविषयएवव्यवायःकार्यः।।यज्ञएवाऽमिषसेवा।।सौत्रामण्यांसुराग्रहान्गृह्णातीतिश्रुतेः।।तत्रैवमद्यसेवेति

नियमः क्रियते॥ ननु च नियमपक्षेपि आवश्यकत्वान्नतिं दायुक्तमित्यत आह॥ आसु निवृत्तिरिष्टेति॥ अयं भावः॥ नायं नियमविधिरपि नित्यप्रा
प्तत्वात्॥ अतो निवृत्तिः परिसंख्यैव॥ आसु व्यवायामिषमद्यसेवासु निवृत्तिरिष्टा॥ एकस्यान्यत्र प्राप्तस्यान्यतो निवृत्त्यर्थमेकस्य पुनर्वचनं
परिसंख्या॥ कथं तर्हि व्यवस्थितिरित्युक्तमुच्यते॥ न तावत्परिसंख्याविधिनाऽन्यासां निवृत्तिरुच्यते॥ तथा सति॥ स्वार्थत्यागः परार्थकल्पना
प्राप्तबाधश्चेति दोषत्रयश्रवणात्॥ अतः क्वचित्प्राप्स्यतोऽर्थस्य प्रापणमनर्थकमित्यपूर्वविधिद्वाराऽन्यनिवृत्तिः फलतो भवति॥ न च यथा॥ इ
मामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र रशनालिंगतो गर्दभाश्वाभिधानीरशनाद्यप्राप्स्यतो मंत्रस्यापूर्वविधिद्वारा परि
संख्योच्यते विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति॥ तत्र चान्यत्र च प्राप्तौ परिसंख्या विधीयत इति॥ यथोक्तं तंत्रवार्तिके॥ अप्राप्तविधि
रेवायमतो मंत्रस्य निश्चयः॥ परिसंख्याफलेनोक्ता न विशेषः पुनः श्रुतेरिति॥ क्वचित्तु रागतो नित्यप्राप्तस्यांशांशापूरणलक्षणस्य नियम

व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा॥११॥ धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्र
शांति॥ गृहेषु युंजंति कलेवरस्य मृत्युं न पश्यंति दुरंतवीर्यं॥१२॥ श्रीरामचंद्राय नमः॥ श्रीदत्तात्रयाय नमः॥

फलस्याप्यभावान्नियमविधिद्वारा फलतः परिसंख्या भवति॥ तथा॥ शशकः शल्लको गोधा खड्गी कूर्मः खड्गी च पंचमः॥ पंच पंचनखा भक्ष्या इति
नखानरौ पंच पंचनखान भक्ष्याइति॥ तथात्र रागतो नित्यप्राप्तवत्प्राप्तस्य व्यवायादेर्विवाहादिनियमेनाभ्यनुज्ञाद्वारा परिसंख्यैवेति
ननु यद्वा॥ अभ्यनुज्ञामात्रमेव भवेत्तर्हि॥ ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति॥ घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इत्या
दि दोषश्रवणं न स्यात्॥ नैष दोषः॥ मनसि कामे सत्यपि तस्यामरुच्या द्वेषादिना च तामनुपगतो दोषश्रवणोपपन्नेरिति सर्वमन
वद्यमिति अर्थः॥११॥ तदेवं व्यवायादिमनोरथाकुलितत्वात्सर्वीयमात्मानं न शृण्वंतीत्युक्तं॥ इदानीं धनस्यापि धर्मद्वारा परमात्मप्रापक
स्य दृष्टोपभोगार्थविनियोगात्तदात्मज्ञानगंधोपि नेत्याह॥ धनं चेति॥ धर्म एवैकं फलं यस्य तत्॥ कुतः यतो धर्मात् ज्ञानं सविज्ञानमपरो
क्षज्ञानसहितं तद्धं परोक्षज्ञानं भवति॥ कथंभूतं॥ अनुप्रशांति॥ अनु अनंतरमेव प्रकृष्टा शांतिः निर्वाणलक्षणा यस्मात्तत्॥ ए
वंभूतं गृहेषु देहाद्यर्थं युंजंति॥१२॥१२॥

किंचव्यवस्थयापिव्यवायाद्यभ्यनुज्ञामात्रंयथेष्टं॥अपितन्यथैवेत्याह॥यदिति॥यद्यस्मात्सुरायाःघ्राणभक्षःअवघ्राणंसएवविहितःनतुपानं॥तथापशोर
प्यालंभनमेवविहितं॥नहिंसा॥अयमर्थः॥देवतोद्देशेनयत्पशुहननंतदालभनं॥वायव्यंश्वेतमालभेतेत्यादिश्रुतेः॥नतुहिंसा॥यावेदविहिताहिंसान
साहिंसेतिकीर्त्तितेतिवचनात्॥भक्षणोद्देशेनक्रियमाणंलौकिकवद्धननवद्धिंसैव॥अत्रआलभनमेवविहितंनहिंसा॥अतोनयथेष्टंभक्षणाभ्यनु
ज्ञाइत्थंव्यवायेपिप्रजयानिमित्तभूतया॥नतुरत्यै॥अतोमनोरथवादिनइमंविशुद्धंस्वधर्मंनविदुरित्यर्थः॥१३॥एवंभगवत्पराङ्मुखानांबहुदोषतां
प्रपंच्यतन्निष्ठांप्रपंचयति॥पंचभिः॥येत्विति॥अनेवंविदःतत्त्वएवंधर्ममविदंतः॥येतुविस्रब्धाःनिःशंकाःअनेनमनोरथोभविष्यतीतिविश्वस्तावातद्व

यत्घ्राणभक्षोविहितःसुरायास्तथापशोरालभनंनहिंसा॥एवंव्यवायःप्रजयानरत्याइमंविशुद्धंनविदुःस्वधर्मं॥१३॥
येत्वनेवंविदोऽसंतःस्तब्धाःसदभिमानिनः॥पशून्द्रुह्यंतिविस्रब्धाःप्रेत्यखादंतितेचतान्॥१४॥द्विषंतःपरकायेषुस्वात्मा
नंहरिमीश्वरं॥मृतकेसानुबंधेऽस्मिन्बद्धस्नेहाःपतंत्यधः॥१५॥येकैवल्यमसंप्राप्तायेचातीताश्चमूढतां॥त्रैवर्गिकाह्य
क्षणिकाआत्मानंघातयंतिते॥१६॥एतआत्महनोऽशांताअज्ञानेज्ञानमानिनः॥सीदंत्यकृतकृत्यावैकालध्वस्तमनो
रथाः॥१७॥हित्वात्यायासरचितागृहापत्यसुहृच्छ्रियः॥तमोविशंत्यनिच्छंतोवासुदेवपराङ्मुखाः॥१८॥७ ७ ७ ७

ग

नीतंनपोषणेनवातैःपशुभिर्विश्वस्ताःतेचपरत्रप्रेत्यअमुत्रतान्खादंति॥मांसभक्षयितामुत्रयस्यमांसमिहाद्म्यहं॥एतन्मांसस्यमांस
त्वंप्रवदंतिमनीषिणइतिवचनात्॥१४॥अभिचारादिनाद्विषंतः॥मृतकेदेहेसानुबंधेपुत्रादिसहिते॥१५॥अज्ञास्तत्त्वज्ञैरनुकंपितास्तत्
तितत्त्वज्ञास्तुस्वतःयेतुनासंतमज्ञानतत्त्वज्ञास्तेऽन्तरालवर्त्तिनःपतंतीत्याह॥यइति॥कैवल्यंतत्त्वज्ञानमसंप्राप्ताःअत्रहेतुः॥त्रिवर्गप्रधा
नाःअक्षणिकाःउपशांतिक्षणरहिताः॥देहादिष्वेवबुद्धयोवा॥स्वयमेवात्मानंघातयंति॥१६॥एतदेवाह॥एतदिति॥आत्महनःआत्मापह्न
वकर्तारःअज्ञानेकर्मणि॥तथाचश्रुतिः॥असुर्यानामतेलोकाअंधेनतमसावृताः॥तांस्तेप्रेत्यापिगच्छंतियेकेचात्महनोजनाःइति॥१७॥याः
गृहापत्यसुहृच्छ्रियस्ताःहित्वा॥१८॥७॥

तदेवं भगवद्भक्तिरेव कर्त्तव्येति स्थिते तत्रापि विशेषं पृच्छति। कस्मिन्काल इति। किंवर्णः कीदृग्वर्णवान्॥ कीदृशः कीदृशाकारः केन वा नाम्ना केन वा विधिना॥१९॥ एषु कृतादिकालेषु नानाप्रकारस्वर्णाभिधाकारा यस्य सः॥ नानैव विधिना विविधेनैव कर्मणा॥२०॥ तदेव वर्णादिचतुष्टयमाह। कृत इत्यादिना। कृष्णाजिनादीन् बिभ्रदिति। ब्रह्मचारिवेषो दर्शितः॥२१॥ तपसा ध्यानेन॥२२॥२३॥ त्रिगुणा दीक्षाभूता मेखला यस्य सः॥

॥राजोवाच॥ कस्मिन्काले स भगवान् किंवर्णः कीदृशो नृभिः॥ नाम्ना वा केन विधिना पूज्यते तदिहोच्यतां॥१९॥ करभाजन उवाच॥ कृतं त्रेता द्वापरं च कलिरित्येषु केशवः॥ नानावर्णाभिधाकारो नानैव विधिनेज्यते॥२०॥ कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलांबरः॥ कृष्णाजिनोपवीताक्षान् बिभ्रद्दंडकमंडलू॥२१॥ मनुष्यास्तु तदा शांता निर्वैराः सुहृदः समाः॥ यजंति तपसा देवं शमेन च दमेन च॥२२॥ हंसः सुपर्णो वैकुंठो धर्मो योगेश्वरोऽमलः॥ ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते॥२३॥ त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः॥ हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः॥२४॥ तं तदा मनुजा देवं सर्वदेवमयं हरिं॥ यजंति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः॥२५॥ विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः॥ वृषाकपिर्जयंतश्च उरुगाय इतीर्यते॥२६॥ द्वापरे भगवान् श्यामः पीतवासा निजायुधः॥ श्रीवत्सादिभिरंकैश्च लक्षणैरुपलक्षितः॥

त्रय्यात्मा मूर्त्तिः। हिरण्यकेशः पिंगकेशः॥२४॥ त्रय्या विद्यया वेदत्रयोक्तकर्मभिः॥२५॥ पृश्निगर्भस्तस्याः पुत्रः वृषाकपिः स्मृतः॥ स तु वर्षकामान् भक्तानां कंपयति क्लेशानिति॥ तथा जयस्येव जयंतः॥२६॥ श्यामः अतसीपुष्पसंकाशः॥ निजानि अस्त्राणि आयुधानि शंखचक्रादीनि यस्य सः॥ श्रीवत्सो नाम वक्षसः दक्षिणभागे रोम प्रदक्षिणावर्त्तः सव्यादिर्येषां करचरणादिगतपद्मादीनां तैः पदैः अंकैश्चिह्नैः लक्षणैः वाह्यैः कौस्तुभादिभिः॥२७॥

महाराजोपलक्षणंछत्रचामरादिभिर्युक्तं।।वेदतंत्राभ्यांवैदिकेनागमिकेनचमार्गेणयजंति।।पूजयंति।।परंईश्वरंजिज्ञासवुमिछवः।।२८।।नामान्याह।।
नमस्तइति।।२९।।३०।।नानातंत्रविधानेनेति।।कलौतंत्रमार्गस्यप्राधान्यंदर्शयति।।३१।।रूक्षतांव्यावर्त्तयति।।त्विषाकांत्याअकृष्णःइंद्रनील
मणिवदुज्वलं।।यद्वा।।त्विषाकृष्णंकृष्णावतारंअनेनकलौकृष्णावतारस्यप्राधान्यंदर्शितमिति।।अंगानिहृदयादीनि।।उपांगानिकौस्तुभादीनि।
अस्त्राणिसुदर्शनादीनि।।पार्षदाःसुनंदादयः।तत्सहितं।।यज्ञैःअर्चनैःसंकीर्त्तनंनामोच्चारणलक्षणं।।स्तुतिश्चतत्प्रधानैः।।सुमेधसोविवे
किनः।।३२।।स्तुतिमाह।।ध्येयमिति।।हेप्रणतपालहेमहापुरुषतेचरणारविंदंवंदे।।कथंभूतं।।ध्येयंध्यातुंयोग्यं।।सदेतिसर्वत्रसंबध्यते

तंतदापुरुषंमर्त्यामहाराजोपलक्षणं।।यजंतिवेदतंत्राभ्यांपरंजिज्ञासवोनृप।।२८।।नमस्तेवासुदेवायनमःसंक
र्षणायच।।प्रद्युम्नायानिरुद्धायतुभ्यंभगवतेनमः।।२९।।नारायणायऋषयेपुरुषायमहात्मने।।विश्वेश्वरायवि
श्वायसर्वभूतात्मनेनमः।।३०।।इतिद्वापरउर्वीशस्तुवंतिजगदीश्वरं।।नानातंत्रविधानेनकलावपियथाशृणु।।३१।।
कृष्णवर्णंत्विषाकृष्णंसांगोपांगास्त्रपार्षदं।।यज्ञैःसंकीर्त्तनप्रायैर्यजंतिहिसुमेधसः।।३२।।ध्येयंसदापरिभवघ्नम
भीष्टदोहंतीर्थास्पदंशिवविरिंचिनुतंशरण्यं।।भृत्यार्त्तिहंप्रणतपालभवाब्धिपोतंवंदेमहापुरुषतेचरणारविंदं।।३३।।

ध्येयत्वेहेतवः।।इंद्रियकुटुंबादिभिःयःपरिभवस्तिरस्कारःतंहंतीतितथातत्।।किंच।।अभीष्टदोहंमनोरथपूरकं।।किंच।।तीर्थास्प
दं।।गंगाद्याश्रयत्वेनपरमपावनं।।शिवविरिंचिभ्यांनुतस्तुतंमहत्तमं।।ननुकृतार्थाविवकिमर्थंताभ्यांनुतंतत्राह।।शरण्यं।।आश्रयण
योग्यं।।सुखात्मकमित्यर्थः।।तर्हिब्रह्मादिस्तुतंसंप्राकृतस्यकथंगोचरंस्यात्।।न।।भृत्यार्त्तिहं।।यस्यकस्यभृत्यमात्रस्यार्त्तिहंतृ।।नके
वलमागंतुकपापमार्त्तिहंति।।किंतुभवाब्धिपोतंसंसारार्णवतारकंच।।३३।।तदानींस्वयमाप्तकामत्वान्निरपेक्षोभक्तार्थंसापेक्षतांद
र्शयन्श्रीरामचंद्रंस्तौति।।त्यक्त्वेति।।सुदुस्त्यजासुरेप्सिताराज्यलक्ष्मीस्तांत्यक्त्वा।।यदितियद्यर्थः।।यः।।अरण्यमगात्।।रांज्यवैक

स्यदर्शनेनधर्मिष्ठः कुतः आर्यस्यगुरोर्ब्राह्मणस्यवचसा।। किंचएवंराज्यंयस्क्लापिभक्तुवात्मस्येनदयितायासीतायाईप्सितंमायामृगंस्वर्णा
कारंयोन्वधावत्तस्यभगवतः चरणारविंदंवंदे। यद्वाहेधर्मिष्ठेतिसंबोधनं।। तथाप्यविवक्षितत्वादार्थपदेनसंधिर्नभवति।। तथायद्गा
दितिचरणारविंदमेवोच्यते। यश्चमायामृगमन्वधावत्तत्पदारविंदंवंदेइत्यन्वयः।। अन्यत्समानं।।३४।। युगानुरूपाभ्यांनामरूपाभ्यां।।
३५।। एषुचतुर्युगेषुकलिरेवश्रेष्ठइत्याह। कलिमिति। गुणज्ञाःकलेर्गुणंजानंतियेते। ननुदोषाणांबहुत्वात्कथंसभाजयंतितत्राह। सा
रभागिनः गुणानांरसग्राहिणः।। कोऽसौगुणस्तमाह। यत्रेति। तदुक्तं। ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेऽर्चयन्। यदाप्नोतितदाप्नो

त्यक्त्वासुदुस्त्यजसुरेप्सितराज्यलक्ष्मींधर्मिष्ठआर्यवचसायदगादरण्यं। मायामृगंदयितयेप्सितमन्वधावद्वंदेमहापुरुषते
चरणारविंदं।३४। एवंयुगानुरूपाभ्यांभगवान्युगवर्त्तिभिः। मनुजैरिज्यतेराजन्श्रेयसामीश्वरोहरिः।३५। कलिंसभाजयं
त्यार्यागुणज्ञाःसारभागिनः। यत्रसंकीर्त्तनेनैवसर्वस्वार्थोऽभिलभ्यते।३६। नह्यतःपरमोलाभोदेहिनांभ्राम्यतामिह।
यतोविंदेतपरमांशांतिंनश्यतिसंसृतिः।३७। घोरेकलियुगेप्राप्तेसर्वधर्मविवर्जिते। वासुदेवपरामर्त्यास्तेकृतार्थान
संशयः।३८। तेसभाग्यामनुष्येषुकृतार्थानृपनिश्चितं। स्मरंतःस्मारयंतश्चान्हरेर्नामकलौयुगे।३९। कृतादिषुप्रजा
राजन्कलाविच्छंतिसंभवं। कलौखलुभविष्यंतिनारायणपरायणाः।४०। क्वचित्क्वचिन्महाराजद्रविडेषुचभूरिशः। ताम्र

तिकलौसंकीर्त्तनकेवलमिति।।३६।। तस्मात्कलौअतःअस्मात्संकीर्त्तनात्परमोलाभोनास्ति।। यतःसंकीर्त्तनात्।।३७।। किंच।। कृतादिष्विति।।
३८।। अमलाशयाःसंतःप्रायशोभगवतिभक्ताःभवंति।।४०।। भक्तस्यविधिनिषेधनिवृत्तेःकृतकृत्यतामाह। देवर्षिइति। आप्ताःपोष्यकु
टुंबिनःइतरेदेवादयःपंचयज्ञदेवताःएतेषांयथान्यःभक्तःऋणीस्यात्अतएवतेषांकिंकरःतद्दर्थंनित्यंपंचयज्ञादिकर्त्ता।। तथास्म
त्तिः।। हीनयातिपरिक्षीणमप्यार्थंकर्मकारयेदिति। अयंतुनतथा। कोऽसौयःसर्वभावेनश्रीमुकुंदंशरणंगतःकर्त्तकंसंपरिहृत्य।। यद्वा।। क
र्त्तंभेदंपरिहृत्य।। कर्त्तीछेदनतःयस्मात्।। वासुदेवःसर्वमितिबुद्धस्यर्थः।।४१।।

४२॥४३॥विहितकर्मनिवृत्तिमुक्त्वानिषिद्धनिमित्तप्रायश्चित्तनिवृत्तिमाह॥स्वपादमूलमिति॥सक्तःअन्यस्मिन्देहादौदेवतांतरेवाभावोयेनअतएवतस्य
विकर्मणिप्रवृत्तिर्नसंभवति॥यच्चकथंचित्प्रमादिनाउत्पत्तितंभवतुतदपिहरिर्धुनोति॥ननुयमस्तन्तमन्येततत्राह॥परेशः॥ननुचश्रुतिस्मृतममैवा
ज्ञेतिभगवद्वचनात्॥स्वाज्ञानंकथंसहेततत्राह॥प्रियस्य॥ननुनायंपापक्षयार्थंभजतेतत्राह॥हृदिसन्निविष्टः॥नहिवस्तुशक्तिरर्थितामपेक्षते
इत्यर्थः॥४४॥जायंतेयान्जयंसाःपुत्रान्॥४५॥उपातिष्ठतअनुतिष्ठत्॥४६॥निःसंगोभूत्वा॥४७॥शास्त्रप्रक्रियेयमुक्तायुवांतुस्वतएवकृता
कावेरीचमहापुण्याप्रतीचीसुरवर्त्मगा॥येपिबंतिजलंतासांमनुजामनुजेश्वर॥४२॥प्रायोभक्ताभगवतिवासुदेवेऽमलाशया
देवर्षिभूतात्पनृणांपितृणांनकिंकरोनायमृणीचराजन्॥सर्वात्मनायःशरणंशरण्यंगतोमुकुंदंपरिहृत्यकर्त्तं॥४३॥स्वपा
दमूलंभजतःप्रियस्यत्यक्तान्यभावस्यहरिःपरेशः॥विकर्मयच्चोत्पतितंकथंचिद्धुनोतिसर्वंहृदिसन्निविष्टः॥४४॥श्री
नारदउवाच॥धर्मान्भागवतानित्थंश्रुत्वासमिथिलेश्वरः॥जायंतेयान्मुनीन्प्रीतःसोपाध्यायोह्यपूजयत्॥४५॥ततोंतर्द
धिरेसिद्धाःसर्वलोकस्यपश्यतः॥राजाधर्मानुपातिष्ठन्नवापपरमांगतिं॥४६॥त्वमप्येतान्महाभागधर्मान्भागवतांश्रुता
न्॥आस्थितःश्रद्धयायुक्तोनिःसंगोयास्यसेपरं॥४७॥युवयोःखलुदंपत्योर्यशसापूरितंजगत्॥पुत्रतामगमद्यद्वांभगवानी
श्वरोहरिः॥४८॥दर्शनालिंगनालापैःशयनासनभोजनैः॥आत्मावांपावितःकृष्णेपुत्रस्नेहंप्रकुर्वतोः॥४९॥ ७२ ७
र्थाविसाह॥युवयोरिति॥वांयुवयो॥४८॥नचसर्वकर्मार्पणादिभागवतधर्मैरन्येषामिवयुवयोःसत्वशुद्धिरापादनीयापुत्रोपलालनेनै
वभागवतधर्मसर्वस्वनिष्पन्नरित्याह॥दर्शनेति॥कृष्णेपुत्रस्नेहंप्रकुर्वतोर्वातिस्यदर्शनादिनाआत्मापावितःशोधितः॥एवमेववकेमुसत्या
येनस्फुटयति॥४९॥श्रीरामचंद्रायनमः॥श्रीकृष्णायनमः॥श्रीदत्तात्रेयायनमः॥श्रीदिगंबरायनमः॥श्रीकृष्णायपरमात्मनेनमः॥७२

वैरेणेति यं त्र्यं यं नासनादौ वैरेणापि ध्यायंतः अस्य गतिं विलासाद्यैः आहृतधियः तत्तदाकारा धीर्येषां ते तत्साम्यमापुः किं पुनर्वक्तव्यमनुरक्त-
धियां तत्साम्यं भवतीति भावः ॥५०॥ ननु पुत्रस्नेहश्चेन्मोक्षहेतुस्तर्हि सर्वे मुच्येरन् तत्राह ॥ अपत्यमिति बुद्धिं मा कृथाः ॥ इडागमश्छांदसः ॥५१॥
ननु कथमीश्वरो मानुषः ख्यातः कथं वा तस्य विश्वस्य सृष्ट्यादिकर्तुः पूतनाशोषणादिकर्माश्चर्यमिव निरूप्यते तत्राह ॥ भूभाररूपा असुरा
एव राजन्यास्तेषां हंतवे ॥ तान् हंतुं ॥ निर्वृतये मोक्षाय ॥५२॥ इह अस्मिन्नेव देहे शमलं मोहं विधूय ब्रह्मत्वाय कल्पते ॥५३॥ इति एकादशे पंचमः

वैरेण यं नृपतयः शिशुपालपौंड्रशाल्वादयो गतिविलासविलोकनाद्यैः ॥ ध्यायंत आकृतधियः शयनासनादौ तत्साम्यमा-
पुरनुरक्तधियां पुनः किं ॥५०॥ मापत्यबुद्धिमकृथाः कृष्णे सर्वात्मनीश्वरे ॥ मायामनुष्यभावेन गूढैश्वर्ये परेऽव्यये ॥५१॥
भूभारासुरराजन्यहंतवे गुप्तये सतां ॥ अवतीर्णस्य निर्वृत्यै यशो लोके वितन्यते ॥५२॥ श्रीशुक उवाच ॥ एतच्छ्रुत्वा महाभा-
गो वसुदेवोऽतिविस्मितः ॥ देवकी च महाभागा जहतुर्मोहमात्मनः ॥५३॥ इतिहासमिमं पुण्यं धारयेद्यः समाहितः ॥ स विधू-
येह शमलं ब्रह्मभूयाय कल्पते ॥५४॥ इति श्रीभागवते महापुराणे एकादशस्कंधे नारदवसुदेवसंवादे पंचमोऽध्यायः ॥५॥
॥ श्रीशुक उवाच ॥ अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् ॥ भवश्च भूतभव्येशो ययौ भूतगणैर्वृतः ॥१॥ इंद्रो मरुद्भि-
र्भगवानादित्या वसवोऽश्विनौ ॥ ऋभवोंऽगिरसो रुद्रा विश्वे साध्याश्च देवताः ॥२॥ गंधर्वाप्सरसो नागाः सिद्धचारणगु-
ह्यकाः ॥ ऋषयः पितरश्चैव सविद्याधरकिन्नराः ॥३॥ द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृक्षवः ॥ वपुषा येन भगवान्नरा

५॥ षष्ठे ब्रह्मादिभिः स्तुत्वा गंतुं विज्ञापितं हरिं ॥ उद्धवः प्रार्थयामास स्वधाम नयमामिति ॥१॥ अतः परमतिविस्तारेणात्मविद्यां निरूप-
यिष्यन् तत्प्रस्तावमाह ॥ अथेति ॥ आत्मजैः सनकादिभिः अभ्यगात् द्वारकामिति चतुर्थेनान्वयः ॥१॥२॥३॥ तेषामुपेन्द्रादिरूपं भगवंतं
नित्यं पश्यतां केयमिति दिदृक्षा अत आह ॥ वपुषेति ॥ येन वपुषा नरलोकमनोरमः सन् सर्वलोकेषु यशो वितेने तदपि सुंदरं वपुर्दिदृ-

व्यचक्षंतअपश्यन्॥५॥स्वर्गोद्यानस्थैर्माल्यैः॥चित्राणिभंगस्वलाबंधप्रायाणिपदानिअर्थाश्चयासुताभिर्गीर्भिः॥६॥बुद्धींद्रियादिभिर्दर्शनादिनाप्राणेनच
बलेनहेतुनादंडवत्प्रणिपातेननताःवयंनमस्कृतवंतः॥स्मेतिविस्मये॥यथाहुः॥दोर्भ्यांपद्भ्यांजानुभ्यामुरसाशिरसादृशा॥मनसावचसाचेति
प्रणामोष्टांगईरितः॥२॥स्मशब्दोक्तविस्मयायविशेषणं॥कर्ममयाद्रूपाशान्मुमुक्षुभिःभावयुक्तैरपियत्केवलंअंतर्हृदिविचिंत्यतेनतुदृश्यते
तद्वयंनताः॥अहोभाग्यमित्यर्थः॥७॥ननुममापिदृष्टादृष्टकर्मकारणात्कुतोमत्पदारविंदंकर्मपाशान्मुमुक्षुभिश्चिंत्यतेअतआहुः॥त्वमिति॥हेअ
जित॥आत्मस्थंइदानींतनमिदमत्संकर्म॥त्वंव्यक्तंमहदादिप्रपंचंसृजसिपालयसिसंहरसिच॥तदप्यात्मन्येवनपृथक्॥दुर्विभाव्यमनसाः

यशोवितनेलोकेषुसर्वलोकमलापहं॥तस्यांविभ्राजमानायांसमृद्धायांमहर्द्धिभिः॥व्यचक्षतावितृप्ताक्षाःकृष्णमद्भुतदर्श
नं॥५॥स्वर्गोद्यानोपगैर्माल्यैःछादयंतोयदूत्तमं॥गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरं॥६॥देवाऊचुः॥नताःस्मतेनाथप
दारविंदंबुद्धींद्रियप्राणमनोवचोभिः॥यच्चिंत्यतेंऽतर्हृदिभावयुक्तैर्मुमुक्षुभिःकर्ममयोरुपाशात्॥७॥त्वंमाययात्रिगुण
यात्मनिदुर्विभाव्यंव्यक्तंसृजस्यवसिलुंपसितद्गुणस्थः॥नैतैर्भवानजितकर्मभिरज्यतेवैयत्स्वेसुखेऽव्यवहितेऽभिरतोनव
द्यः॥८॥शुद्धिर्नृणांनतुतथेड्यदुराशयानांविद्याश्रुताध्ययनदानतपःक्रियाभिः॥सत्वात्मनामृषभतेयशसिप्रवृद्धसच्छ्रद्धया

न्यैरप्यवितर्क्यतद्गुणस्थःतस्याःमायायाःगुणेषुनियंतृत्वेनस्थितः॥अथचएतैःकर्मभिःभवान्नाज्यतेनलिप्यते॥कुतःयोभवान्अनवद्यःरागा
दिरहितःयतःस्वेआत्मरूपेसुखेअव्यवहितेअभिरतः॥अतस्त्वंकर्मकुर्वन्नप्यात्मारामः॥परमेश्वरइतिमुमुक्षुभिश्चिंत्यतइत्यर्थः॥८॥ननुआ
त्मारामस्यकिंकर्मकरणेनअतआहुः॥शुद्धिरिति॥हेईड्यऋषभदुराशयानांरागिणांविद्याश्रुतउपासनादिभिःतथाशुद्धिःनभवति॥सत्वात्मनां
सतांयशसिश्रवणेनसंभृतयापुष्टयाअभिवृद्धयासच्छ्रद्धयायथास्यात्तथापरमपावनस्ययशसोऽवितानायतवकर्माचरणमितिभावः॥
तदेवंयशःश्रेष्ठंवशुद्धिहेतुः॥अस्माभिस्तुभवतस्तवांघ्रिर्दृष्टः॥अतस्तवांघ्रिर्नोऽस्माकंअशुभाशयानांविषयवासनानांधूमकेतुःतद्वह

कः स्यात् ॥ कथंभूतोयः क्षेमायमोक्षायमुनिभिर्मुमुक्षुभिः प्रेमार्द्रहृदाउह्यमानः चिंत्यमानमानः यश्चसात्वतैर्भक्तैः समविभूतयेसमानैश्व
र्यायवासुदेवादिव्यूहैरर्चितः तेषुकेश्चिदात्मविद्भिर्धीरैः स्वरतिक्रमायस्वर्गमतिक्रम्यवैकुंठप्राप्तयेसवनशः त्रिकालमर्चितः ॥१०॥ किंच ॥ प्रयत
पाणिभिः संयतहस्तैः हविर्गृहीत्वाअध्वराग्नौआहवनीयाग्नौयाज्ञिकैर्यश्चिंसते ॥ ननुयस्यैदेवतायैहविर्गृहीतंस्यात् तांदेवतांमनसाध्यायेत्
वषट्करिष्यन्तिइतिवचनात्तत्तद्देवताश्चिंसतेअतआहु ॥ त्रय्यानिरुक्तेनविधिनाइंद्रादिरूपेणैवयज्ञपुरुषश्चिंसतेइत्यर्थः ॥ उतकिंचयश्चअध्या
त्मयोगेआत्माधिकारेयोगेयोगिभिरपिआत्मनस्तवमायाअणिमादिस्तांजिज्ञासुभिस्तत्तत्कामैर्यश्चिंत्यते ॥ परमभागवतैस्तुमुक्तैर्यः प
रीष्टः सर्वतः पूजितः सतवांघ्रिर्नोऽस्माकंअशुभाशयधूमकेतुः स्यादितिपूर्वेणान्वयः ॥१२॥ एतेषांचमुनिसात्वतादीनांषण्णांसेवकानां

स्यान्नः स्तवांघ्रिरशुभाशयधूमकेतुः क्षेमाययोमुनिभिरार्द्रहृदोह्यमानः । यः सात्वतैः समविभूतयआत्मवद्भिर्व्यूहेऽर्चि
तः सवनशः स्वरतिक्रमाय ॥ २० ॥ यश्चिंसतेप्रयतपाणिभिरध्वराग्नौत्रय्यानिरुक्तविधिनेशहविर्गृहीत्वा । अध्यात्मयोगउ
पयोगिभिरात्ममायांजिज्ञासुभिः परमभागवतैः परीष्टः ॥ २१ ॥ पर्य्युष्टयातवविभोवनमालयेयंसंस्पर्द्धिनीभगवतीप्रति
पत्निवच्छ्रीः । यः सुप्रणीतममुयाऽर्हणमाददन्नोभूयात्सदांऽघ्रिरशुभाशयधूमकेतुः ॥ २२ ॥ श्रीरामकृष्णायनमः ॥ छ ॥

मध्येपरमभागवतेषुलक्ष्म्याअपितवप्रीतिरधिकेतिस्तुवंति ॥ पर्युष्टयेति ॥ इडाभावश्छांदसः ॥ अहंयत्रवसामितत्रैववक्षसिपर्युषितापी
यंवसतीतिप्रतिपत्निवत्श्रीः स्पर्द्धमानाभवति ॥ तथापीतितांस्पर्द्धमानांश्रियंअनादृत्ययोभवान्पर्युषितयापिअमुयावनमालयाभक्तैरर्पि
तयमितिप्रीत्यासुप्रणीतंसुष्ठुसंपादितंयथाभवतितथाऽर्हणंपूजामाददत्स्वीकृतवान् ॥ सुप्रणीतमित्यर्हणविशेषणमितिवा ॥ तस्यतवांऽ
घ्रिर्नोऽस्माकंअशुभाशयधूमकेतुर्भूयात् ॥ यद्वायोंऽघ्रिरमुयासुप्रणीतमर्हणमाददत्सनोऽशुभाशयधूमकेतुर्भूयादित्यन्वयः ॥ अथैवं
संबंधः ॥ एतेभ्योध्यानार्चनादिनिष्ठेभ्योपित्वयत्रास्मिप्रवृद्धसंघ्रष्ठावंतएवकृतार्थाः भवंति ॥ यतः प्रियस्यादिसाहु ॥ पर्य्युष्टया ॥ वत्राकांता
वियस्मात् ॥ परितः सर्वांगेउष्टयाकांतयात्रोभितयावनमालयावक्षसिएकदेशेवर्तमानाश्रीः संस्पर्द्धमानाभवति ॥ तथापिआम्नायमधुव्रतैः

त्वच्चरणस्य भक्तपक्षपातः प्रसिद्ध एवेति स्तुवंतः प्रार्थयंते॥ केतुरिति॥ बलिबंधने त्रिभिर्विक्रमैर्युतः तत्र द्वितीयविक्रमे सत्यलोकं गतस्तव पादः केतुः

आसृध्वितो विजयध्वज इव तत्संपादयन् त्रिपतत्पताकः त्रिधा पतंती त्रिषु लोकेषु वा पतंती गंगा पताका यस्य सः॥ तथाऽसुरदेवचम्वोस्तत्सेनयो

रभयोर्भयाभयकरः साधुषु सुरेषु स्वर्गाय॥ स्वर्गे षु असुरेषु खलराय अधोगमनाय॥ एवं केतुरूपस्ते पादः सः भजतां नः अघं पुनातु शो

धयतु॥ अघादिति पाठे भजतां नः इति कर्मणि षष्ठी॥ अघाद्भजतोऽस्मान् पुनात्विति॥ तथा च श्रुतिः॥ चरणं पवित्रं विततं पुराणं येन पूतस्त

रति दुष्कृतानि॥ तेन पवित्रेण शुद्धेन पूताऽतिपाप्मानमरातिं तरेम लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत्॥ अमृतस्य धारा

बहुधा दोहमानं चरणं नो लोके सुधितां दधातु॥१२॥ ननु युद्धे देवाऽसुरादयः परस्परं जयंति जीयंते वा किमहं तत्रेत्यत आहुः॥ नसीति॥ मिथुः

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽसुरदेवचम्वोः॥ स्वर्गाय साधुषु खलेष्वितराय भूमन् पादः पुना

तु भगवन् भजतामघं नः॥२३॥ नस्योतगाव इव यस्य वशे भवंति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः॥ कालस्य ते प्रकृतिपूरु

षयोः परस्य शं नस्तनोतु चरणः पुरुषोत्तमस्य॥२४॥ अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि का

लमाहुः॥ सोऽयं त्रिणाभिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वं॥२५॥ श्रीदत्तात्रयायनमः॥ ५१

मिथ्यः अर्द्यमाना युद्धादिभिः पीड्यमानाः ब्रह्मादयोपि यस्य तव वशे भवंति॥ न तु जयपराजये स्वतंत्राः॥ गाव इव नसि नासिकायां ऊताः ना

सिकायामाविद्धाः प्रोताः गावो बलिवर्दा इव॥ कुतः कालस्य कलयितुः प्रवर्त्तकस्य तदेव कुतः प्रकृतिपुरुषयोरपि परस्य पुरुषोत्तमस्य पा

दो नः शं तनोतु॥२४॥ प्रकृतिपुरुषाभ्यां परत्वमुपपादयंतः कालत्वेन पुरुषोत्तमत्वमाहुः॥ अस्येति॥ अस्य जगतः उदयादीनां हेतुरसि॥ कु

तः॥ अव्यक्तं प्रकृतिः जीवः पुरुषः महान् महत्तत्वं तेषां कालं नियंतारं त्वामाहुः॥ अक्षरात्परतः परः इति श्रुतेः॥ महतः परमव्यक्तमव्यक्तात्पु

रुषः परः॥ पुरुषान्नापरं किंचित्सा काष्ठा सा परा गतिरिति साधाः स्मृतयः॥ किंच॥ अयं संवत्सरात्मकोऽयं कालः त्रिणाभिः त्रीणि चातुर्मास्यानि ना

भयो यस्य सोपि त्वमेव अतस्त्वमुत्तमपुरुष इति॥ तथा च गीतासु॥ यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः॥ अतोस्मि लोके वेदे च प्रथितः

त्वमेव प्रकृत्यादिविकारास्तेषामादिहेतुरित्युक्तं ॥ तत्केन प्रकारेणतदाह ॥ यत्त इति ॥ पुरुषो वीर्यं शक्तिं समधिगम्य प्राप्य यया मायया सह महान्तं धत्ते ॥ कमिव ॥ अस्य विश्वस्य गर्भमिव सोयं महान्तत्त्वं तयैव मायया ऽनुगतः आत्मनः सकाशात् अंडकोशं ससर्ज ॥ त्वया ऽनुगत इति पाठेपि तदा मायया त्वया अधिष्ठितः सन्निति ॥२६॥ ननु एवंभूतमीश्वरस्त्वं मम कुतोऽवगतं तदाह ॥ तदिति ॥ तत्तस्मात्तस्थुषः स्थावरस्य जगतः जंगमस्य च भगवान्त्वं धीशः पतयस्मात् मायया उत्थाउज्जृंभिताया गुणविक्रिया इंद्रियवृत्तिः तयोपनीतान् अर्थान् विषयान् जुषमाणो हे हृषीकपते न लिप्तस्त्वं ॥ ये त्वन्ये जीवाः योगिनो वा स्वतः परिहृतादपि अविद्यमानात् त्यक्ताद्वा विषयजोषणाद्बिभ्यति वासनामात्रेण बध्यंत इत्यर्थः ॥२७॥ अलिप्तत्वमेवा

त्वत्तः पुमान्समधिगम्य ययास्य वीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः ॥ सोयं तयानुगत आत्मन आंडकोशं हैमं ससर्ज बहि

रावरणैरुपेतं ॥२५॥ तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणविक्रिययोपनीतान् ॥ अर्थान् जुषन्नपि हृषीकपते

न लिप्तो येऽन्ये स्वतः परिहृतादपि बिभ्यति स्म ॥२७॥ स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ प

त्न्यस्तु षोडशसहस्रमनंगबाणैर्यस्येंद्रियं विमथितुं करणैर्न विभ्व्यः ॥२८॥ विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पाद

वनेजसरितः शमलानि हंतुं ॥ आनुश्रवं श्रुतिभिरंघ्रिजमंगसंगैस्तीर्थद्वयं शुचिषदस्त उपस्पृशंति ॥२९॥ ध

हुः ॥ स्मायेति ॥ स्मायावलोको मंदस्मितोऽवलोकः ॥ तस्य लवः कटाक्षस्तेन दर्शितो भावोऽभिप्रायः तेन मनोहारी यत् भ्रूमंडलं तेन प्रहि

ताः ये सौरताः मंत्राः तैः शौंडैः प्रगल्भैः अनंगबाणैः संमोहनैः करणैः कामकलाभिः षोडशसहस्रपत्न्यः यस्येंद्रियं मनः विमथितुं क्षो

भयितुं न विभ्व्यः न समर्थाः स भवान्न लिप्त इति पूर्वेणान्वयः ॥२८॥ तस्मात्तव अमृतरूपाः याः कथाः तदेव उदकं वहंतीति तथा कीर्तिन

द्यः तथा पादावनेजसरितो गंगाद्याश्च त्रिलोक्याः शमलानि हंतुं विभ्व्यः केन प्रकारेण अनुश्रवं गुरोरुच्चारणमनुश्रूयत इति अनुश्रवो

वेदः तत्र भवं कीर्तिरूपं तीर्थं श्रुतिभिः श्रवणेंद्रियैः अंघ्रिजं पद्भ्यां गसंगैः एवं शुचिषदः स्वाश्रमधर्मे स्थिताः तव तीर्थद्वयं उपस्पृशंति स्पर्शि

तवंतः सेवंत इति ॥२९॥

त्रि

म

विबुधैःसहसेशाः॥२०॥२१॥विक्षिप्ताविस्तारिता॥२२॥उद्दामानिवृत्तानिविक्रमायेषुतानिकर्माणि॥२३॥२४॥२५॥२६॥२७॥२८॥वीर्यशौर्ययुक्तयाश्रि

॥श्रीबादरायणिरुवाच॥एवमभिष्टूयविबुधैःसेशःशतधृतिर्हरिं॥अभ्यभाषतगोविंदंप्रणम्यांबरमाश्रितः॥२०॥श्रीब्रह्मो
वाच॥भूमेर्भारावतारायपुराविज्ञापितःप्रभो॥त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितं॥२१॥धर्मश्चस्थापितःसत्सुस
ससंधेषुवैत्वया॥कीर्तिश्चदिक्षुविक्षिप्तासर्वलोकमलापहा॥२२॥अवतीर्ययदोर्वंशेबिभ्रद्रूपमनुत्तमं॥कर्माण्युद्दाम
वृत्तानिहितायजगतोकृथाः॥२३॥यानितेचरितानीशमनुष्याःसाधवःकलौ॥श्रृण्वंतःकीर्त्तयंतश्चतरिष्यंत्यंजसा
तमः॥२४॥यदुवंशेऽवतीर्णस्यभवतःपुरुषोत्तम॥शरच्छतंव्यतीयायपंचविंशाधिकंविभो॥२५॥अधुनातेऽखिलाधा
रदेवकार्यावशेषितं॥कुलंचब्रह्मशापेननष्टप्रायमभूदिदं॥२६॥ततःस्वधामपरमंविशस्वयदिमन्यसे॥सलोकां
लोकपालान्नःपाहिवैकुंठकिंकरान्॥२७॥श्रीशुकउवाच॥संस्तुतोभगवानित्थंविबुधैःपभजादिभिः॥प्रतिनंद्याह
वैराजन्मायामनुजईश्वरः॥२८॥श्रीभगवानुवाच॥अवधारितमेतन्मेयथात्थविबुधेश्वर॥कृतंवःकार्यमखि
लंभूमेर्भारोवतारितः॥२९॥तदिदंयादवकुलंशौर्यवीर्यश्रियोद्धतं॥लोकंजिघृक्षद्रुद्धंमेवेलयेवमहार्णवः॥३०॥यद्यसं
संहृत्यदृप्तानांयदूनांविपुलंकुलं॥गंतास्म्यनेनलोकोयमुद्वेलेनैवनंक्षति॥३१॥इदानींनाशआरब्धःकुलस्यद्विजशाप
तः॥यास्यामिभवनंब्रह्मन्नेतदंतेतवानघ॥३२॥श्रीशुकउवाच॥इत्युक्तोलोकनाथेनस्वयंभूःप्रणिपत्यतं॥सहदेवगणै
र्देवःस्वंधामसमपद्यत॥३३॥अथतस्यांमहोत्पातान्द्वारवत्यांसमुत्थितान्॥विलोक्यभगवानाहयदुवृद्धान्समा

या॥२९॥उद्वेलेनउल्लंघितमर्यादेन॥३०॥वैकुंठंयास्यन्तवभवनंयास्यामि॥३१॥३२॥३३॥३४॥श्रीदत्तात्रेयायनमः॥श्रीरामश्रीरा०॥

३५॥प्रभासंयास्यामइतिवदतोऽयमभिप्रायः॥स्वाधिकारानेवाऽर्हंति॥नतुसद्योमुक्तिंमखसांप्रताःमुच्येरन्तस्मादभ्युदयफलंप्रभासंनेष्या
मीति॥३६॥दक्षशापाद्यक्ष्मणागृहीतश्चंद्रोयत्रस्नानमात्रंकृत्वाकिल्बिषात्तस्मात्रोगदुःखात्योविमुक्तःसन्कलावृद्धिंभेजे॥३७॥उशि

॥श्रीभगवानुवाच॥एतेवैसुमहोत्पाताव्युत्तिष्ठंतीहसर्वतः॥शापश्चनःकुलस्यासीत्ब्राह्मणेभ्योदुरत्ययः॥३५॥नवस्त
व्यमिहास्माभिर्जिजीविषुभिरार्यकाः॥प्रभासंसुमहत्पुण्यंयास्यामोद्यैवमाचिरं॥३६॥यत्रस्नात्वादक्षशापात्गृहीतो
यक्ष्मणोडुराट्॥विमुक्तःकिल्बिषात्सद्योभेजेभूयःकलोदयं॥३७॥वयंचतस्मिन्नाप्लुत्यतर्पयित्वापितॄन्सुरान्॥भोज
यित्वोशिजोविप्रान्नानागुणवतांधसा॥३८॥तेषुदानानिपात्रेषुश्रद्धयोप्त्वामहांतिवै॥वृजिनानितरिष्यामोदानैर्नौ
भिरिवार्णवं॥३९॥श्रीशुकउवाच॥एवंभगवतादिष्टायादवाःकुरुनंदन॥गंतुंकृतधियस्तीर्थंस्यंदनान्समयूयुज
न्॥४०॥तन्निरीक्ष्योद्धवोराजन्श्रुत्वाभगवतोदितं॥दृष्ट्वारिष्टानिघोराणिनित्यंकृष्णमनुव्रतः॥४१॥विविक्तउपसं
गम्यजगतामीश्वरेश्वरं॥प्रणम्यशिरसापादौप्रांजलिस्तमभाषत॥४२॥उद्धवउवाच॥देवदेवेशयोगेशपुण्यश्र
वणकीर्तन॥संहृत्यैतत्कुलंनूनंलोकंसंत्यक्ष्यतेभवान्॥४३॥विप्रशापंसमर्थोपिप्रत्यहन्नयदीश्वरः॥नाहंतवांघ्रिक
मलंक्षणार्धमपिकेशव॥त्यक्तुंसमुत्सहेनाथस्वधामनयमामपि॥४४॥तवविक्रीडितंकृष्णनृणांपरममंगलं॥कर्णपी
यूषमास्वाद्यत्यजत्यन्यस्पृहांजनः॥४५॥शय्यासनाटनस्थानस्नानक्रीडाशनादिषु॥कथंत्वांप्रियमात्मानंवयंभक्तास्त्यजे

जःकमनीयान्॥अंधसाअन्नेन॥३८॥उप्त्वेति॥यथासुक्षेत्रेबीजंउप्तंबहुफलंभवति॥तथातद्दानंसत्पात्रइतिद्योतयति॥
३९॥४०॥४१॥४२॥लोकंमर्त्यलोकं॥४३॥नप्रत्यहन्नप्रतिहतवान्॥४४॥४५॥शय्यादिषुलक्ताःनित्यंसेवितवंतोवयंकथंत्यजेम॥त्यक्तु
मशक्नुवन्॥४६॥

यत्कुमशक्नुवन्प्रार्थने॥नमायाभयादित्याह॥त्वयेति॥चर्चिताःअलंकृताःहीतिनिश्चितंजयेम॥४७॥संन्यासिनोहिब्रह्मचर्यादिक्लेशैःकथंचित्तरंति॥
वयंत्विहअनायासेनतरिष्यामइत्याह॥वातरशनाइति॥ऊर्ध्वमंथिनऊर्ध्वरेतसः॥४८॥तावकैर्भक्तैःसहत्वद्वार्त्तया॥४९॥क्ष्वेलीपरिहासःढ्ढैक
त्वं॥५०॥एकांतिनमित्यादिस्वाभिप्रायवचनहेतुः॥५१॥इत्येकादशेषष्ठः॥सप्तमेतत्त्वस्यात्मज्ञानसिद्ध्यैहरिःस्वयं॥अवधूतेतिहासोक्त्यागुरू

त्वयोपभुक्तस्रगंधवासोलंकारचर्चिताः॥उच्छिष्टभोगिनोदासास्तवमायांजयेमहि॥४७॥वातरशनाऋषयःश्रमणाऊर्ध्व
मंथिनः॥ब्रह्माख्यंधामतेयांतिशांताःसंन्यासिनोऽमलाः॥४८॥वयंत्विहमहायोगिन्भ्रमंतःकर्मवर्त्मसु॥त्वद्वार्त्तयातरिष्या
मस्तावकैर्दुस्तरंतमः॥४९॥स्मरंतःकीर्तयंतस्तेकृतानिगदितानिच॥गत्युत्स्मितेक्षणक्ष्वेलियन्नृलोकविडंबनं॥५०॥श्रीशु
कउवाच॥एवंविज्ञापितोराजन्भगवान्देवकीसुतः॥एकांतिनंप्रियंभृत्यमुद्धवंसमभाषत॥५१॥इतिश्रीभागवतेमहापु
राणेएकादशस्कंधेब्रह्मादिस्तुतिःषष्ठोध्यायः॥६॥श्रीभगवानुवाच॥यदात्थमांमहाभागतच्चिकीर्षितमेवमे॥ब्रह्मा
भवोलोकपालाःस्वर्वासंमेभिकांक्षिणः॥१॥मयानिष्पादितंह्यत्रदेवकार्यमशेषतः॥यदर्थमवतीर्णोहमंशेनब्रह्मणार्थि
तः॥२॥कुलंवैशापनिर्दग्धंनंक्ष्यत्यन्योन्यविग्रहात्॥समुद्रःसप्तमेह्येतांपुरींचप्लावयिष्यति॥३॥यर्ह्येवायंमयात्यक्तोलो
कोयंनष्टमंगलः॥भविष्यत्यचिरात्साधोकलिनापाप्मनेक्षितः॥४॥नवस्तव्यंत्वयैवेहमयात्यक्तेमहीतले॥जनोऽधर्मरुचि
र्भद्रभविष्यतिकलौयुगे॥५॥त्वंतुसर्वंपरित्यज्यस्नेहंस्वजनबंधुषु॥मय्यावेश्यमनःसम्यक्समदृग्विचरस्वगां॥६॥
तदिदंमनसावाचाचक्षुर्भ्यांश्रवणादिभिः॥नश्वरंगृह्यमाणंचविद्धिमायामनोमयं॥७॥श्रीदत्तात्रेयायनमः॥

ष्वष्टाववर्णयत्॥१॥यदात्थसंहृत्यैतत्कुलमिति॥स्वर्वासंवैकुंठवासंप्रति॥१॥मयेति॥२॥त्वंतुसर्वत्यागेनमन्निष्ठोभवेतिवक्तुमाह॥त्रयेण॥
कुलमिति॥३॥तदैवायंनष्टमंगलोभविष्यतीति॥४॥त्वयानवक्तव्यमिह॥५॥६॥ननुगुणदोषाभ्यांविषमेलोकेकुतःसमदृष्टिःस्यादतआह॥य
दिदमिति॥मनआदिभिर्गृह्यमाणंमनोमयत्वात्मायेतिविद्धि॥तदपिनस्थिरंचविद्धि॥७॥

मनोमयत्वेहेतुः॥पुंसइति॥अयुक्तस्यविक्षिप्तमनसः नानार्थोभेदः विषयोभ्रमः सभ्रमएवगुणदोषभाक्॥ननुवेदेनैवविधिनिषेधाभ्यांभेदस्य
सत्यतोक्ता॥नभ्रमविजृंभितगुणदोषबुद्धेःपुंसःभिदा॥कर्मविहितंअकर्मतल्लोपः॥विकर्मनिषिद्धमितिभेदः अविद्याविषयएवभेदइत्यर्थः
॥८॥कथमात्मनिपश्येद्विततंजगदीक्षणीयंतत्राह॥आत्मनीति॥मयिब्रह्मणितद्रूपेणेक्षस्व॥९॥नन्वेवंयुक्तचित्तत्वेनकर्माकरणेदेवाद
योविघ्नान्करिष्यंतितत्राह॥ज्ञानेति॥ज्ञानंवेदतात्पर्यनिश्चयः॥विज्ञानंतदर्थानुभवःताभ्यांसम्यक्युक्तःततआत्मानुभवेनैवतुष्टचि
त्तःअतःशरीरिणांदेवादीनांआत्मभूतःअंतरायैर्नप्रतिहन्यसे॥अयंभावः॥यावदनुभवंयथावर्णाश्रमकर्माणिकुर्यादेव॥तदनंतरंसर्वेषा

पुंसोऽयुक्तस्यनानार्थोभ्रमःसगुणदोषभाक्॥कर्माकर्मविकर्मेतिगुणदोषधियोभिदा॥८॥ तस्माद्युक्तेंद्रियग्रामोयुक्त
चित्तइदंजगत्॥आत्मनीक्षस्वविततमात्मानंमय्यधीश्वरे॥९॥ज्ञानविज्ञानसंयुक्तआत्मभूतःशरीरिणां॥आत्मानुभ
वतुष्टात्मानांतरायैर्विहन्यसे॥१०॥दोषबुद्ध्योभयातीतोनिषेधान्ननिवर्त्तते॥गुणबुद्ध्याचविहितंनकरोतियथाऽर्भकः॥११॥
सर्वभूतसुहृच्छांतोज्ञानविज्ञाननिश्चयः॥पश्यन्मदात्मकंविश्वंनविपद्येतवैपुनः॥१२॥श्रीशुकउवाच॥इत्यादिष्टोभग
वतामहाभागवतोनृप॥उद्धवःप्रणिपत्याहतत्वजिज्ञासुरच्युतं॥१३॥श्रीउद्धवउवाच॥योगेशयोगविन्यासयोगात्मन्योगसं
भव॥निःश्रेयसायमेप्रोक्तस्त्यागःसन्यासलक्षणः॥१४॥ छ॥ ॥यात्मभूतत्वान्नकोपिविघ्नानाचरतीति॥तथाचश्रुतिः॥तस्यहनदेवा
श्चनाभूत्याईशतेआत्माह्येषांभवतीति॥१०॥नचोत्पन्नज्ञानस्यापियथेष्टाचरणप्रसंगइत्याह॥दोषबुद्ध्येति॥गुणदोषबुद्ध्यतीतोपिप्राक्तनसं
स्कारान्निषेधात्निवर्त्ततएव॥किंतुनदोषबुद्ध्या॥विहितंचप्रायशःकरोति॥नगुणबुद्ध्या॥यथाऽर्भकःसंकल्पविकल्परहितःकिंचित्करोति॥कुतश्चि
न्निवर्त्ततेतद्वत्॥११॥एवंभूतस्यनपुनःसंसारइत्याह॥नविपद्येतनपुनःसंसरेत्॥१२॥१३॥त्वंतुसर्वंपरित्यज्येत्याद्युपदेशमात्मनोऽयोग्यंमन्वा
नःपद्यति॥योगेशेति॥योगफलदाविन्योगविदांन्यासः॥न्यासोनामाऽपिगोप्योनिक्षेपविशेषः॥यत्रयोगोविन्यस्यतेक्रियतेयस्मिन्
योगात्मन्॥योगेआत्माप्रवर्तकोभवतियस्ययोगस्वरूपेतिवा॥योगस्यसंभवोयस्मात्॥चतुर्भिरेतैःसंबोधनैःस्वमहिम्नाकैवल्यंत्वयोप
दिष्टं॥नतुमदधिकारंपर्यालोच्येतिद्योतितं॥तदाह॥निःश्रेयसायेति॥नचारोग्यार्थैध्येसर्वस्वदानादिरूपस्त्यागः॥किंतुसन्यासलक्षणःअ

१५॥ यंप्रतिसागाधकुपदिष्टंसोहंमूढमतिः॥ कुतःममेति॥ अहमितिच॥ सानुबंधेपुत्रादिसहिते॥ त्वन्मायययारचिते॥ आत्मनिदेहे॥ विगाढोनिमग्नः॥ अ
तस्तत्तभवतानिगदितंयथाहमंजसासंसाधयामितथाभ्यंमामनुशाधिशाधीत्यानेःशिक्षय॥ १६॥ मयासंक्षेपतःउक्तंविस्ततस्त्वन्यान्पृच्छेतिचेदत
आह॥ सस्यस्येति॥ स्वदृशः स्वप्रकाशस्यसस्यस्यात्मनःआत्मनोमांप्रवक्तारंतेलत्तःअन्यंनानुचक्षेनपश्यामि॥ स्वदृशःस्वतःसिद्धज्ञानात्तत्त्व
तोऽन्यमितिवा॥ कुतइत्यतआह॥ बहिरर्थभावाःविषयेअर्थबुद्धय॥ १७॥ केचित्दुःशीलाःभवंतिकेचित्सेविताःफलकालेविनश्यंति॥ के
सागोयंदुष्करोभूमनन्कामानांविषयात्मभिः॥ सुतरांत्वयिसर्वात्मन्नभक्तैरितिमेमतिः॥ १५॥ सोहंममाहमितिमूढमतिर्वि
गाढस्त्वन्माययाविरचितात्मनिसानुबंधे॥ तत्त्वंजसानिगदितंभवतायथाहंसंसाधयामिभगवन्ननुशाधिभृत्यं॥ १६॥ स
त्यस्यतेस्वदृशआत्मनआत्मनोन्यंवक्तारमीशविबुधेष्वपिनानुचक्षे॥ सर्वेविमोहितधियस्तवमाययेमेब्रह्मादय
स्तनुभृतोबहिरर्थभावाः॥ १७॥ तस्मात्भवंतमनवद्यमनंतपारंसर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं॥ निर्विण्णधीरह
मुहवृजिनाभितप्तोनारायणंनरसखंशरणंप्रपद्ये॥ १८॥ श्रीभगवानुवाच॥ प्रायेणमनुजालोकेलोकतत्वविचक्ष
णाः॥ समुद्धरंतिह्यात्मानमात्मनैवाशुभाशयात्॥ १९॥ आत्मनोगुरुरात्मैवपुरुषस्यविशेषतः॥ यत्प्रत्यक्षानुमानाभ्यांश्रे
योसावनुविंदते॥ २०॥ पुरुषत्वेचमांधीराःसांख्ययोगविशारदाः॥ आविस्तरांप्रपश्यंतिसर्वशक्त्युपबृंहितं॥ २१॥
चिदज्ञाःकेचिद्रक्षणेऽसमर्थाःकेचित्स्वस्थानभ्रष्टाः॥ तदभावःसर्वमनवद्यादीनिपंचविशेषणानि॥ नअंतःकालतःपारंदेशतश्चयस्य
तं॥ कालादिभिरकुंठोविकुंठोवैकुंठलोकोधिष्ण्यं॥ स्थानंयस्यतं॥ हेभगवन्नहस्फुटं॥ निर्वेदहेतुः॥ वृजिनैर्दुःखैरभितप्तः हकारःगौरवाय
त्वकाराप्युक्तइवपठनीयः॥ नन्वनवद्यत्वादीनिकुतोममतदाह॥ नारायणमिति॥ अनुकंपितामाह॥ नरोजीवःतस्यसखायं॥ तंशरणंप्र
पद्यइति॥ १८॥ तदेवमसंभावनाविपरीतभावनाभ्यामुपदिष्टंतत्त्वंअनवगाहमानंप्रतितत्त्वविवक्तयेगुरूपदेशंविनापिसान्वयव्यतिरेका
भ्यामेवतत्त्वनिरत्तिर्भवतीतिदर्शयितुमाह॥ प्रायेणेति॥ लोकतत्वस्यविचक्षणाःपरीक्षकाःअशुभाशयात्विषयवासनातः॥ १९॥ तदुप

॥भा॰ ए॰॥
॥२७॥

अतः पुरुषत्वं स्तौति ॥ एकेति ॥ २२ ॥ अनुमानमाह ॥ अत्रेति ॥ अत्र पौरुष्यां पुरि कृत्स्ना ॥ अप्रमत्ताः अग्राह्यं ग्राह्येभ्यो अहंकारादिभ्यो व्यतिरिक्तं मां
अद्धा साक्षान्मृगयंति ॥ मार्गणे प्रकारद्वयमाह ॥ गृह्यमाणैर्बुद्ध्यादिगुणैर्हेतुभिर्जडानां काराः स्वप्रकाशमेकं विना न घटत इत्यनुपपत्तिमुखे
न लक्षकैः ॥ तथा तैरेव लिंगैर्व्याप्तिमुखेनानुमानतः ईश्वरं प्रवर्त्तकं मृगयंते ॥ बुद्ध्यादिकरणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदि
ति ॥ तदुक्तं ॥ भगवान्सर्वभूतेषु लक्षितः स्वात्मना हरिः ॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैरिति ॥ न चैतावता आनुमानिकः आत्मे

एकद्वित्रिचतुःपादो बहुपादस्तथाऽपदः ॥ बह्व्यः संति पुरः सृष्टास्तासां मे पौरुषी प्रिया ॥ २२ ॥ अत्र मां मृगयंत्यद्धा युक्ता हेतु
भिरीश्वरं ॥ गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः ॥ २३ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं ॥ अवधूतस्य संवादं
यदोरमिततेजसः ॥ २४ ॥ अवधूतं द्विजं कंचिच्चरंतमकुतोभयं ॥ कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् ॥ २५ ॥
यदुरुवाच ॥ कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा ॥ यामासाद्य भवांल्लोकं विद्वांश्चरति बालवत् ॥ २६ ॥ प्रायो
धर्मार्थकामेषु विवित्सायां च मानवाः ॥ हेतुनैव समीहंते आयुषो यशसः श्रियः ॥ २७ ॥ त्वं तु कल्पः कविर्दक्षः सुभ
गोऽमृतभाषणः ॥ न कर्त्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत् ॥ २८ ॥ जनेषु दह्यमानेषु कामलोभदवाग्निना ॥ न तप्यसेऽ
ग्निना मुक्तो गंगांभःस्थ इव द्विपः ॥ २९ ॥ त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानंदकारणं ॥ ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥ ३० ॥

भाप

तिमंतव्यं ॥ देहादिव्यतिरिक्तत्वं पदार्थशुद्धिमात्रेवानुमानेन विवक्षितत्वात् ॥ २३ ॥ भूयोन्वयव्यतिरेकाभ्यामसंभावनादिनिवृत्त्यावितिहासमा
ह ॥ अत्रापीति ॥ २४ ॥ २५ ॥ सुविशारदा अतिनिपुणा ॥ २६ ॥ सर्वलोकवैलक्षण्यमेवाह ॥ प्राय इति ॥ धर्मादिषु विवित्सायामात्मविचारे च मान
वाः सहीमीहंते प्रवर्त्तंते ॥ तत्रापि आयुरादेर्हेतुना कामनयैव ॥ २७ ॥ त्वं तु न कस्यचित्कर्मणः कर्त्ता भवसि ॥ न किंचिदीहसे इच्छति ॥ नन्व
शक्त्या वा अज्ञानेन वा अनैपुण्येन वा विरूपत्वेन वा अवाग्मितया वा औदासिन्यं घटत एव नेत्याह ॥ कल्प इत्यादिना ॥ २८ ॥ महानानंद
श्च तव कुतः इति पृच्छति ॥ जनेष्विति ॥ २९ ॥ स्पर्शविहीनस्य विषयभोगरहितस्य ॥ अत्र हेतुः ॥ केवलात्मनः कलत्रादिशून्यस्य ॥ ३० ॥ ७

॥राम॥
॥२७॥

ति

३२॥ बुद्ध्यैवोपाश्रिताः स्वीकृताः न तु पदेशेन॥ अटामि पर्यटामि॥ ३२॥ ३३॥ शोभनं रूपं कीटस्य करोतीति सुपेशस्कृत्॥ ३४॥ मे मया आश्रितास्तदाह॥
एतेषां वृत्तिभिः आत्मनः शिक्षाः शिक्षणीयार्थान् हेयोपायादीन् अन्वशिक्षं अनुशिक्षितवानस्मि॥ ३५॥ नाहुषो ययातिः॥ ३६॥ क्षितेः क्षमां शि
क्षितवानित्याह॥ भूतैरिति॥ आक्रम्यमाणः पीड्यमानः तद्विद्वान् भूतानां दैववशवर्तित्वं विद्वान् व्रतं नियमं॥ ३७॥ पर्वतरूपा वृक्षरूपा च पृथिवी त
स्याः शिक्षितमाह॥ शश्वदिति॥ सर्वदा परार्थाः परोपकारार्थाः सर्वा ईहा यस्य सः॥ परार्थ एव एकांततः संभवो यस्य सः॥ भूभृतः पर्वतात् त
स्य हि वृक्षतृणनिर्झरप्रसवक्रियाः परार्था एव यथा तद्वत्॥ तथा नगशिष्यः वृक्षशिष्यः सन्॥ परात्मतां पराधीनात्मतां वृक्षो यथा परैः

॥ श्रीभगवानुवाच॥ यदुनैवं महाभागो ब्रह्मण्येन सुमेधसा॥ पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः॥ ३१॥ ब्राह्मण उवाच॥
संतिमे गुरवो राजन् बहवो बुद्ध्युपाश्रिताः यतो बुद्धिमुपादाय मुक्तोऽटामीह तांछृणु॥ ३२॥ पृथिवी वायुराकाशमापोऽ
ग्निश्चंद्रमा रविः॥ कपोतोऽजगरः सिंधुः पतंगो मधुकृद्गजः॥ ३३॥ मधुहा हरिणो मीनः पिंगला कुररोऽर्भकः॥ कुमारी शरकृ
त्सर्प ऊर्णनाभिः सुपेशकृत्॥ ३४॥ एते मे गुरवो राजंश्चतुर्विंशतिराश्रिताः॥ शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मनः॥ ३५॥ य
तो यदनुशिक्षामि यथा वा नाहुषात्मज॥ तत्तथा पुरुषव्याघ्र निबोध कथयामि ते॥ ३६॥ भूतैराक्रम्यमाणोऽपि धीरो दैववशानु
गैः॥ तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतं॥ ३७॥ शश्वत्परार्थसर्वेहः परार्थैकांतसंभवः॥ साधुः शिक्षेत भूभृत्तो नगशिष्यः
परात्मतां॥ ३८॥ प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रियप्रियैः॥ ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः॥ ३९॥ श्रीरामचंद्र॥

वखंश्योतास्यवानयनमप्यनुमन्यते तद्वत्॥ ३८॥ वायुरपि द्विविधः प्राणो बाह्यश्च तत्र प्राणस्य गुरुत्वमाह॥ प्राणवृत्त्येति॥ प्राणो ह्याहारा
दिमात्रेण प्रवर्तते रूपरसादीनिंद्रियविषयांस्तु नापेक्षते तथा मुनिरपि भवेदित्यर्थः॥ प्राणवृत्तेः करणे मनोवैकल्येन ज्ञाननाशः स्या
त्ततो देहनिर्वाहः कर्तव्यः॥ गुणेष्वायां तु वाङ्मनश्च विक्षिप्येत॥ अतो नाधिकं लिप्सेदित्याह॥ ज्ञानमिति॥ नावकीर्येत न विक्षिप्येत॥

विषयान्सेवमानोपि तेषु नासक्तिं बाध्याद्वायोः शिक्षेदित्याह॥ विषयेष्विति॥ नानाधर्मेषु शीतोष्णादिधर्मकेषु न हि वायुर्वनेदहनेवासज्जते तद्वत्॥ यथा वायुर्गंधादिधर्मयोगेन प्रतीयमानोपि वस्तुतो न तद्योगी॥ एवं देहादिधर्मयोगेनाहंप्रसयेन प्रतीयमानोप्यात्मान तद्धर्मवानिति संभावित मिति॥ ४०॥ वायोरेव शिक्षितमित्याह॥ पार्थिवेष्विति॥ तद्गुणाश्रयः देहधर्मान् बाल्यादीनाश्रियवर्त्तमानो गुणैस्तैरेव॥ एकस्यैवात्मनो द्विती यस्यांतर्बहिर्भावेन वर्त्तमानत्वमसंगत्वं चेति॥ ४१॥ आकाशाच्छिक्षितं संभावनाद्वयमाह॥ अंतर्हितश्चेति द्वयेन॥ अंतर्हितश्च देहांतर्गतोपि मु निरात्मनो देहाद्यसंगं॥ अत एव अव्यवच्छेदं च भावयेत्॥ कुतः स्थिरजंगमेषु समन्वयेन याव्याप्तिस्तया॥ किं मणिषु सूत्रस्येव व्याप्तिः नेत्याह

विषयेष्वाविशन्योगी नानाधर्मेषु सर्वतः॥ गुणदोषव्यपेतात्मा न विषज्जेत वायुवत्॥ ४०॥ पार्थिवेष्विह देहेषु प्रविष्टस्त द्गुणाश्रयः॥ गुणैर्न युज्यते योगी गंधैर्वायुरिवात्मदृक्॥ ४१॥ अंतर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन व्या प्त्याव्यवच्छेदमसंगमात्मनो मुनिर्नभस्त्वं विततस्य भावयेत्॥ ४२॥ तेजोबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः॥ न स्पृश्य ते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान्॥ ४३॥ स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणां॥ मुनिः पुनात्यपां मित्रमीक्षोप स्पर्शकीर्त्तनैः॥ ४४॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः॥ सर्वभक्षोपि युक्तात्मा नादत्ते मलमग्निवत्॥ ४५॥ ७॥ ७॥

तस्य सर्वगतस्य तत्कुतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया॥ तत्त्वमसीति श्रुतेः॥ नन्वेतत्सर्वं कथं संभवति तत्राह॥ नभस्त्वं तत्तुल्यत्वं सं भावयेत्॥ यथा नभसः सर्वगतस्य न घटादिभिः संगः परिच्छेदो वा॥ एवमात्मनोपि संभवतीति॥ ४२॥ किंच॥ कूटस्थस्यात्मनो नागमापा यिदेहादिसंबंध इत्याह॥ मेघाद्यैर्भावैः यथा नभो न स्पृश्यते तद्वत्॥ तेजोबन्नमयैर्गुणैरात्मा न स्पृश्यत इत्यन्वयः॥ तेजोबन्नमयैस्तेज श्च आपश्च अन्नं पृथिवी च तन्मयैः कालसृष्टैर्गुणैः देहादिभिः पुमान्न स्पृश्यत इति नभोवत्संभवतीति॥ ४३॥ स्वच्छत्वादिभिर्गुणैरुदकं जगत्पुनातीति तद्गुणामयान्शिक्षितादित्याह॥ स्वच्छः निर्मलः प्रकृतितः स्वभावतः स्निग्धः जनेष्वनुरागवान्॥ माधुर्यः मधुरवाक् प्रीतीर्थ भूः तीर्थस्थानं अपां मित्रं उदकतुल्यः॥ अथादिति पाठे॥ सखायं पापात्पुनाति स्वच्छत्वादिगुणैरर्थाद्वदकसादृश्यं ज्ञातव्यं॥ ४४॥ अग्नेः शिक्षि तमाह॥ तेजस्वीति॥ तेजस्वी स्नानातिशयात विशेषतस्तपसा दीप्तः दुर्धर्षः॥ अक्षोभ्यः स चासौ उदरभाजनश्च अपरिग्रहः युक्तात्मा मु निः॥ ४५॥ ७॥

अग्नेरेवदृष्टांतरमाह॥ क्वचिदिति॥ यथाग्निः परेछयैव हविर्गृण्हाति तथा मुनिरित्याह॥ दातृणामिति॥ प्रागुत्तराशुभं भूतं भविष्यच्चपापं॥४६॥ आ
त्मनो देहोपाधिकमेवाज्ञनीचत्वादिनस्वाभाविकमित्यग्निदृष्टांतेनसंभावितमित्याह॥ स्वमाययेति॥ स्वमायया स्वाविद्यया सृष्टं सदसल्लक्षणं दे
तिर्यगादिरूपं विप्रक्षुद्रादिरूपंवा॥४७॥ आत्मनोजन्मादिषड्विकारादिभावश्चंद्रदृष्टांतेनसंभावितइत्याह॥ विसर्गाद्या इति॥ विसर्गोजन्म॥ श्म
शानांतंनाशः॥ अत्रैवंज्योतिःशास्त्रप्रक्रिया॥ आप्यमंडलंचंद्रः तेजोमयमंडलमादित्यः॥ तयोरेकनक्षत्रावस्थानेचंद्रोनदृश्यते॥ चक्षुषआ
दित्यमंडलेनसमदेशास्थितेनव्यवधानात् सा अमावास्या अथ षष्टिघटिकाभिश्चंद्रोनक्षत्रांतरंगच्छति आदित्यस्तु त्रयोदशभिरहोरा
(म) त्रैः अतः प्रतिपदमारभ्य विप्रकृष्टस्थितस्य आदित्यमंडलस्य पंचदशोभागः आप्यमंडले प्रतिबिंबितो दृश्यते सा कलेत्युच्यते॥ एवंपंचदशाहोरात्रैर्यावद्द

क्वचिच्छन्नः क्वचित्स्पष्ट उपास्यश्श्रेयइच्छतां॥ भुंक्तेसर्वत्रदातृणांदहन्प्रागुत्तराशुभं॥४६॥ स्वमाययासृष्टमिदंसदसल्लक्ष्मौं(णं)वि
भुः॥ प्रविष्टईयतेतत्तत्स्वरूपोऽग्निरिवैधसि॥४७॥ विसर्गाद्याःश्मशानांताभावादेहस्यनात्मनः॥ कलानामिवचंद्रस्यका
लेनाऽव्यक्तवर्त्मना॥४८॥ कालेह्यौघवेगेनभूतानांप्रभवाप्ययौ॥ नित्यावपिनदृश्येतेआत्मनोऽग्नेर्यथार्चिषां॥४९॥

शाभिर्नक्षत्रैरंतरितमिति राशिचक्रस्य सप्तविंशतिनक्षत्रात्मकस्य मध्ये यदा संमुखौ चंद्रादित्यौ तिष्ठतः तदा संपूर्णं प्रतिबिंबमच्छ
यालंघितं दृश्यते॥ सा पूर्णिमा तस्यां अमावास्यां प्रतिबिंबेन सह षोडशकलश्चंद्रःपुउपचर्यते॥ ततः पुनः प्रतिपदमारभ्य मंड
लयोर्विषमीभावात्कलाह्रासः॥ तत्र यथा कलानामेवोत्पत्त्यादयो नाप्यमंडलस्य तथात्मनोपीत्याह॥ कलानामिवेति॥४८॥ सिं
हावलोकनेनाग्निदृष्टांतेनैव देहानां क्षणभंगुरतया वैराग्यं विवक्षितमित्याह॥ कालेनेति॥ ओघवद्वेगोयस्य तेनात्मनः संबंधि
नांभूतानां देहानामित्यर्थः॥ अर्चिषां ज्वालानां॥४९॥ श्रीदत्तात्रयायनमः॥ श्रीगुरवेनमः॥ श्रीकृष्णायपरमात्मनेनमः॥ ७७

आदित्याच्छिक्षितमाह। छयेन। गुणैरिति॥ गुणैरिंद्रियैर्गुणान्विषयानुपादत्ते। यथाकालमर्थिन्यागते सति विमुंचति च॥ न तेषु युज्यते॥ लब्धमिति॥
दत्तमिति वाऽभिनिवेशं न करोति॥ गोभिः रश्मिभिः॥ गाः जलानि॥ गोपतिः सूर्यो यथा॥५०॥ स्वतो भेदस्यान्यस्याप्यात्मनो भेदप्रतीतिरुपाधिवशा
दित्यादित्यदृष्टांतेनैव संभावितमित्याह। बुध्यत इति। स्वे स्वरूपे अवस्थित आत्मा भेदेन न बुध्यते अभिव्यनक्तीति व्यक्तिरुपाधिः व्यक्तिस्थ उपा
धौ प्रतिबिंबतस्तत्कृतः तद्गत इव उपाधिप्रविष्ट इव भेदेन स्थूलमतिभिर्लक्ष्यते अर्कवदित्यन्वयः॥५१॥ कपोताच्छिक्षितमाह। स्नेहः प्रीतिः प्रसंगःउप

गुणैर्गुणानुपादत्ते यथाकालं विमुंचति। न तेषु युज्यते योगी गोभिर्गा इव गोपतिः॥५०॥ बुध्यते स्वे न भेदेन व्यक्तिस्थ इव तद्ग
तः॥ लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोऽर्कवत्॥५१॥ नातिस्नेहः प्रसंगो वा कर्त्तव्यः क्वापि केनचित्। कुर्वन्विंदेत सं
तापं कपोत इव दीनधीः॥५२॥ कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ। कपोत्या भार्यया सार्धमुवास कतिचित्समाः॥५३॥ क
पोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ। दृष्टिं दृष्ट्यांऽगमंगेन बुद्धिं बुद्ध्या बबंधतुः॥५४॥ शय्यासनाटनस्थानवार्ताक्रीडाश
नादिषु। मिथुनीभूय विश्रब्धौ चेरतुर्वनराजिषु॥५५॥ यं यं वांछति सा राजन्तर्पयंत्यनुकंपिता। तं तं समानयत्कामं कृ
च्छ्रेणाप्यजितेंद्रियः॥५६॥ कपोती प्रथमं गर्भं गृह्णती काल आगते। अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती॥५७॥ ते
षु काले व्यजायंत रचितावयवा हरेः। शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः॥५८॥ श्रीरामचंद्राय नमः॥६९

लालनाद्यासक्तिः॥५२॥ दृष्टांतं प्रपंचयति। कपोतकश्चनेति॥५३॥ तयोर्मिथः स्नेहप्रसंगो दर्शयति। कपोताविति त्रयेण॥ स्नेहेन गुणि
तं निबद्धं हृदयं ययोस्तौ॥५४॥ विश्रब्धौ निःशंकौ॥५५॥ सा कपोती तर्पयंती सवीक्षितालापादिभिः प्रीणयंती॥ अत एव तेनानुकंपितास
तीयं यं वांछति तं तं कामं समनयत्। संपादयामास। राजन्निति लिंगं यथेति सूचितं॥५६॥५७॥ तेषु जलभावितेष्वंडेषु हरेः स्वभावकर्मादिशक्ति
भिः रचितावयवाः पक्षिणः कोमलान्यंगानि तनूरुहाश्च येषां ते॥५८॥६॥

पि

५९॥पतत्रैःपक्षैः अदीनां अदुःखितानां॥६०॥शिशून् बालान्॥प्रजाःपुत्रान्॥६१॥६२॥स्वालयांतिकेचरतःक्रीडनःतान्कपोतपुत्रान्जालमातत्यप्रसा
र्य॥६२॥उत्सुकत्वात्देवतत्पोषणार्थंगतौसंतोषणंभक्ष्यं॥६४॥६५॥शिचाजालेन॥६६॥आत्मानुरूपांभार्यांच॥विलापसुत्रोच॥६७॥विला

प्रजाःपुपुषतुःप्रीतौदंपतीपुत्रवत्सलौ॥शृण्वंतौकूजितंतासांनिर्वतौकलभाषितैः॥५९॥तासांपतत्रैःसुस्पर्शैःकूजितैर्मुग्धचे
ष्टितैः॥प्रत्युद्गमैरदीनानांपितरौमुदमापतुः॥६०॥स्नेहानुबद्धहृदयावन्योन्यंविष्णुमायया॥विमोहितौदीनधियौशिशून्
पुपुषतुःप्रजाः॥६१॥एकदाजग्मतुस्तासामन्नार्थंतौकुटुंबिनौ॥परितःकाननेतस्मिन्नर्थिनौचेरतुश्चिरं॥६२॥दृष्ट्वातान्लु
ब्धकःकश्चिद्यदृच्छातोवनेचरः॥जगृहेजालमाततत्यचरतःस्वालयांतिके॥६३॥कपोतश्चकपोतीचप्रजापोषेसदोत्सु
कौ॥गतौपोषणमादायस्वनीडमुपजग्मतुः॥६४॥कपोतीस्वात्मजान्वीक्ष्यबालकान्जालसंवृतान्॥तानभ्यधावत्क्रोशं
तीक्रोशंतोभृशदुःखिता॥६५॥साकृत्स्नेहगुणितादीनचित्ताजमायया॥स्वयंचाबध्यतशिचाबद्धान्पश्यंत्यपस्मृतिः॥६६॥
कपोतश्चात्मजान्बद्धानात्मनोप्यधिकान्प्रियान्॥भार्यांचात्मसमांदीनोविललापातिदुःखितः॥६७॥अहोमेपश्यतापा
यमल्पपुण्यस्यदुर्मतेः॥अतृप्तस्याकृतार्थस्यगृहस्त्रैवर्गिकोहतः॥६८॥अनुरूपानुकूलाचयस्यमेपतिदेवता॥शून्येगृहे
मांसंत्यज्यपुत्रैःस्वर्यातिसाधुभिः॥६९॥सोहंशून्येगृहेदीनोमृतदारोमृतप्रजः॥जिजीविषेकिमर्थंवाविधुरोदुःखजीवि
तः॥७०॥तांस्तथैवावृतान्शिग्भिर्मृत्युग्रस्तान्विचेष्टतः॥स्वयंचकृपणःशिक्षुपश्यन्नप्यबुधोपतत्॥७१॥तंलब्ध्वालु
ब्धकःक्रूरःकपोतंगृहमेधिनं॥कपोतकान्कपोतींचसिद्धार्थःप्रययौगृहं॥७२॥एवंकुटुंब्यशांतात्माद्वंद्वारामःपतत्रिवत्पु
पमाह॥त्रयेण॥अतृप्तस्यदृष्टसुखेअकृतार्थस्यअदृष्टमसंपाद्यतः॥६८॥६९॥७०॥तानावृत्तान्पश्यन्नपिशिक्षुजालेषु॥७१॥७२॥दार्ष्टांतिकेयोज
यति॥एवमिति॥७२॥७३॥

एवं गृहासक्तिस्तिरश्चामप्यनर्थहेतुः मानुषस्य त्वतिनिंद्येत्याह। यः प्राप्येति। ७४। इत्येकादशे सप्तमः॥ ७॥ अष्टमे ऽजगरादिभ्यो नवभ्यः शिक्षितं ह
रिः॥ अवधूतगिरा प्राह विवेकाय यदुं प्रति॥ १॥ प्रारब्धकर्मभोगस्य अवश्यंभावित्वात्तदर्थो घर्मेनायुर्व्ययो वृथा कर्त्तव्य इत्यजगराच्छिक्षितमि
त्याह। सुखमित्यादिना। यदिंद्रियसुखं तत्स्वर्गे नरके च भवत्येव। यथा दुःखं तस्मात् बुधस्तन्नैच्छेत्। १। शरीरनिर्वाहमात्रं तु यथालब्धेन कर्त्त
व्यमित्याह। ग्रासमिति। आजगरः आजगरवृत्तिः अक्रियः उदासीनः॥ २॥ यदा नापततितदा किं कर्त्तव्यं तत्राह। शयीतेति। अनुपक्रमः नि
रुद्यमः॥ दिष्टभुक् एवमेव प्रापकमिति धैर्यवान्॥ ३॥ ननु समर्थोपि शयीतैव किं अमित्याह। ओज इति। ओज इंद्रियबलं सहो मनोबलं॥ बलं शारी

यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतं। गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः॥ ७४॥ इति श्रीभागवते महापुराणे एका
दशस्कंधे अवधूतयदुसंवादे सप्तमोऽध्यायः॥ ७॥ ब्राह्मण उवाच॥ सुखमैंद्रियकं राजन्स्वर्गे नरक एव च॥ देहिनां यद्यथा
दुःखं तस्मान्नेच्छेत तद्बुधः॥ १॥ ग्रासं सुमृष्टं विरसं महांतं स्तोकमेव च॥ यदृच्छयैवापतितं ग्रसेदाजगरोऽक्रियः॥ २॥ शयीता
हानि भूरीणि निराहारोऽनुपक्रमः॥ यदि नोपनमेद्ग्रासो महाहिरिव दिष्टभुक्॥ ३॥ ओजः सहोबलयुतं बिभ्रद्देहमकर्म
कं॥ शयानो वीतनिद्रश्च नेहेतेंद्रियवानपि॥ ४॥ मुनिः प्रसन्नगंभीरो दुर्विगाह्यो दुरत्ययः॥ अनंतपारो ह्यक्षोभ्यः स्तिमितो
द इवार्णव॥ ५॥ समृद्धकामो हीनो वा नारायणपरो मुनिः॥ नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः॥ ६॥ ७ ७ ७

रमेव॥ तद्युक्तमपि देहमकर्मकमेव बिभ्रत्॥ शयान एव भवेत्॥ विनिद्रः स्वार्थे तत्परश्च भवेत्॥ न पुनरीक्षेहेत इंद्रियवानपीति द
र्शनादि व्यापारमपि निवारयति॥ ४॥ समुद्राच्छिक्षितमाह। मुनिरिति॥ बहिः प्रसन्नः अश्वासो अंतर्गंभीरः अत एव दुर्विगाह्यः एवंभूतमतिप
रिकलयितुमशक्यः॥ अलक्ष्याभिप्रायत्वात् दुरत्ययः॥ अनतिक्रमणीयः॥ तेजस्वित्वात्॥ अंतः पारः कालदेशात् अपरिछेद्यः॥ स्व
रूपाविर्भावात्स्तिमितोदः निश्चलोदकार्णवो यथा तद्वदेतैर्गुणैर्भवेदित्यर्थः॥ ५॥ किंच वर्षासु सरिद्भिः समृद्धोपि सागरो यथा नोत्सर्पेत्
ग्रीष्मे तद्विहीनोपि न शुष्येत॥ यथा समृद्धकामस्तद्विहीनो वा न हृष्येत न शोचेदित्यर्थः॥ अत्र हेतुः॥ नारायणपरः न तु विषयपर इति॥ ६॥

रूपगंधस्पर्शशब्दरसैःपंचभिर्विषयैर्मोहिताःपतंगमधुकरगजगहरिणमीनाहताः॥ अतस्तेषुनासक्तोपंचैतेगुरवःतदुक्तं॥ कुरंगमातंगपतं
गभृंगमीनाहताःपंचभिरेवपंच॥ एकःप्रमादीसकथंनहन्यतेयःसेवतेपंचभिरेवपंच॥ तत्ररूपविलासमोहितोनश्यतीतिपतंगाच्छिक्षि
तमाह॥ दृष्ट्वेति॥ तस्याभावैःप्रलोभितः॥७॥ स्त्रियमुपलक्षणीकृत्यैतत्प्रपंचयति॥ योषिदिति॥८॥ मधुकराच्छिक्षितमाह॥ स्तोकमिति॥
गृहान्गृहस्थानन्हिंसनन्अपीडयन्॥ अयंभावः॥ यथामधुकरोविशिष्टगंधलोभेनैकस्मिन्नेवपद्मेवसन्अस्तमयेमुकुलिते
तस्मिन्बध्यते॥ एवंमुनिरपिगुणलोभेनैकमेवगृहमाश्रितःतन्मोहेनबध्यतइति॥९॥ अणुभ्यश्चेति॥१०॥ द्विविधोमधुकरः॥ मधु
दृष्ट्वास्त्रियंदेवमायांतद्भावैरजितेंद्रियः॥ प्रलोभितःपतत्यंधेतमस्यग्नौपतंगवत्॥७॥ योषिद्धिरण्याभरणांबरादिद्रव्ये
षुमायारचितेषुमूढः॥ प्रलोभितात्मात्युपभोगबुद्ध्यापतंगवन्नश्यतिनष्टदृष्टिः॥८॥ स्तोकंस्तोकंग्रसेद्ग्रासंदेहोवर्तेत
यावता॥ गृहानहिंसन्नातिष्ठेद्वृत्तिंमाधुकरींमुनिः॥९॥ अणुभ्यश्चमहद्भ्यश्चशास्त्रेभ्यःकुशलोनरः॥ सर्वतःसारमा
दद्यात्पुष्पेभ्यइवषट्पदः॥१०॥ सायंतनंश्वस्तनंवानसंगृह्णीतभिक्षितं॥ पाणिपात्रोदरामत्रोमक्षिकेवनसंग्रही॥११॥ सा
यंतनंश्वस्तनंवानसंगृह्णीतभिक्षुकः॥ मक्षिकाइवसंगृह्णन्सहतेनविनश्यति॥१२॥ पदापियुवतींभिक्षुर्नस्पृशेद्दा
रवीमपि॥ स्पृशन्करीवबध्येतकरिण्याअंगसंगतः॥१३॥ नाधिगच्छेत्स्त्रियंप्राज्ञःकर्हिचिन्मृत्युमात्मनः॥ बलाधिकैःसह
केनतिपुष्पादाच्छिद्यगृह्णातीतिमधुकरोभ्रमरः॥ मधुकरोतित्याहारत्वेनस्वरूपेणचेतिमधुमक्षिकाचतत्रप्रथमाच्छिक्षितमुक्तं॥ द्वितीया
च्छिक्षितमाह॥ सायमिति॥ सायमिदंभक्ष्यामिश्वइदंभोक्ष्यामीतिभक्षितमन्नादिनसंगृह्णीत॥ किंतुपाणिपात्रस्तन्मात्रग्राही॥ यद्वाउदर
मेवमत्रंपात्रंयस्यसः॥ एकभिक्षायामुदरमात्रग्राहीभवेत्॥ संग्रहीतुमक्षिकेवनभवतिनजीवतीत्यर्थः॥११॥ एतद्विवृणोति॥ पुनःसायंत
नमिति॥१२॥ स्पर्शासक्तिर्नाशहेतुरितिगजाच्छिक्षितमित्याह॥ पदापीति॥ पादेनापिदारवींदारुमयीमपिगजोहिकरणींप्रस्त्वर्यतृणादि
पिहितेगर्तेनिपात्यबध्यते॥१३॥ किंच॥ नाधिगच्छेदिति॥ नोपगच्छेत्॥१४॥ छ॥

॥भा॰ए॰॥
॥३३॥

स्यागभोगरहितो धनसंचयः परगामी भवतीयत्र मधुहा गुरुरित्याह ॥ नदेयमिति ॥ तद्धनं बलवान् भुंक्ते तदप्यन्यस्तद्वान्यः महुहा माक्षिकाभिः संचितं मधु यथा भुंक्ते तद्वत् ॥ ननु सुप्तं धनं कथमन्यो ज्ञास्यति हरिष्यति इतिचेत्तत्राह ॥ अर्थवित् ॥ लिंगैरर्थं तदुपायं च वेत्तीत्यर्थवित् ॥ यथा मधुहा तरुकोटरादिगतं मधु वेत्ति हरति च ॥ १५ ॥ स्वोधर्मं विनापि भोगः संभवतीत्यत्रापि स एव गुरुरित्याह ॥ सुदुःखेति ॥ आशासानामिति वक्तव्ये वर्णलोपश्चार्षः ॥ यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ ॥ तयोरन्नमदत्वा तु भुक्त्वा चान्द्रायणं चरेदिति ॥ गृहिणामावश्यकत्वेन दानविधानात् ॥ १६ ॥ हरिणाच्छिक्षितमाह ॥ ग्राम्येति ॥ मृगवद्गीतं तु शृणुयादेव ॥ मृगयोर्लुब्धकस्य ॥ १७ ॥ हरिणशब्दादेव हरिणीसुतो ऋष्यशृंगो

नदेयं नोपभोग्यं च लुब्धैर्यद्दुःखसंचितं ॥ भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु ॥ १५ ॥ सुदुःखोपार्जितैर्वित्तैराशासानां

गृहाशिषः ॥ मधुहेवाग्रतो भुंक्ते यतिर्वै गृहमेधिनां ॥ १६ ॥ ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् ॥ शिक्षेत हरिणाद्बद्धान्

मृगयोर्गीतमोहितात् ॥ १७ ॥ नृत्यवादित्रगीतानि जुषन्ग्राम्याणि योषितां ॥ आसां क्रीडनको वश्य ऋष्यशृंगो मृगीसुतः ॥ १८ ॥

जिह्वयातिप्रमाथिन्या जनो रसविमोहितः ॥ मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा ॥ १९ ॥ इंद्रियाणि जयंत्याशु निराहारा म

नीषिणः ॥ वर्जयित्वा तु रसनं तन्निरन्नस्य वर्द्धते ॥ २० ॥ तावज्जितेंद्रियो न स्याद्विजितान्येंद्रियः पुमान् ॥ न जयेद्रसनं यावज्जि

तं सर्वं जिते रसे ॥ २१ ॥ पिंगलानाम वैश्यासीद्विदेहनगरे पुरा ॥ तस्या मे शिक्षितं किंचिन्निबोध नृपसत्तम ॥ २२ ॥ ७

पिंगुरुर्ज्ञातव्य इत्याह ॥ नृत्येति ॥ वश्यो बभूवेति शेषः ॥ १८ ॥ रसासक्तिर्नाशहेतुरिति मीनाच्छिक्षितमाह ॥ जिह्वयेति ॥ अतिप्रमाथिन्यात्यतिक्षोभिकया दुर्जयया ॥ ऋच्छति प्राप्नोति ॥ बडिशैः आमिषलिप्तैर्लोहकंटकैः ॥ १९ ॥ दुर्जयत्वमुपपादयति ॥ इंद्रियाणीति द्वाभ्यां ॥ अयं भावः ॥ यद्याहारस्त्यज्यते तर्हि अन्येंद्रियजयः केवलं भवति ॥ रसनेंद्रियं तु वर्द्धते ॥ यदि च भुज्यते तर्हि पुनश्च रसासक्त्या सर्वेंद्रियक्षोभः स्यात् ॥ अतो रसासक्तिं परित्यज्यौषधवद्भुंजीतेति ॥ प्राणवृत्त्यैव संतुष्येदित्युक्तमपि रसनस्यातिदुर्जयत्वख्यापनायोचौच्यते इति विशेषः ॥ २० ॥ २१ ॥ पिंगलाया नैराश्यं शिक्षितं भिमेव कुंतद्ध्याख्यानमाह ॥ पिंगलेत्यादिना ॥ मे मया शिक्षितं ॥ २२ ॥ श्रीरामचंद्राय॰

॥राम:॥
॥३३॥

स्वैरिणीकामचारिणी॥ संकेतेरतिस्थाने॥२३॥ तान्वित्तवतःसधनानतएवशुल्कदान्मह्यंप्रदानकांतान्सुरतार्हान्॥२४॥ अपिसंभावनायां॥ अ
न्योपिमामुपैष्यतीत्येवंदुराशयायेत्युत्तरेणान्वयः॥ द्वार्यवलंबमानापुनःप्रविशतिपुनर्निर्गच्छतिएवंकुर्वतीतिनिशीथमर्द्धरात्रंप्राप॥२६॥ निर्वेदः अलंबु
द्धिः॥ वित्तचिंतैवहेतुर्यस्यसः॥२७॥ यथायथावन्ममसकाशात्शृणु॥ ननुकिंनिर्विण्णायागीतश्रवणेनतत्राह॥ हियस्मात्पुरुषस्याशापाशानांनि
र्वेदोऽसिर्यथातथाछेत्ता॥ तत्रहेतुः॥ नहीति॥ अंगहेराजन्॥२८॥ अविजितात्मत्वेहेतुः॥ याहंबालिशा॥ विवेकशून्यातस्याःकुतःयेनकारणे

सास्वैरिण्येकदाकांतंसंकेतमुपनेष्यती॥ अभूत्कालेबहिर्द्वारिबिभ्रतीरूपमुत्तमं॥२३॥ मार्गआगच्छतोवीक्ष्यपुरुषान्पुरु
षर्षभ॥ तांशुल्कदान्वित्तवतःकांतान्मेनेऽर्थकामुका॥२४॥ आगतेष्वपयातेषुसासंकेतोपजीविनी॥ अप्यन्योवित्तवान्को
पिमामुपैष्यतिभूरिदः॥२५॥ एवंदुराशयाध्वस्तनिद्राद्वार्यवलंबिनी॥ निर्गछंतीप्रविशंतिनिशीथंसमपद्यत॥२६॥ तस्या
वित्ताशयाशुष्यन्मुख्यादीनचेतसः॥ निर्वेदःपरमोजज्ञेचिंताहेतुःसुखावहः॥२७॥ तस्यानिर्विण्णचित्तायागीतंशृणुय
थामम॥ निर्वेदआशापाशानांपुरुषस्ययथाह्यसिः॥२८॥ नह्यंगाजातनिर्वेदोदेहबंधंजिहासति॥२८॥ पिंगलोवाच॥ अहोमे
मोहविततिंपश्यताविजितात्मनः॥ याकांतादसतःकामंकामयेयेनबालिशा॥२९॥ संतंसमीपेरमणंरतिप्रदंवित्तप्रदंनि
त्यमिमंविहाय॥ अकामदंदुःखभयाधिशोकमोहप्रदंतुच्छमहंभजेऽज्ञा॥३०॥ अहोमयात्मापरितापितोवृथासां
केत्यवृत्त्यातिविगर्ह्यवार्त्तया॥ स्त्रैणान्नराद्यार्थतृषोनुशोच्यात्क्रीतेनवित्तंरतिमात्मनेच्छती॥३१॥ ७ ७ ७

नअसतःतुच्छात्नरात्कामंकामये॥२९॥ बालिशात्वंप्रपंचयति॥ संतमितिचतुर्भिः॥ समीपेसंतमंतर्यामित्वात् ममपरोक्ष
मीश्वरं॥३०॥ अतिविगर्ह्याविनिंद्यायावार्त्ताजीविकातया॥ कुतःसांकेत्येनयावृत्तिःतया॥ बहुव्रीहिणास्वविशेषणंवा॥ परिता
पंप्रपंचयति॥ स्त्रैणादिति॥ स्त्रीलंपटात्॥ अयचअर्थतृषःलुब्धात् अतएवानुशोच्यात्नरात्याहंवित्तंरतिंचेच्छतीतयावृथा
त्मापरितापितः॥ केनवित्तमिच्छतीतेननरेणक्रीतेनस्वयंक्रीतेनात्मनादेहेन॥३१॥

अहोधिङ्मायाहमतिबीभत्सितंभजामीत्याह॥ यदिति॥ वंशोनामस्थूणास्तुनिहितस्तिर्यग्वेणुः वंश्यास्तस्मिन्नुभयतोनिहितावेणवः॥ अस्थिभि रेवनिर्मिताः वंशाद्योयस्मिन्तत्॥ तत्रपृष्ठेदीर्घमस्थियत्सवंशः पार्श्वस्थानिवंश्यानि॥ स्थूणाहस्तपादास्थीनि॥ तथात्वचारोमभिर्नखैश्च पिनद्धमाछादितं॥ तथापिक्षरंतिनवद्वाराणियस्मिन्तत्॥ एवंभूतागाररूपंशरीरमेतत्॥ मत्मत्तोऽन्याकावाकांतबुद्ध्याउपैतिसेवते॥ ३२ सत्संगतोस्यामप्यहोममामोहइत्याह॥ विदेहानामिति॥ याहमसतीअच्युतादन्यंकामंभोगमिछतीसा॥ ३३॥ एवंनिर्विण्णासतीअतःप रंएवंकरिष्यामीत्याह॥ सुहृदिति॥ अयमीश्वरः आत्मनैवआत्मानमेवनिवेद्यतंविक्रीयविशेषेणक्रीत्वाअनेनैवसहरमे॥ रमालक्ष्मी

यदस्थिभिर्निर्मितवंशवंश्यस्थूणंत्वचारोमनखैःपिनद्धं॥ क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णंमदुपैतिकान्या॥ ३२॥ विदेहानां पुरेह्यस्मिन्नहमेकैवमूढधीः॥ यान्यमिछत्यसत्यस्मादात्मदात्काममच्युतात्॥ ३३॥ सुहृत्प्रेष्ठतमोनाथआत्माचायंशरी रिणां॥ तंविक्रीयात्मनैवाहंरमेऽनेनयथारमा॥ ३४॥ कियत्प्रियंतेव्यभजन्कामायेकामदानराः॥ आद्यंतवंतोभार्यायादेवा वाकालविद्रुताः॥ ३५॥ नूनंमेभगवान्प्रीतोविष्णुःकेनापिकर्मणा॥ निर्वेदोऽयंदुराशायायन्मेजातःसुखावहः॥ ३६॥ मैवं स्युर्मंदभाग्यायाःक्लेशानिर्वेदहेतवः॥ येनानुबंधंनिर्हृत्यपुरुषःशममृछति॥ ३७॥ तेनोपकृतमादायशिरसाग्राम्यसंगता स्त्यक्त्वादुराशाःशरणंव्रजामितमधीश्वरं॥ ३८॥ ८ ॥यथा॥ ३४॥

अन्यस्यासेव्यत्वंदर्शयति॥ कियदिति॥ आद्यंतवंतोयेकामाःवि षयाःकामदाःनराकाराःदेवाःवा॥ कालकलिताः॥ भार्यायाःकियत्प्रियंकृतवंतःनकिंचित्॥ अतोनेहामुत्रचतद्व्यतिरिक्तःकोपिसेव्यो स्तीत्यर्थः॥ ३५॥ एवंनिश्चित्यस्वभाग्यमभिनिंदति॥ नूनमिति॥ दुष्टाआशायस्यास्तस्यामे॥ ३६॥ ननुधनाऽप्राप्त्याक्लिष्टासिकथंविष्णुः प्रीतःतत्राह॥ मैवमिति॥ मंदभाग्याचेदहंस्यांतर्ह्येवंनिर्वेदहेतवःक्लेशानस्युरित्यर्थः॥ येननिर्वेदेनअनुबंधंगृहादिकंनिर्हृत्यपरित्यज्य॥ ॥३७॥ अतस्तेनश्रीविष्णुनाऽपकृतंकृतमुपकारंनिर्वेदलक्षणं॥ ग्राम्येषुनरेषुविषयेषुवासंगता॥ ३८॥

कथंव्रजसीतदाह।संतुष्टेति।३९।ननुब्रह्मादीन्हित्वाऽमुनैवेतिकोयंनियमः तत्राह।संसारेति।मुषितेक्षणंअपहृतविवेकं।४०।तर्हिंकिमा
त्मत्राणोपायेनाभजिष्यसिन।तत्रसर्वतोनिर्विण्णभगवद्भजनेप्रवृत्तस्यात्मनएवसमर्थत्वादित्याह।आत्मैवेति।यदाएवंजगत्पश्येत्ततत
अप्रमत्तःसन्इहामुत्रभोगान्निर्विण्णेततदाहिआत्मैवात्मनोगोप्तेत्यन्वयः।अतःकेवलंप्रेम्णैभजामीतिभावः।४१।कांतस्यतर्षोऽभि
लाषःततोजातां।४२।फलितमाह।आशाहीति।४३।इतिश्रीभागवतेश्रीधरस्वामिविरचितायांभावार्थदीपिकायांअष्टमोध्यायः।।

संतुष्टाश्रद्दधत्येतद्यथालाभेनजीवति।विहराम्यमुनैवाहमात्मनारमणेनवै।३९।संसारकूपपतितंविषयैर्मुषि
तेक्षणं।ग्रस्तंकालाहिनात्मानंकोन्यस्त्रातुमधीश्वरः।४०।आत्मैवह्यात्मनोगोप्तानिर्विद्येतयदाखिलात्।अप्रमत्त
इदंपश्येद्ग्रस्तंकालाहिनाजगत्।४१।ब्राह्मणउवाच।एवंव्यवसितमतिर्दुराशांकांततर्षजां।छित्वोपशममास्थायशय्या
मुपविवेशसा।४२।आशाहिपरमंदुःखंनैराश्यंपरमंसुखं।यथासंछिद्यकांताशांसुखंसुष्वापपिंगला।४३।इतिश्री
भागवतेमहापुराणेएकादशस्कंधेयदुअवधूतसंवादेपिंगलोपाख्यानेअष्टमोध्यायः।८।।६९।।ब्राह्मणउवाच।प
रिग्रहोहितिदुःखाययद्यत्प्रियतमंनृणां।अनंतंसुखमाप्नोतितद्विद्वान्यस्त्वकिंचनः।१।सामिषंकुररंजघ्नुर्बलिनोयेनिरामि
षाः।तदामिषंपरित्यज्यससुखंसमविंदत।२।नमेमानापमानौस्तोनचिंतागेहपुत्रिणां।आत्मक्रीडआत्मरतिर्विचरामीह

नवमेकुररादिभ्योनवभ्यश्चोपशिक्षितं।श्लोकायदुःकृतार्थोऽभूदितिकृष्णेनवर्णितं।१।कुरराच्छिक्षितमाह।परिग्रहोहीति।यद्य
त्प्रियतमंतस्यतस्यपरिग्रहः।तद्विद्वान्परिग्रहोदुःखमितिविद्वान्सन्।यस्त्वकिंचनःसत्यक्तपरिग्रहःनतुदरिद्रः।१।तदाह।सा
मिषमिति।२।अर्भकाच्छिक्षामाह।नेति।गेहपुत्रिणांतद्वतांयाभवतिचिंतासाचमेनास्ति।आत्मनैवक्रीडायस्य।आत्मनिरतिःप्रीति
र्यस्यसः।३।७।।

नन्वज्ञसर्वज्ञयोः किंसादृश्यं नैश्चिंत्यं परमं सुखमित्याह। द्वाविति॥ विमुग्धः अज्ञः जडः अनुद्यमः एवंभूतो यो बालः यश्च प्रकृतेः परमीश्वरं प्रा
प्तः तौ द्वौ॥४॥ कुमार्याः शिक्षितं वक्तुमाख्यायिकामाह। क्वचिदिति द्वाभ्यां। वृणानान् स्ववरणायागतान् बंधुषु पित्रादिषु॥५॥ शंखाः शंखवल
याः महद्यथा भवति तथा स्वनं चक्रुः॥६॥ सा महती बुद्धिमती। तत्स्वयं शाल्यवहननं जुगुप्सितं दरिद्रताद्योतकं। एकैकशः क्रमेणैकमेकं ब
भंज करादपसारितवती॥७॥ निरभिदत् पृथक्कृतवती॥८॥ ननु कुमार्यास्तव च कथं संगतिः तत्राह। लोकानिति॥९॥ वास इति प्रथ

द्वावेव चिंतया मुक्तौ परमानंद आप्लुतौ। यो विमुग्धो जडो बालो यो गुणेभ्यः परं गतः॥४॥ क्वचित्कुमारी त्वात्मानं वृणानान्गृहमा
गतान्। स्वयं तानर्हयामास क्वापि यातेषु बंधुषु॥५॥ तेषामभ्यवहारार्थं शालीन्रहसि पार्थिव। अवघ्नंत्याः प्रकोष्ठस्था
श्चक्रुः शंखाः स्वनं महत्॥६॥ सा तज्जुगुप्सितं मत्वा महती व्रीडिता सती। बभंजैकैकशः शंखान् द्वौ द्वौ पाण्योरशेषयत्
॥७॥ उभयोरप्यभूद्घोषो ह्यवघ्नंत्याः स्म शंखयोः। तत्राप्येकं निरभिददेकस्मान्नाभवद्ध्वनिः॥८॥ अन्वशिक्षमिमं त
स्या उपदेशमरिंदम। लोकाननुचरन्नेतांल्लोकतत्त्वविवित्सया॥९॥ वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि। एक एव
चरेत्तस्मात्कुमार्या इव कंकणः॥१०॥ मन एकत्र संयुज्याज्जितश्वासो जितासनः। वैराग्याभ्यासयोगेन ध्रियमाणम

मांतपाठे कलहहेतुः॥ वार्ता गोष्ठी हेतुर्भवेदित्यर्थः॥१०॥ चित्तैकाग्रता द्वैतास्फूर्तिलक्षणसमाधिहेतुरिति शरस्काराच्छिक्षित
मित्याह। मन इति। तत्रोपायमाह। आसनजये श्वासजयः तस्य च जये श्वासाधीनं मनो निश्चलं भवति। ननु क्षणं निश्चलं स
दपि मनो विषयवासनया यदि विक्षिप्येत सुषुप्तौ वा सर्वथा लीयेत वा तदा किं तत्राह। वैराग्येति। वैराग्येण विक्षिप्यमाणं अ
भ्यासयोगेन लक्ष्ये ध्रियमाणं स्थिरीक्रियमाणं॥११॥ श्रीदत्तात्रेयाय नमः॥ श्रीरामचंद्राय नमः॥ श्रीदिगंबराय नमः॥७॥

एकत्रेति॥ कुत्र तदाह॥ यस्मिन्निति॥ यत्र लयविक्षेपात्मकं मनः न घेतस्मिन्परमानंदरूपे भगवति लब्धपदं सत्॥ कर्मरेणून्कर्मवासनाः मुंच
तितस्मिन्॥ ननु कर्मवासनात्यागेपि सुषुप्तिवत् लयो दुर्निवारः॥ सत्वेनेति॥ वृद्धेन उपशमात्मकेन रजस्तमसोरभावे लयविक्षेपाभावा
न्निर्वाणं अवृत्तिकं ध्येयाकारेणावस्थानमुपैति॥ कुतः अनिंधनं इंधनं गुणाः तत्कार्यं च तद्रहितं॥ तदुक्तं योगशास्त्रे॥ मनसो वृत्तिशू
न्यस्य ब्रह्माकारतया स्थितिः॥ योसंप्रज्ञातनामासौ समाधिरभिधीयते इति॥१२॥ ततश्च न द्वैतस्फूर्तिरित्याह॥ तदेति॥ बहिर्दर्शनादिना
अंतरंस्मसाइषोगतात्मा तस्य ऋजुककरणे दत्तचित्तः भेरीघोषैरतिके व्रजंतं नृपतिमपि न वेद तद्वत्॥१३॥ सर्पाधिक्षितमाह॥ एक

यस्मिन्मनो लब्धपदं पदैतद्घनैः शनैर्मुंचति कर्मरेणून्॥ सत्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिंधनं॥
॥१२॥ तदैवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा॥ यथेषुकारो नृपतिं व्रजंतमिषौ गतात्मा न ददर्श पार्श्वे॥१३॥
एकश्चार्यनिकेतः स्यादप्रमत्तो गुहाशयः॥ अलक्ष्यमाण आचारैर्मुनिरेकोल्पभाषणः॥१४॥ गृहारंभोतिदुःखाय वि
फलश्चाध्रुवात्मनः॥ सर्पः परकृतं वेश्म प्रविश्य सुखमेधते॥१५॥ एको नारायणो देवः पूर्वसृष्टं स्वमायया॥ संहृत्य
कालकलया कल्पांत इदमीश्वरः॥१६॥ एक एवाद्वितीयोभूदात्माधारोखिलाश्रयः॥ कालेनात्मानुभावेन साम्यं नीता

कचारीति॥ योगीसंमर्दत्यागे कुमारीगुरुः॥ जनसंगत्यागे सर्पः स यथा जनाशंकमान एकाकी चरति नियतनिकेतरहितश्च सदा
प्रमत्तश्च एकांतवासश्च आचारैर्गतिभिः स विशेषो निर्विशेषो वेति न लक्ष्यते च असहायश्च मितभाषी च तद्वन्मुनिर्वर्तेतेत्यर्थः॥१४॥
किंच गृहारंभ इति॥ अध्रुवात्मनः नश्वरदेहस्य सुखं यथा न भवति तथा वर्द्धते॥१५॥ कारकसामग्रीनिरपेक्षात्केवलादीश्वराद्विश्वस
ष्टिसंहारवर्णनाभिदृष्टांतेन मयासंभाताविति वक्तुं प्रथमं संहारप्रकारमाह॥ एक इति सार्द्धत्रयेण॥ एकः कारकनिरपेक्षः पूर्व
सृष्टमिदं जगत् कालकलया कालशक्त्या संहृत्य॥१६॥ एक एवाद्वितीयः सजातीयविजातीयभेदशून्योऽभूत्॥ कारणभूतासु सत्वा
दिषु शक्तिष्वपि साम्यं नीतासु सतीषु॥१७॥७॥

गुणसाम्यंप्रधानंतदुपाधिपुरुषःतयोरीश्वरःपरावराणांपरे ब्रह्मादयःअवरेअन्येचमुक्ताजीवास्तेषांरमःप्राप्यआस्ते।।कुतःकैवल्यसं
ज्ञितःमोक्षशब्दाभिधेयः।।२६।।तत्रहेतुः।।केवलेति।।निर्विषयःस्वप्रकाशःआनंदानांसंदोहःसमूहःपरमानंदरूपार्थः।।कुतःनिरुपाधि
कः।।ततश्चकेवलादिविसृष्टिंदर्शयिति।।केलेनात्मानुभावेनकालेनसूत्रंक्रियाशक्तिप्रधानंमहत्तत्वंसृजति।।जीवसंसारहेतुभूतेस
नेसृष्टेलंमाभैरितिसंबोधयति।।अरिंदमअरीन्रागादीन्दमयितुंसमर्थ।।२९।।सूत्रस्यैवव्यक्तिशब्देनोच्यमानस्यतामितिस्त्री
लिंगत्वेनपरामर्शःत्रिगुणव्यक्तिंगुणत्रयस्यकार्यं।।अतएवविश्वतोमुखंनानाविधंत्रिगुणात्मकंविश्वमहंकारद्वारेणसृजंती।।त्रि
सत्वादिष्वादिपुरुषःप्रधानपुरुषेश्वरः।।परावराणांपरमआस्तेकैवल्यसंज्ञितः।।२८।।केवलानुभवानंदसंदोहो
निरुपाधिकः।।२८।।केवलात्मानुभावेनस्वमायांत्रिगुणात्मिकां।।संक्षोभयन्सृजसादौतयासूत्रमरिंदम।।२९।।
तामाहुस्त्रिगुणव्यक्तिंसृजतींविश्वतोमुखं।।यस्मिन्प्रोतमिदंविश्वंयेनसंसरतेपुमान्।।२०।।यथोर्णनाभिर्हृद
यादूर्णांसंतत्यवक्त्रतः।।तयाविहृत्यभूयस्तांग्रसत्येवंमहेश्वरः।।२१।।यत्रयत्रमनोदेहीधारयेत्सकलंधिया।।स्नेहाद्द्वेषाद्भ
गुणकार्यस्यसूत्रसंज्ञायांकारणमाह।।यस्मिन्निति।।कारणभूतेसमष्टिरूपेयस्मिन्निदंविश्वंप्रोतंग्रथितं।।वायुर्वैगौतमतत्सूत्रं
वायुनावैगौतमसूत्रेणायंचलोकःपरश्चलोकःसर्वाणिचभूतानिसंदृब्धानीतिश्रुतेः।।येनवाय्वात्मप्राणरूपेणजीवःसंसरतीति।
२०।।तदेवंशिक्षितमर्थमुक्त्वादृष्टांतमाह।।यथेति।।हृदयादुद्धृतांवक्त्रतःवक्त्रेणसंततप्रसार्यविहृत्यक्रीडित्वा।।२१।।भगवद्ध्या
नपराणांतत्सारूप्यंनचित्रमितिपेशस्कृतोभ्रमरविशेषात्।।ज्ञातमित्याह।।यत्रयत्रेति।।सकलमेकाग्रं।।२२।।श्रीराम
चंद्रायनमः।।श्रीदत्तात्रयायनमः।।श्रीकृष्णायपरमात्मनेनमः।।श्रीदत्तदिगंबरायनमः।।श्रीदत्तात्रयायनमः।।श्री।।१

कुड्यां प्रवेशितः निरुद्धः भयेन ध्यायन्। सात्मतां तत्सारूप्यं॥ सात्म्यतामिति पाठे त्वार्षता। पूर्वरूपमसंत्यजन् नित्यस्यायमभिप्रायः॥ यदेते नैव देहेनान्यसारूप्यं दृश्यते तदा किं वक्तव्यं देहांतरेण सारूप्यं घटत इति॥२३॥ स्वदेहादेव शिक्षितमाह। स्वात्मनो देहाच्छिक्षितं॥२४॥ गुरुत्वे हेतुः॥ विरक्तिविवेकयोर्हेतुः॥ विरक्तिहेतुत्वमाह। सत्वनिधनं उत्पत्तिविनाशौ बिभ्रत्स्म॥ किंच सततं संततं आर्तः दर्कं दुःखमेवोत्तरफलं बिभ्रत्॥ यद्वा सततार्त्तिरेव उदर्कं उत्तरफलं यस्य तत् सत्वनिधनं बिभ्रत्॥ विवेकहेतुत्वमाह। तत्वानीति॥ यथाय यथावत्॥ एवं सूपकारित्वेपि देहे नैवास्था कर्त्तव्येत्याह॥ पारक्यं श्वसृगालादिभक्ष्यमिति निश्चितवान्॥२५॥ सततार्त्तोदर्कतां प्रपंचयति॥ जायेति द्वाभ्यां

कीटः पेशस्कृतं ध्यायन्कुड्यां तेन प्रवेशितः॥ याति तत्सात्मतां राजन्पूर्वरूपमसंत्यजन्॥२३॥ एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः॥ स्वात्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो॥२४॥ देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्वनिधनं सततार्त्युदर्कं॥ तत्वान्यनेन विमृशामि यथा तथापि पारक्यमित्यवसितो विचराम्यसंगः॥२५॥ जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षया वितन्वन्॥ स्वांते सकृच्छ्रमवरुद्धधनः स देहः सृष्ट्वास्य बीजमवसीदति वृक्षधर्मः॥२६॥ जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित्॥ घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य

यस्य देहस्य प्रियचिकीर्षया भोगसंपादनेच्छया जायादिवर्गान्वितन्वन्पुष्णाति पुरुषः॥ कथंभूतः॥ सकृच्छ्रं यथा भवति तथाऽवरुद्धानि संचितानि धनानि येन सः॥ देहविशेषणं वा॥ स देहः स्वांते स्वस्यायुषोंते अवसीदति नश्यति॥ किंच देहनाशेपि न दुःखस्य समाप्तिरित्याह। अस्य पुरुषस्य देहांतरं बीजं सृष्ट्वेति। वृक्षस्येव धर्मो यस्य सः॥२६॥ किंच जिह्वेति॥ अमुं देहं तदभिमानिनं पुरुषं वा॥ एकतः एकं प्रति जिह्वा अपकर्षति आच्छिनत्ति॥ कर्हि कदाचित् तर्षा पिपासा जलं प्रति शिश्नो व्यवायं प्रति॥ त्वक् स्पर्शं प्रति॥ उदरं अन्नमात्रं प्रति॥ श्रवणं शब्दं प्रति॥ घ्राणं गंधं प्रति॥ चपलदृक् रूपं प्रति॥ क्व च क्वचित् स्वस्वविषयं प्रति कर्मशक्तिः॥ अन्यदपि कर्मेंद्रियं तु नंति शोटयंति॥२७

तदेवं देहो गुरुरित्यादिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्य देहस्य दुर्लभत्वं दर्शयन्नीश्वरनिष्ठां विधत्ते॥ सृष्ट्वेति द्वाभ्यां॥ पुराणि शरीराणि॥ पुरुषं पुरुषदेहं ब्रह्मणोवलोको यस्य परोक्षाय धिषणा बुद्धिर्यस्मिन् तं॥ तदुक्तं॥ तासामेषैव पौरुषी प्रियेति॥ श्रुतिश्च॥ पुरुषत्वे चाविस्तरामात्मेत्यादि॥ ईश्वरो हि करणाधिष्ठात्रीरग्न्यादिदेवता वागादिभिः सह सृष्टवान्॥ ताश्च तं प्रति भोगार्थं शरीरमयाचंत स च ताभ्यो गोशरीरमश्वशरीरं यथाक्रममानीतवान्॥ ततस्ता देवताः सोऽब्रवीद्यथायतनं चक्षुरादिस्थानं अस्मिन् देहे प्रविशतेति॥ तदाह ताभ्य इत्यादि॥ तथा ताभ्यो गामानयत्ता अब्रुवन्नैव नो यमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्नैव नो यमलमिति ताभ्यः पुरुषमानयत्ता अब्रु

सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान् सरीसृपपशून् खगदंशमत्स्यान्॥ तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः॥ २८॥ लब्ध्वा सुदुर्लभमिदं बहुसंभवांते मानुष्यमर्थदमनित्यमपीह धीरः॥ तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात्॥ २९॥ एवं संजातवैराग्यो विज्ञानालोक आत्मनि॥ विचरामि महीमेतां मुक्तसंगोऽनहंकृतिः॥ ३०॥ न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलं॥ ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः॥ ३१॥ ७. ७.

वन्मुक्तत्वं बतेति च॥ २८॥ तस्माद्बहूनां संभवानां जन्मनामंते मानुष्यमनित्यमप्यर्थदं पुरुषार्थप्रापकं दैवाल्लब्ध्वा इदं अनुमृत्यु अनुनिरंतरं मृत्युरेवायस्य तत्॥ यावन्न पतेत्तावदेव तूर्णं शीघ्रं निःश्रेयसाय यतेत॥ विषयः पुनः पुनः सर्वतः पश्वादियोनिष्वपि स्यादेव॥ २९॥ तदेवं हेयोपादेयविवेकं बहुधा निरूप्यस्ववीयदुक्तं चं तु कस्मात्कविर्दक्ष इत्यादि तत्रोत्तरमाह॥ एवमिति॥ एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवालोकः प्रदीपो यस्य सः॥ सप्तम्यंतं वा॥ आत्मविशेषणे॥ आत्मनिस्थित एव महीं विचरामि॥ ३०॥ ननु किं बहुभिर्गुरुभिः न हि श्वेतकेतुभृग्वादिप्रमुखैर्बहवो गुरवः आश्रिताः तत्राह॥ न ह्येकस्मादिति॥ बहुधा सप्रपंचं निष्प्रपंचं भेदाभेदादिभिश्चायं भावः॥ नैते परमार्थोपदेशगुरवः किंत्वन्वयव्यतिरेकाभ्यामात्मन्यसंभावनादिमात्रनिवर्तकाः॥ तेषां च बहुत्वं युक्तमेवेति॥

ज्ञानप्रदं तु गुरुमेकमेव वक्ष्यति॥ मदभिसंगुरुंस्तां तमुपासीतेति॥ उक्तं च॥ तस्मात् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तममिति॥ ३२॥

विप्रोदत्तात्रेयः योगर्द्धिमापुरुमयीयदुहैहयाद्याः उक्तत्वात्॥ यथागतंतथैवयदृच्छयायायाविसृर्यः॥ ३२॥ भगवान्स्वीयंब्रह्मविकुलमितिम्ब्राघते॥ नः पूर्वेषांपूर्वजः इति॥ अत्रसंग्रहश्लोकाः॥ कपोतमीनहरिणकुमारीगजपन्नगाः॥ कुरंगः कुररश्चाष्टौहेयार्थेगुरवोमताः॥ मधुकृन्मधुहर्ताचपिंगलाचयोस्त्रयः॥ उपादेयार्थविज्ञानेरोषाः पृथ्व्यादयोमताः॥ तस्वांतरभेदश्चातत्रतत्रस्फुटीकृतः॥ अध्यायत्रितयेचाष्टनवाशीरिताःक्रमात्॥ ३३॥ इतिश्रीभागवतेएकादशस्कंधेनवमोऽध्यायः॥ ९॥ ७॥ चतुर्विंशतिगुर्वाख्यालब्धसंभावनाभुवः॥ उद्धवस्यात्मतत्वेप्सासाधनोक्तिरतःपरे॥ १॥ दशमेदेहसंबंधात्संसृतिर्नात्मनःस्वतः॥ इयेतद्वर्णयामासमतांतरनिरासतः॥ २॥ तदेवमन्वयव्यतिरे

॥ श्रीभगवानुवाच॥ इत्युक्तास्यदुविप्रस्तमामंत्र्यगभीरधीः॥ वंदितोऽभ्यर्चितोराज्ञायायौप्रीतोयथागतं॥ ३२॥ अवधूतवचःश्रुत्वापूर्वेषांनःसपूर्वजः॥ सर्वसंगविनिर्मुक्तःसमचित्तोबभूवह॥ ३३॥ इतिश्रीभागवतेएकादशस्कंधेउद्धवायश्रीकृष्णेनोक्तअवधूतयदुसंवादेनवमोध्यायः॥ ९॥ ७॥ ७॥ श्रीभगवानुवाच॥ मयोदितेष्ववहितःस्वधर्मेषुमदाश्रयः॥ वर्णाश्रमकुलाचारमकामात्मासमाचरेत्॥ १॥ अन्वीक्षेतविशुद्धात्मादेहिनांविषयात्मनां॥ गुणेषुतत्वध्यानेनसर्वारंभविपर्ययं॥ २॥ सुप्तस्यविषयालोकोध्यायतोवामनोरथः॥ नानात्मकत्वाद्विफलस्तथाभेदात्मधीर्गुणैः॥ ३॥ ७॥ ७॥

काभ्यामुत्पन्नविवेकज्ञानस्यतत्त्वज्ञानायादितआरभ्यसाधनान्युपदिशति॥ भगवान्॥ मयेति॥ मयापंचरात्राद्युक्तवैष्णवधर्मेष्ववहितअप्रमत्तःसन्तदविरोधेनवर्णाद्याचारमनुतिष्ठेत्॥ १॥ कथमकामात्मतासंभवतितत्राह॥ अन्वीक्षेतेति॥ स्वधर्मेर्विशुद्धचित्तःसन्देहिनांविषयेषुसत्याभिनिवेशेनयेसर्वेआरंभास्तेषांफलेवैपरीत्यंपश्येत्॥ एवंफलवैपरीत्यादकामःस्यात्॥ २॥ किंचकाम्यविषयाणांमिथ्यात्वात्पीत्याह॥ सुप्तस्येति॥ विफलःअर्थश्चन्यः॥ अत्रैवंप्रयोगः॥ इंद्रियैर्याबहिर्नानाबुद्धिःसाविफला॥ नानात्मकत्वादैंद्रियकत्वाच्चमनोजन्यस्वप्नमनोरथवदिति॥ ३॥ ७॥

॥भा॰ए॰॥

॥३९॥

मोक्षार्थी न प्रवर्त्तेत तत्र काम्यनिषिद्धयोः॥ नित्यनैमित्तिके कुर्यात्प्रत्यवायजिघांसयेति स्मृतेः॥ अतः प्रवृत्तं काम्यं कर्म त्यजेत्॥ निवृत्तं नित्यनै
मित्तिकमेव कुर्यात्॥ आत्मविचारे तु सम्यक्प्रवृत्तो निवृत्तकर्मचोदनामपि नाद्रियेत॥४॥ यमादीनहिंसादीनभीक्ष्णमादरेण सेवे
त॥ शौचादींस्तु नियमान्क्वचित्॥ यथाशक्ति तदात्मज्ञानाविरोधेन यमान्दश नियमांश्चैकोनविंशाध्याये वक्ष्यति॥ किंच यमेष्व
प्यादरं परित्यज्य गुरुमुपासीतेत्याह॥ मदभिज्ञमिति॥ मदात्मकं मद्रूपं॥५॥ गुरुसेवकस्य धर्मानाह॥ अमानीति॥ दक्षः अनलसः
निर्ममः जायादिषु ममताशून्यः॥ गुरौ तु दृढसौहृदः॥ असत्वरः॥ अव्यग्रः अमोघवाक् व्यर्थालापरहितः॥ एतान्येव शिष्यस्य लक्ष

निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत्॥ जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदनां॥४॥ यमानभीक्ष्णं सेवेत नियमा
न्मत्परः क्वचित्॥ मदभिज्ञं गुरुं शांतमुपासीत मदात्मकं॥५॥ अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः॥ असत्व
रोर्थजिज्ञासुरनसूयुरमोघवाक्॥६॥ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु॥ उदासीनः समं पश्यन्सर्वेष्वर्थमि
वात्मनः॥७॥ विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक्॥ यथाग्निर्दारुणो दाह्याद्दाहकोन्यः प्रकाशकः॥८॥छ॥

णानि ज्ञेयानि॥६॥ ननु स्वजायादिषु कथं निर्ममः स्यात्तत्राह॥ जायेति॥ औदासीन्यहेतुं विवेकं दर्शयति॥ आत्मनोर्थः
प्रयोजनं सर्वत्र सममिव पश्यन्निति॥ अयं भावः॥ सर्वदेहेष्वात्मन एव समत्वाज्जायादिदेहे अन्यस्मिन्देहे च आत्मनोर्थः
सुखादिः सम एव॥ केन विशेषेण तेष्वेव॥ ममत्वाभिनिवेशः इत्येवमुदासीनः सन्गुरुं प्रपद्येतेति॥७॥ अहो कोसौ देहव्यतिरि
क्त आत्मा॥ यस्यैक्यादर्थः सर्वेषु समः स्यात्तमाह॥ विलक्षण इति॥ स्थूलसूक्ष्मदेहद्वयादात्मान्यः यतो विलक्षणः द्वेधा वैलक्ष
ण्यं दर्शयति॥ ईक्षिता स्वदृगिति॥ द्रष्टा हि दृश्याद्विलक्षणः स्वप्रकाशश्च जडाद्विलक्षणः॥ तयोरन्यत्वे दृष्टांतः॥ यथाग्निर्दाहकः प्रका
शकश्च॥ दाह्यात्प्रकाश्याच्च दारुणः काष्ठादन्यस्तद्वदिति॥८॥छ॥

॥राम॥

॥३९॥

अनेनैवदृष्टांतेन नित्यत्वानादित्वविभुत्वैकत्वादयोपिसिध्यंतीत्याह॥ निरोधेति॥ यथाच दारुष्वंतःप्रविष्टोऽग्निस्तत्कृतान्नाशादीन्प्राप्नो
ति॥ नतुस्वतोनाशादिमान्॥ एवंदेहगुणाननित्यत्वादीन् देहात्परोनित्यादिस्वरूपोप्यात्मानुभवतितितस्मानित्यत्वादिभिरपिवैल
क्षण्यादन्यत्वमितिभावः॥ ९॥ नन्वग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वंघटते॥ आत्मनस्त्वसंगत्वात्कथंदेहेनतद्धर्मैर्वासंबंधः॥ संबं
धेवाकुतस्तन्निवृत्तिस्तत्राह॥ योसाविति॥ पुरुषस्येश्वरस्याधीनैर्मायागुणैर्योसौसूक्ष्मःअयंचस्थूलोदेहोविरचितःपुंसो
जीवस्यायंसंसारः तन्निबंधनस्तदध्यासकृतः॥ हियस्मादेवंतस्मादात्मविद्यातन्निवर्तकेत्याह॥ आत्मनोविद्याविज्ञानंतस्य
च्छित् छेत्री॥ आछिदितिवाछेदः॥ १०॥ यस्मादेवंतस्माज्जिज्ञासयाविचारेणआत्मस्थंआत्मनिकार्यकारणसंघातएवस्थितं

निरोधोस्यत्पणुवृहन्नानात्वंतत्कृतान्गुणान्॥ अनुप्रविष्टआधत्तेएवंदेहगुणान्परः॥ ९॥ योसौगुणैर्विरचितोदे
होयंपुरुषस्यहि॥ संसारस्तन्निबंधोयंपुंसोऽविद्याच्छिदात्मनः॥ १०॥ तस्माज्जिज्ञासयात्मानमात्मस्थंकेवलंपरं
संगम्यनिरसेदेतद्वस्तुबुद्धिंयथाक्रमं॥ ११॥ आचार्योरणिराद्यःस्यादंतेवास्युत्तरारणिः॥ तत्संधानंप्रवचनंविद्यासं

सम्यक्ज्ञात्वाएततएतस्मिन्देहादौवस्तुबुद्धिंस्थूलसूक्ष्मक्रमेणनिरसेत्त्यजेत्॥ ११॥ गुरोर्लब्धाविद्याअविद्यातत्कार्य
निरसनक्षमेतिस्फुटीकर्तुमग्न्युत्पत्तिरूपकेणनिरूपकेणनिरूपयति॥ आचार्यइति॥ आद्यः अधरः तत्संधानंतयोर्म
ध्यमंमंथनकाष्ठंप्रवचनमुपदेशः॥ विद्यातुसंधिःसंधौभवन्त्यग्निरिव॥ तथाचश्रुतिः॥ आचार्यःपूर्वरूपंअंतेवास्यु
त्तररूपं॥ विद्यासंधिःप्रवचनंसंधानमिति॥ १२॥ अग्निसाधर्म्यमेवाह॥ वैशारदीऽतिनिपुणःतेनशिष्येणप्राप्तात
न्गुरुणाउपदिष्टावाअतिविशुद्धबुद्धिःगुणकार्यरूपांमायांनिवर्त्तयति॥ यदात्मकाःमेतदिश्वंजीवस्यसंसृतितिमितंतां

नगुणांश्चदग्ध्वाअसमित्।।निरंधनःतस्मात्कार्येणकारणेनविषयाच्चव्यवधानाभावात्साक्षात्परमानंदरूपोभवतीति।।२३।।ए
वंतावत्स्वप्रकाशज्ञानस्वरूपोनित्यएकएवात्माकर्तृत्वादयश्चधर्मास्तस्यदेहोपाधिकाः।।तद्व्यतिरिक्तंचसर्वमनित्यंमायामयं
च।अतःसर्वतोविरक्तःसन्नात्मज्ञानेनमुच्यइत्युक्तंविलक्षणःस्थूलसूक्ष्मादित्यादिना।।तदेवंश्रुतिसमन्वयेननिर्णितेप्यर्थेम
तांतरविरोधेनसंदेहोमाभूदिति।तन्मतंनिराकर्त्तुमुद्भावयति।।अथेति।।अथमन्यसेयेषांजीवात्मनांकर्मकर्तृणांसुखदुःख
योःभोक्तृणांचनात्मत्वमितिएवंहिजैमिनीयाःमन्यंते।।अहंप्रत्ययविज्ञेयएवात्मासचप्रतिशरीरंभिन्नःकर्त्ताभोक्तृरूपश्च
नतुतत्स्वरूपभूतोनिर्विकारएकःपरमात्मास्तीति।।यथाहुः।।अहंप्रत्ययविज्ञेयांज्ञातव्यःसर्वदैवहीति।।यथावैराग्यंचन

वैशारदीसाऽतिविशुद्धबुद्धिर्धुनोतिमायांगुणसंप्रसूतां।।गुणांश्चसंदह्ययदात्ममेतत्स्वयंचशाम्यत्यसमिध
याऽग्नि।।२३।।अथैषांकर्मकर्तृणांभोक्तृणांसुखदुःखयोः।।नानात्वमथनित्यत्वंलोककालागमात्मनां।।२४।।म
न्यसेसर्वभावानांसंस्थाह्यौत्पत्तिकीयथा।।तत्तदाकृतिभेदेनजायतेभिद्यतेचधीः।।२५।।

संभवति।तथाहि।।भोगस्थानानांअनित्यत्वाद्वैराग्यंभवेत्।।भोगकालस्यवा।।तदुपायकर्मबोधकागमस्यवाभोक्तुरात्मनो
वानात्वेतदस्तीत्याह।।अथनित्यत्वंलोककालागमात्मनामन्यसइति।।२६।।नचसर्वभोग्यानांविच्छेदात्मायामयत्वाद्वैराग्यंस्या
दित्याह।।सर्वभावानांस्रक्चंदनादीनांसंस्थास्थितिःऔत्पत्तिकीप्रवाहरूपेणनित्या।।तथाचवदंति।।नकदाचिदनीदृशंज
गदिति।।अतस्तत्कर्त्ताकश्चिदीश्वरोपिनास्तीतिभावः।।यथाययावत्तनुमायामयीत्यर्थः।।नचात्मस्वरूपभूतंनित्यमेकंज्ञा
नमस्तीत्याह।।तत्तदितिघटपटाद्याकारभेदेनधीर्जायते।।अतोऽनित्याभिद्यतेच।।अयंगूढोऽभिप्रायः।।नहिनित्यज्ञानस्व
रूपआत्मा।।अपितुज्ञानपरिणामवान्।।नचविकारित्वेनानित्यत्वप्रसंगः।।यथाहुः।।विक्रियाज्ञानरूपस्यननित्यत्वंविरोत्स्य

तइति।।अतोमुक्ताविंद्रियरहितस्यपरिणामासं
भवाज्जडत्वेनतत्प्राप्तुरपुरुषार्थत्वात्प्रवृत्तिरेव
श्रेयसीननिवृत्तिरिति।।५।।

तत्रतावदुक्तमंगीकृत्यवैराग्योपपादनायप्रवृत्तिमार्गस्यानर्थहेतुत्वंप्रपंचयति॥एवमपीत्यादिना॥लोकनांलोकपालानामित्यतःप्रा
क्तनेनग्रंथेनअंगहेउद्धव॥कालावयवतःसंवत्सरादिरूपात्॥१६॥अत्रापीति॥स्वातंत्र्यपक्षेदुष्कर्मणोदुःखभोगस्यवासंभवादि
त्यर्थः॥१७॥ननुयेसम्यक्कर्मकर्तुंजानंतितेसुखिनएवयेतुनजानंतितएवदुःखिनःइतिचेत्तत्राह॥नेति॥विदुषामपिकिंचित्सु
खंनविद्यतेतथाचमूढानामपिदुःखंनविद्यते॥अतोवयंकर्मकुशलत्वात्सुखिनइतितेषांकेवलंव्यर्थएवाहंकारइत्यर्थः॥१८॥अंगी
कृत्यापीत्याह॥यदीति॥तंयोगमुपायंनविदुर्यथासाक्षान्मृत्युर्नभवेत्॥१९॥तथापियावज्जीवंसुखंभविष्यतीतिचेत्तन्नेत्याह॥यथा॥

एवमप्यंगसर्वेषांदेहिनांदेहयोगतः॥कालावयवतःसंतिभावाजन्मादयोऽसकृत्॥१६॥अत्रापिकर्मणांकर्तुरस्वातं
त्र्यंचलक्ष्यते॥भोक्तुश्चदुःखसुखयोःकोन्वर्थोविवशंभजेत्॥१७॥नदेहिनांसुखंकिंचिद्विद्यतेविदुषामपि॥तथा
चदुःखंमूढानांवृथाहंकरणंपरं॥१८॥यदिप्राप्तिंविघातंचजानंतिसुखदुःखयोः॥तेप्यद्धानविदुर्योगंमृत्युर्नप्रभ
वेद्यथा॥१९॥कोन्वर्थःसुखयत्येनंकामोवामृत्युरंतिके॥आघातंनीयमानस्यवध्यस्येवनतुष्टिदः॥२०॥श्रुतंचदृष्टवद्दु
ष्टंस्पर्द्धासूयात्ययव्ययैः॥बव्हंतरायकामत्वात्कृषिवच्चापिनिष्फलं॥२१॥अंतरायैरविहतोयदिधर्मःस्वनुष्ठितः॥तेनापिनि

तिकेवर्तमानोमृत्युर्नतुष्टिंददाति॥आघातंवधस्थानंप्रति॥२०॥एवमस्मिन्लोके र्जितंस्थानंयथागच्छतितच्छृणु॥२२॥
सुखंनास्तीत्युक्त्वालोकांतरेपितथैवेत्याह॥श्रुतमिति॥श्रुतंस्वर्गादितदपिदुष्टं॥स्पर्द्धापरसुखासहनं॥असूयापरगुणेषुदोषावि
ष्करणं॥अत्ययोनाशःव्ययोऽपक्षयःतैर्दुष्टं॥यद्वाव्ययोनाशःअत्ययोऽन्यस्यातिशयःतंदृष्ट्वातदप्राप्त्यादुःखमित्यर्थः॥किंचबह्वंत
रायवैगुण्यादिरूपाविघ्नायस्मिन्॥कामसुखंतस्यभावस्तत्वंतस्मात्कृषिर्यथावकुविघातवत्॥बहुसुखत्वेनश्रुतमपिनिष्फलं॥
२१॥विघ्नवैगुण्याद्यभावमंगीकृत्यापिनाशदुःखंदुःपरिहरमित्याह॥अंतरायैरितिपंचभिः॥निर्जितंसाधितं॥२२॥श्रीराम०॥

यजैर्देवताईष्ट्वादिरूपाछ्वा॥२३॥स्वपुण्यैरुपचितेसर्वभोगसंपन्नेदेवीनांमध्येविहरन्गंधर्वैरुपगीयते॥२४॥कामेनउद्भयागछताविमाने
नकिंकिणीजालमालिनास्तुरूघंटिकासमूहशोभिनासहस्त्रीभिःसुराक्रीडेषुनंदनादिषुक्रीडन्नात्मपातंवेद॥२५॥कालेनचालितःपति
तः॥२६॥प्रवृत्तिर्द्विविधा॥विधिमनुसारेणकाम्यकर्मणिवातल्लंघनेनाधर्मेवातत्रकाम्यकर्मप्रवृत्तेर्गतिरुक्ता॥अधर्मप्रवृत्तेर्गतिमा
ह॥यदीति॥यदिचेदयमनयः॥अजितेंद्रियत्वात्कामात्मा॥अतःकृपणःअतोलुब्धोभोगतृष्णाकुलःअतःस्त्रैणःस्त्रीलंपटःतस्यैर्भूत

इष्ट्वेहदेवतायज्ञैःस्वर्लोकंयातियाज्ञिकः॥भुंजीतदेववत्तत्रभोगान्दिव्यान्निजार्जितान्॥२३॥स्वपुण्योपचितेशुभ्रेविमा
नउपगीयते॥गंधर्वैर्विहरन्मध्येदेवीनांहृद्यवेषधृक्॥२४॥स्त्रीभिःकामगयानेनकिंकिणीजालमालिना॥क्रीडन्न
वेदात्मपातंसुराक्रीडेषुनिर्वृतः॥२५॥तावत्प्रमोदतेस्वर्गेयावत्पुण्यंसमाप्यते॥क्षीणपुण्यःपतत्यर्वागनिच्छन्का
लचालितः॥२६॥यद्यधर्मरतःसंगादसतांचाजितेंद्रियः॥कामात्माकृपणोलुब्धःस्त्रैणोभूतविहिंसकः॥२७॥प
शूनविधिनालभ्यप्रेतभूतगणान्यजन्॥नरकानवशोजंतुर्गत्वायात्युल्बणंतमः॥२८॥कर्माणिदुःखोदर्काणिकुर्वन्दे
हेनतैःपुनः॥देहमाभजतेतत्रकिंसुखंमर्त्यधर्मिणः॥२९॥लोकानांलोकपालानांमद्भयंकल्पजीविनां॥ब्रह्मणोपिभयंम

तविहिंसकः॥२७॥किंचदुष्टजनाप्रलोभितोधनाद्यर्थंपशूनविधिनाहत्वातमःस्थावरतांयाति॥२८॥एवंकर्मसुप्रवृत्तस्यनसु
खंनचनिवृत्तिरित्युपसंहरति॥कर्माणीति॥२९॥तथापिलोकानांनियत्वात्मर्त्यधर्मताचलोकपालानांसुखमस्तीतिचेत्तत्राह
लोकानामिति॥द्वैपरार्द्धौपरमायुर्यस्यतस्यब्रह्मणोपि॥तथाश्रुतिः॥भीषास्माद्वातःपवतेभीषोदेतिसूर्यः॥भीषास्मादग्निश्
चेंद्रश्चमृत्युर्धावतिपंचमइतिअतःप्रवृत्तिमार्गस्यैवानर्थहेतुत्वाद्धिरस्यात्ततोनिवृत्तिरेवयुक्तेतितात्पर्यार्थः॥३०॥श्रीयम

एतेनैवस्वयमीश्वरत्वाविष्कारेणेश्वराभावांगिकारः परित्यक्तः।। अन्यदपिप्रौढ्यापूर्वमंगीकृतं निराकरोति।। चतुर्भिः।। तत्रयदुक्तं कर्तृभो
क्तृरूप एवात्मेति तन्निराकरोति।।गुणाइति।।गुणाइंद्रियाणि कर्माणि सृजंति नत्वात्मा आत्मैवेंद्रियाणि प्रवर्त्तयन्कर्माणि करोतीति चेन्नेत्याह।।गु
णाइति।।सत्वादिगुणानिंद्रियाणि अनुसृजंते प्रवर्त्तयंति नत्वात्मा।। अतः कर्तृत्वं तावन्नास्ति।।भोक्तृत्वमप्यौपाधिकमित्याह।।जीवस्त्विति।।
गुणसंयुक्तइंद्रियादिसंयुक्तः।।कुतइत्यतआह।।असौतेषुअहंकारवानित्यर्थः।।३१।।यच्चोक्तमात्मनोनानात्वं तदप्यौपाधिकमित्याह।।
यावत्स्यादिति।।गुणानांवैषम्यमहंकारादिकार्यरूपं।।नन्वात्मन एकत्वेकथंपारतंत्र्यमुक्तं।।कथंवालोकपालादीनामपिनमद्भ्यमि

गुणाः सृजंति कर्माणि गुणोनुसृजते गुणान्।। जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफलान्यसौ।।३१।। यावत्स्याद्गुणवैषम्यं तावन्ना
नात्वमात्मनः।। नानात्वमात्मनो यावत्पारतंत्र्यं तदैव हि।।३२।। यावदस्यास्वतंत्रत्वं तावदीश्वरतो भयं।। यएतत्समुपासी
रंस्ते मुह्यंति शुचार्पिताः।।३३।। कालआत्मागमो लोकः स्वभावो धर्मएव च।। इतिमां बहुधा प्राहुर्गुणव्यतिकरे सति।।३४।।
उद्धव उवाच।। गुणेषु वर्त्तमानोपि देहजेष्वनपावृतः।। गुणैर्न बध्यते देही बध्यते वा कथं विभो।।३५।। छ छ छ छ छ

स्तंतत्राह।।नानात्वमिति।।३२।।यच्चगदमभिप्रेतंप्रवृत्तिरेवश्रेयसीतितत्राह।।यएतदिति।।एतद्गुणवैषम्यंतत्कृतंभोगंकर्मचेय
र्थः।।उपासीरन्सेवेरन् लोकादीनामतिसत्वाच्छुचार्पिताः प्रोताः संतोमुह्यंति।।३३।।नकेवलमनित्यत्वमात्रंकिंतुमायामयत्वमपीत्याह।।
कालइति।।स्वभावोदेवत्वादिपरिणामहेतुः धर्मस्तद्भोगकारणं।।गुणव्यतिकरेमायाक्षोभेसतिमामेवप्राहुः।।नतुमद्व्यतिरिक्ताः संति।।ततो
निवृत्तिरेवमुक्तिहेतुत्वाच्छ्रेयसीतिसिद्धं।।३४।।एवंतावदेकएवात्मातस्यचगुणकार्यदेहसंबंधंकृतः संसारः आत्मज्ञानाच्चमुक्तिरित्यु
क्तं।।विलक्षणः स्थूलसूक्ष्मादित्यादिना।।तदेवचमतांतरनिरासेनदृढीकृतं।।अथैषामित्यादिना।।तत्रपृच्छति।।गुणेष्विति।।अयमर्थः
गुणेष्वसत्सुमुक्तिः सत्स्वेववा।।आद्येज्ञानसाधनाभावान्नमुक्तिः।।द्वितीयेचगुणेषुवर्त्तमानोपितत्कार्यदेहजेषुकर्मसुसुखादिषुबक

धैर्बध्यते।।तथापितैरात्माकावत्याल्लवबध्यत इति व
नादिबंधो नसंभवतीत्याह।।अत्रपारः कथवध्यत इति।।७।।

यदि तु सत्त्वेन तदहंकारेण बध्यते तन्निवृत्त्या च मुच्यते इति मतं तर्हि किं यज्ज्ञातव्यमिति पृच्छति ॥ बद्धो मुक्तो वा कथं वर्तेतेत्यादि ॥ किं भुंजीत कथं भुं
जीतेत्यर्थः ॥ ३६ ॥ एतत् एतद्द्विषयं प्रश्नं ॥ किंच एक एवात्मा ऽनादिगुणसंबंधान्नित्यबद्धः मुक्तेर्जन्यत्वे ऽनित्यत्वप्रसंगान्नित्यमुक्त इत्यप्युभयं गी
कार्यं स्यात् तत्र भ्रमो भवतीत्याह ॥ नित्यबद्ध इति ॥ ३७ ॥ इति एकादशे दशमः ॥ १० ॥ ७ ॥ एकादशे तु बद्धानां मुक्तानां चाथ लक्षणं ॥
साधूनां च तथा भक्तेर्लक्षणं हरिणेरितं ॥ १ ॥ नित्यबद्धो नित्यमुक्त एक एवेति मे भ्रम इति यदुक्तं तत्किं वस्तुविरोधात्प्रतीतो वा ऽन्या

कथं वर्तेत विहरेत्कैर्वा ज्ञायेत लक्षणैः ॥ किं भुंजीतोत विसृजेच्छयीतासीत याति वा ॥ ३६ ॥ एतदच्युत मे ब्रूहि प्रश्नं प्रश्नवि
दांवर ॥ नित्यमुक्तो नित्यबद्ध एक एवेति मे भ्रमः ॥ ३७ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसं
वादे दशमो ऽध्यायः ॥ १० ॥ ७ ६७ श्रीभगवानुवाच ॥ बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ॥ गुणस्य मायाम
लत्वान्न मे मोक्षो न बंधनं ॥ १ ॥ शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया ॥ स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्त
वी ॥ २ ॥

घः बंधमोक्षयोर्वास्तवात्वाभावादित्याह ॥ बद्धो मुक्त इति द्वाभ्यां ॥ आत्मा बद्धो मुक्तश्च मे गुणतः मदधीनत्वादिगुणोपाधितः न तु वस्तुतः ॥ नन्वौ
पाधिकत्वे ऽपि तंडुलपाकादिवद्वास्तवत्वं किं न स्यात् तत्राह ॥ गुणस्य मायामूलत्वाद्बंधनं नास्ति अत एव मोक्षश्च नास्तीति ॥ ननु कथं
सर्वशास्त्रविरुद्धमुच्यते तत्राह ॥ इति मे व्याख्येति ॥ एवं मत्कृतो निर्णयः ॥ अलमतिकुतर्कैरित्यर्थः ॥ अथ चैवमन्वयः ॥ आत्मा बद्धो
मुक्त इति व्याख्या उक्तिः सा मे गुणतः मद्गुणपारतंत्र्यात् ॥ अत्र हेतुत्वेन गुणनियंतृत्वस्मिन्तद्व्यतिरेकमाह ॥ अत एव न मे बंधनं
मोक्षो वेति ॥ अन्यत्समानं ॥ १ ॥ एवं कारणभूतगुणानां मायामयत्वात्कार्यसंसृतिर्मायेति प्रपंचयति ॥ शोकमोहाविति ॥ यथा स्वप्नः आ

अतोवस्तुविरोधाभावान्नास्ति॥ प्रतीतिस्त्वौपाधिकीघटतइत्याह॥ विद्याविद्येइति॥ तन्वेतेमोक्षबंधावाभ्यामितितन्त्राक्ती॥ कुतः॥ मेमाय याविनिर्मिते॥ मायावृत्तिरूपत्वात्॥ बंधमोक्षकरीत्येकवचनं भ्रांतिवचनार्थं॥ ननुतत्कार्यत्वेबंध मोक्षयोरनादित्वानियत्वेनस्यात्तत्रा ह॥ नत्वाद्येअनादी॥ अतोयावद्विद्याप्रवर्त्ततावत्तावन्बंधः॥ यदाविद्यांददामितदामोक्षःस्फुरतीत्यर्थः॥ तथाचस्कंदपुराणे॥ बंधकोभ वपाशेनभवपाशाच्चमोचकः॥ कैवल्यदःपरंब्रह्मविष्णुरेवसनातनइति॥ २॥ तत्रशरीरिणामितिबहुवचननिर्देशाद्विषभेदेना ऽविरोधउक्तइतिभ्रांतिंव्यावर्त्तयन्बंधमोक्षव्यवस्थामुपपादयति॥ एकस्यैवेति॥ तर्हिकिमात्माभेदात्तत्रापिबंधःनहीत्याह॥ अ स्यजीवस्यैवेति॥ नन्वात्माभेदेजीवानामकोन्योस्तिप्रथक्॥ कथंचबंधमोक्षसुखदुःखादिव्यवस्थातत्राह॥ ममांशस्य॥ अयंभावः॥ अ पैकस्यापिचंद्रादेर्जलाद्युपाधिनाबिंबप्रतिबिंबरूपोभेदः यथाचतत्रजलकृताःकंपादयःप्रतिबिंबस्यैवयथाचतत्रप्रतिबिंबानाम

विद्याऽविद्येममतनूविद्ध्युद्धवशरीरिणां॥ मोक्षबंधकरीआद्येमाययामेविनिर्मिते॥ ३॥ एकस्यैवममांशस्यजीवस्यैवम हामते॥ बंधोस्याऽविद्ययाऽनादिर्विद्ययाचतथेतरः॥ ४॥ अथबद्धस्यमुक्तस्यवैलक्षण्यंवदामिते॥ विरुद्धधर्मिणोस्तातस्थि

प्युपाधिभेदेनभेदादेकस्मिन्कुंभेभग्नेतद्गतप्रतिबिंबस्यैवबिंबैक्यंनान्यगतस्य॥ तथाऽविद्यायांप्रतिबिंबितस्यमदंशस्यजीवस्यैव तत्कृतोबंधःतस्यचोपाधितोभेदान्नानात्वस्येति॥ तथाहुः॥ यथैकस्मिन्घटाकाशेरजोधूमादिभिर्युते॥ नसर्वेसंप्रयुज्यंतेतथा जीवाःसुखादिभिरिति॥ एतच्चातिरहस्यंस्वबुद्ध्यानिश्चेतव्यमितिसंबोधयति॥ हेमहामते॥ इतरोमोक्षः॥ ४॥ तदेवंव्यवस्थामु पपाद्यकथंवर्त्ततेत्यादिवैलक्षण्यप्रश्नस्योत्तरमाह॥ तत्रवैलक्षण्यंद्विविधंजीवेश्वरयोरेकंजीवानांचैकंतत्रजीवेश्वरयोर्वै लक्षण्यमाह॥ विरुद्धधर्मिणोरितिसार्द्धेन॥ शोकानंदधर्मवतोरेकस्मिन्धर्मिणिशरीरेनियम्यनियंतृत्वेनस्थितयोः॥ ५॥ ७

सुपर्णौवृक्षात्पक्षिणाविवदेहास्थ्यभूतौ॥सयुजौचिद्रूपत्वात्॥सखायौअवियोगत्वादेकमतत्वाच्च॥यदृच्छयाअनिरुक्तया॥वृक्ष्यतइतिवृक्षोदेहः॥ऊर्ध्वमूलमर्वाक्शाखंवृक्षंयोवेदसंप्रतीतिश्रुतेः॥ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययं॥इतिस्मृतेश्च॥तस्मिन्कृतंनीडंनिकेतनंहृदयरूपंयाभ्यांतौ॥तयोर्मध्येएकोजीवःपिप्पलान्नंपिप्पलोऽश्वत्थःदेहःतस्मिन्नदनीयंकर्मफलमित्यर्थः॥खादतिभक्षयति॥अन्यःईश्वरःनिरन्नःअभोक्तापिनिजानंदतृप्तोबलेनज्ञानादिनातयोःभूयानधिकः॥श्रुतिश्च॥द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते॥तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतीति॥६॥बद्धाधिक्यमेवाह॥

सुपर्णावेतौसदृशौसखायौयदृच्छयातौकृतनीडौचवृक्षे॥एकस्तयोःखादतिपिप्पलान्नमन्योनिरन्नोपिबलेनभूयान्॥६॥आत्मानमन्यंचसवेदविद्वानपिप्पलादोनतुपिप्पलादः॥योऽविद्ययायुक्सतुनित्यबद्धोविद्यामयोयःसतुनित्यमुक्तः॥७॥देहस्थोपिनदेहस्थोविद्वान्स्वप्नाद्यथोत्थितः॥अदेहस्थोपिदेहस्थःकुमतिःस्वप्नदृग्यथा॥८॥

आत्मानमिति॥अतःयोऽविद्ययायुक्युक्तःसतुनित्यबद्धः॥यस्तुविद्याप्रधानःसतुनित्यमुक्तः॥मायायाअनावरकत्वात्॥आश्रयायामोहकत्वाच्च॥७॥इदानींबद्धमुक्तजीवानामेवमिथोवैलक्षण्यमाह॥देहस्थोपीतिद्वाभिः॥विद्वान्मुक्तःसंस्कारवशेनदेहस्थोपिदेहस्थोनभवति॥यथास्वप्नादुत्थितःस्मर्यमाणस्वप्नदेहस्थितोपितत्रस्थोनभवति॥तद्गतसुखदुःखाद्यभावात्तद्वत्॥तथाचवस्तुतःअदेहस्थोपिकुमतिःअविद्वान्देहस्थस्तन्निमित्तसुखदुःखभाक्यथास्वप्नदृक्स्वप्नदेहगतइति॥८॥श्री॥राम

अत्रहेतुत्वेनवैलक्षण्यांतरमाह॥द्वाभ्यां॥इंद्रियैरिंद्रियार्थेषुगृह्यमाणेष्वपियस्तुविद्वान्सःनाहंकुर्यात्॥अहंगृण्हामीतिमतिं
नकुर्यादित्यर्थः॥कुतः॥गुणैर्गुणेषुगृह्यमाणेषु॥अतएवाऽविक्रियःरागादिशून्यः॥तदुक्तंगीतासु॥तत्त्ववित्तुमहाबाहोगुणक
र्मविभागयोः॥गुणागुणेषुवर्त्तंतइतिमत्वानसज्जतइति॥९॥अबुधस्तुपूर्वकर्माधीनेऽस्मिन्शरीरेवर्त्तमानःगुणैरिंद्रियैर्भा
व्येनकर्मणातत्रदेहादौनिबध्यते॥कर्त्तास्मीत्यहंकारेण॥तदुक्तं॥प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः॥अहंकारवि

इंद्रियैरिंद्रियार्थेषुगुणैरपिगुणेषुच॥ गृह्यमाणेष्वहंकुर्यान्नविद्वान्यस्त्वविक्रियः॥९॥ दैवाधीनेशरीरेऽस्मि
न्गुणभाव्येनकर्मणा॥ वर्त्तमानोऽबुधस्तत्रकर्त्तास्मीतिनिबध्यते॥१०॥ एवंविरक्तःशयनआसनाटनमज्ज
ने॥ दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु॥११॥ नतथाबध्यतेविद्वान्तत्रतत्रादयन्गुणान्॥ प्रकृतिस्थोप्यसं
सक्तोयथाखंसवितानिलः॥१२॥ वैशारद्येक्षयासंगशितयाछिन्नसंशयः॥ प्रतिबुद्धइवस्वप्नान्नानात्वाद्विनिवर्त्तते
॥१३॥

महात्माकर्त्ताऽहमितिमन्यतइति॥१०॥एतैस्त्रिभिःश्लोकैःकथंवर्त्तेतेत्यस्यप्रश्नस्यसुखदुःखशून्योनिरभिमानश्चदेहेवर्त्तेते
त्युत्तरमुक्तंभवति॥वैलक्षण्यांतरंवदन्किंभुंजीतेत्यादिप्रश्नोत्तरमाह॥एवमितित्रिभिः॥अन्यगतकर्मनाबध्नातीत्येवंविरक्तो
विद्वान्॥११॥तथाविद्वान्निवशयनासनादिषुनबध्यते॥कुतःतत्रतत्रविषयेषुगुणानिंद्रियाणिआदयन्भोजयन्॥तत्साक्षित्वे
नवर्त्तनःनतुस्वयमदन्॥एतदेवकुतःतत्राह॥प्रकृतिस्थोपीतिसार्द्धेन॥यथाखंसर्वत्रस्थितमपिनसज्जते॥यथासविताजले
मतिबिंबितोपि॥यथाऽनिलःसर्वत्रसंचरन्नपितद्वत्॥१२॥असंगेनवैराग्येणशितयातीक्ष्णयाछिन्नाःसंशयाःअसंभावनाद

स्वप्नस्य॥नानात्वाद्विकल्पप्रपंचात्॥१३॥

कथं विहरेदित्यस्यान्तरत्वेन वैलक्षण्यांतरमाह ॥ यस्य स्युरिति ॥ तद्गुणैः देहगुणैः संकल्परहिताभिः प्राणादिवृत्तिभिर्विहरन्मुक्त इत्यर्थः ॥
१४ ॥ एवं तावद्बद्धमुक्तयोः स्वसंवेद्यमेव वैलक्षण्यमुक्तमिदानीं केवलं ज्ञायते तल्लक्षणैरिति सस्यान्तरत्तयापरैरपि बुद्ध्येयं वैलक्षण्यमा-
ह ॥ यस्यात्मेति ॥ त्रिभिः ॥ हिंस्रैर्दुर्जनैरन्यैर्वा प्राणिभिः यस्यात्मा देहः पीड्यते ॥ यदृच्छया येन केनापि कचित् किंचिदर्च्यते वा ॥ स बुधश्च
तत्र न व्यतिक्रियते नातिविक्रियत इत्यर्थः ॥ तदुक्तं याज्ञवल्क्येन ॥ यः कंटकैर्वितुदति चंदनैर्यश्च लिंपति ॥ अक्रुद्धोपरितुष्टश्च सम

यस्य स्युर्वीतसंकल्पाः प्राणेंद्रियमनोधियां ॥ वृत्तयः स विनिर्मुक्तो देहस्थोपि हि तद्गुणैः ॥ १४ ॥ यस्यात्मा हिंस्यते हिंस्रैर्ये
न किंचिद्यदृच्छया ॥ अर्च्यते वा क्वचित्तत्र न व्यतिक्रियते बुधः ॥ १५ ॥ न स्तुवीत न निंदेत कुर्वतः साध्वसाधु वा ॥ व
दतो गुणदोषाभ्यां वर्जितः समदृङ्मुनिः ॥ १६ ॥ न कुर्यान्न वदेत्किंचिन्न ध्यायेत्साध्वसाधु वा ॥ आत्मारामोऽनया
वृत्त्या विचरेज्जडवन्मुनिः ॥ १७ ॥ शब्दब्रह्मणि निष्णातो न निष्णायात्परे यदि ॥ श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः
॥ १८ ॥

स्तस्य च तस्य चेति ॥ १५ ॥ किंच साध्वसाधु वा कुर्वतो वदतो वा जनान् ॥ न स्तुवीत ॥ न निंदेत ॥ यो लौकिकव्यवहारे विमुखः स मुक्त
इत्यर्थः ॥ १६ ॥ अपि च न कुर्यादिति ॥ यो दैहिकेपि कर्मण्युदासीनः स मुक्तः इतरो बद्ध इत्यर्थः ॥ एतान्येव सर्वाणि मुमुक्षोः साधना
नि ज्ञातव्यानि ॥ १७ ॥ यस्तु केवलं शब्दब्रह्मणि अभिज्ञः पांडित्यमात्रश्लाघीनस्तर्कैः साधनैस्तदर्थनिष्ठो भवेत् तं निंदति ॥ श
ब्दब्रह्मणि निष्णातः अर्थतः पारंगतोपि परे ब्रह्मणि न निष्णायात् ध्यानाद्यभियोगं न कुर्यात् तस्य श्रमः श्रमैकफलः न तु
पुरुषार्थपर्यवसायी ॥ अधेनुं चिरप्रसूतां ॥ १८ ॥ ७ ॥

एतदेवान्यार्थनिरसनैः प्रपंचयति ॥ गामिति ॥ दुह्यत इति दोहः पयः दुग्धो दोहः नोत्तरत्र दोहोस्ति यस्यास्तां व्यर्थमन्यां ॥ असतीं भार्यां का
मभृत्यां ॥ देहं पराधीनं प्रतिक्षणं दुःखहेतु ॥ असत्प्रजां दुष्टां दुष्टसाधनमन्यं पुत्रं ॥ अतीर्थीकृतं आगतपात्रे न दत्तं वित्तं दुष्कीर्ति
दुरितापादकं ॥ अंग हे उद्धव दुःखानंतरं दुःखमेव यस्य सः रक्षति ॥ १९ ॥ मया हीनां वाचमित्युक्तं विवृणोति ॥ यस्यां मे जगतः श्रा
धकं चरित्रं न स्यात् ॥ किं तत् ॥ अस्य विश्वस्य स्थित्यादिरूपं ॥ तद्धेतुरीश्वरः ॥ लीलावतारेषु ईप्सितं जगतः प्रेमास्पदं श्रीरामकृ

गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च ॥ वित्तं त्वतीर्थीकृतमंग वाचं हीनां मया रक्षति दुःखदुःखी ॥ १९ ॥
यस्यां न मे पावनमंग कर्म स्थित्युद्भवप्राणनिरोधमस्य ॥ लीलावतारेप्सितजन्म वा स्याद्वंध्यां गिरं तां बिभृयान्न धी
रः ॥ २० ॥ एवं जिज्ञासयापोह्य नानात्वभ्रममात्मनि ॥ उपारमेत विरजं मनो मय्यर्प्य सर्वगे ॥ २१ ॥ यद्यनीशो धारयितुं
मनो ब्रह्मणि निश्चलं ॥ मयि सर्वाणि कर्माणि निरपेक्षः समाचर ॥ २२ ॥ श्रद्धालुर्मे कथाः शृण्वन्सुभद्रा लोकपावनीः ॥ गा
यन्ननुस्मरन्कर्म जन्म चाभिनयन्मुहुः ॥ २३ ॥ मदर्थे धर्मकामार्थानाचरन्मदपाश्रयः ॥ लभते निश्चलां भक्तिं मय्युद्धव स
॥ नातने ॥ २४ ॥

ष्णादिजन्म वा न स्यात् ॥ तां निष्फलां गिरं धीरो धीमान्न धारयेत् ॥ २० ॥ उक्तं ज्ञानमार्गमुपसंहरति ॥ एवं निश्चिंत्य विचारेणात्मनि
नानात्वभ्रमं देहाद्यध्यासं निरस्य निर्मलं मनो मयि सर्वगे परिपूर्णे समर्प्य संधार्य उपारमेत् ॥ नन्वास्त्व पांडित्यमात्रेणेत्य
र्थः ॥ २१ ॥ यद्यनीशः असक्तः तर्हि अस्तामिदं मद्भक्त्यैव कृतार्थो भविष्यतीत्याह ॥ मयीति ॥ मदर्पणेन ॥ २२ ॥ कर्मभिर्विशुद्धसत्वस्यां
तरंगां भक्तिमाह ॥ श्रद्धालुरिति द्वाभ्यां ॥ अभिनयन्स्वयमनुकुर्वन् ॥ २३ ॥ आचरन्सेवमानः ॥ २४ ॥ श्रीरामचंद्राः ॥

ततश्चानेनप्रकारेणमयिसत्संगेनलब्धयाभक्त्यासभक्तःमांउपासिताध्याताभवति॥सच्चध्यानशीलःसद्भिर्दर्शितंवेनिश्चि
तंसुखेनैवमेपरंस्वरूपंप्राप्नोति॥२५॥सत्संगलब्धयाभक्त्येत्युक्तंतत्रसतांभक्तेश्चविशेषंपृछति॥साधुरिति॥साधवः
स्वस्वमतिपरिकल्पिताःसंतिबहवस्तत्रतुकीदृशाःसंमताः॥भक्तिरपिबहुविधालोके॥कीदृशीपुनस्त्वय्युपयुज्यते॥सद्भि
श्चनारदादिभिरादृता॥२६॥तच्चकथ्यतांइदंचातिगुह्यंत्वयैववक्तव्यमितिसैश्वर्यमाविःकरोति॥हेपुरुषाध्यक्षेत्यादिनाब्रह्म

सत्संगलब्धयाभक्त्यामयिमांसउपासिता॥सवैमेदर्शितंसद्भिरंजसाविंदतेपदं॥२५॥उद्धवउवाच॥साधुस्त
उत्तमश्लोकमतःकीदृग्विधःप्रभो॥भक्तिस्त्वय्युपयुज्येतकीदृशीसद्भिरादृता॥२६॥एतन्मेपुरुषाध्यक्षलोका
ध्यक्षजगत्प्रभो॥प्रणतायानुरक्तायप्रपन्नायचकथ्यतां॥२७॥त्वंब्रह्मपरमंव्योमपुरुषःप्रकृतेःपरः॥अवती
र्णोऽसिभगवन्स्वेछोपात्तपृथग्वपुः॥२८॥श्रीभगवानुवाच॥कृपालुरकृतद्रोहस्तितिक्षुःसर्वदेहिनां॥सत्यसारोऽ
नवद्यात्मासमःसर्वोपकारकः॥२९॥छ

दिनियंता॥२७॥अत्रहेतुः॥त्वमिति॥व्योमवदसंगःयतःप्रकृतेःपरः॥स्वेषामिछयाउपात्तंपृथकपरिमितंवपुर्येनसः
॥२८॥तत्रत्रिंशल्लक्षणैःसाधुंनिरूपयति॥कृपालुःपरदुःखाऽसहिष्णुः॥सर्वदेहिनांकेषांचिदपिअकृतद्रोहः॥ति
तिक्षुःक्षमावान्॥सत्यंसारंबलंयस्यः॥अनवद्यात्माअसूयादिरहितः॥सुखदुःखयोःसमः॥यथाशक्तिसर्
वेषामुपकारकः॥२९॥श्रीदत्तात्रयायनमः॥श्रीरामचंद्रायनमः॥श्रीदिगंबरायनमः॥श्रीरामचंद्रायनमः॥छ॥

कामैरक्षुभितचित्तः॥ दांतः संयतबाह्येंद्रियः॥ मृदुः अकठिनचित्तः॥ शुचिः सदाचारः अकिंचनः अपरिग्रहः अनीहः दृष्टक्रिया शून्यः॥ मितभुक् लघ्वाहारः शांतः नियतांतःकरणः स्थिरः स्वधर्मे॥ मच्छरणः मदेकाश्रयः॥ मुनिः मननशीलः॥ ३०॥ अप्रमत्तः सावधानः गभीरात्मा निर्विकारः॥ धृतिमान् विपद्यप्यकृपणः जितषड्गुणः क्षुत्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः॥ एते जितायेन सः॥ अमानी न मानाकांक्षी अन्येभ्यो मानदः कल्पः परबोधने दक्षः मैत्रः अवंचकः करुणयैव प्रवर्त्तमानः नपुनर्लोभेन कविः सम्यक् ज्ञानी॥ ३१॥ किंच मयावेदरूपेणादिष्टानपि स्वधर्मान्संत्यज्य मां भजेत सोपि एवं पूर्वोक्तवत्सत्तमः॥ किमज्ञानान्नास्तिक्या

कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः॥ अनीहो मितभुक् शांतः स्थिरो मच्छरणो मुनिः॥ ३०॥ अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः॥ अमानी मानदः कल्पो मैत्रः कारुणिकः कविः॥ ३१॥ आज्ञायैवं गुणान्दोषान्मयादिष्टानपि स्वकान्॥ धर्मान्संत्यज्य यः सर्वान्मां भजेत्स सत्तमः॥ ३२॥ ज्ञात्वाज्ञात्वाथ ये वै मां यावान्यश्चास्मि यादृशः॥ भजंत्यनन्यभावेन ते मे भक्ततमा मताः॥ ३३॥ ५

द्वा न धर्माचरणेन सत्वशुद्ध्यादीन्गुणान्विक्षेपदोषांश्च आज्ञाय ज्ञात्वापि मद्ध्यानविक्षेपकतया मद्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयेनैव धर्मान्संत्यज्य॥ यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यज्य॥ अथवा॥ विद्धैकादशीकृष्णैकादश्युपवासाऽनुपवासाऽन्निवधश्राद्धादयो ये भक्तिविरुद्धाः धर्मास्तान्संत्यज्येत्यर्थः॥ किंच यावान् देशकालापरिच्छिन्नः यश्च सर्वात्मा यादृशः सच्चिदानंदरूपः तं मां ज्ञात्वा अज्ञात्वापि॥ यद्वा विशेषतः पुनःपुनर्ज्ञात्वा एकांतभावेन ये भजंतीति॥ ३३॥ ५

साधुलक्षणमुक्त्वा भक्तिलक्षणमाह॥ मल्लिंगेत्यष्टभिः॥ लिंगानि प्रतिमादीनि॥ ३४॥ सर्वलोभोपहरणं सर्वस्य लब्धस्य समर्पणं॥ ३५॥ घ
र्वाणि जन्माष्टम्यादीनि तदनुमोदनं॥ ३६॥ बलिविधानं पुष्पोपहारादिसमर्पणं॥ सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशे
षतः॥ ३७॥ उद्यानादिकरणे सामर्थ्ये सति स्वतः असति चान्यैः संभूयोद्यमः उद्यानं पुष्पप्रधानं॥ उपवनं फलप्रधानं॥ आक्री
डं क्रीडास्थानं॥ ३८॥ संमार्जनं रजसोपाकरणं॥ उपलेपः गोमयोदकादिभिरालेपनं॥ सेकः स्तैरेव प्रोक्षणं॥ मंडलवर्त्तनं सर्व
तोभद्रादिकरणं मद्गृहे मम॥ ३९॥ स्वयमन्येन वा निवेदितं न स्वीकुर्यात्॥ एतच्च साधारणस्थावरविषयं रागप्राप्तविषयं वा॥ भक्त्यानु

मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं॥ परिचर्यास्तुतिप्रह्वगुणकर्मानुकीर्त्तनं॥ ३४॥ मत्कथाश्रवणे श्रद्धा मदनुध्या
नमुद्धव॥ सर्वलाभोपहरणं दास्येनात्मनिवेदनं॥ ३५॥ मज्जन्मकर्मकथनं मम पर्वानुमोदनं॥ गीततांडववादित्रगोष्ठी
भिर्मद्गृहोत्सवः॥ ३६॥ यात्राबलिविधानं च सर्ववार्षिकपर्वसु॥ वैदिकी तांत्रिकी दीक्षा मदीयव्रतधारणं॥ ३७॥ ममार्चास्था
पने श्रद्धा स्वतः संहत्य चोद्यमः॥ उद्यानोपवनाक्रीडपुरमंदिरकर्मणि॥ ३८॥ संमार्जनोपलेपाभ्यां सेकमंडलवर्त्तनैः॥ गृ
हशुश्रूषणं मह्यं दासवद्यदमायया॥ ३९॥ अमानित्वमदंभित्वं कृतस्यापरिकीर्त्तनं॥ अपि दीपावलोकं मे नोपयुंज्या

त्प्रागाह्यमेव॥ षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्त्तितं॥ विष्णोर्नैवेद्यसिक्थेन पुण्यं तद्भुंजतां कलौ॥ हरिदत्तं मुनाम नैवेद्यम्
दरहरं॥ पादोदकं च निर्माल्यं मस्तके यस्य सोच्युतः॥ यद्यत्त्वन्यस्मै निवेदितं मे नोपयुंज्यात् मह्यं न निवेदयेदित्यर्थः॥ वि
ष्णोर्निवेदितान्नेन यष्टव्यं देवतांतरं॥ पितृभ्यश्चैव तद्देयं तदानंत्याय कल्पते॥ पितरो वृषयुत्पादयाद्ब्रह्मस्य परमात्म
ने॥ रेतोदाः पितरस्तस्य भवति कृच्छ्राभागिनः स्यादिवचनेभ्यः॥ ४०॥ श्रीरामचंद्रायनमः॥ श्रीदत्तात्रेयायनमः॥ छ॥

४१॥ इदानीमेकादशपूजाधिष्ठान्याह॥ सूर्यइति॥ हेभद्र॥ ४२॥ अधिष्ठानभेदेनपूजासाधनान्याह॥ सूर्यइतित्रिभिः त्रय्याविद्यया
सूक्तैरुपस्थानादिना॥ अग्रहेउद्धव॥ यवसादिनातृणादिना॥ ४३॥ बंधुसत्कृत्यावंधुवत्संमानेन॥ हृदिखेहृदयाकाशे॥ मुख्याधिया
प्राणदृष्ट्या॥ तोयेतोयादिभिर्द्रव्यैस्तर्पणादिना॥ ४४॥ स्थंडिलेभुविमंत्रहृदयैः रहस्यमंत्रन्यासैः॥ ४५॥ सर्वाधिष्ठानेषु॥ एवमा
ह॥ धिष्ण्येष्विति॥ इतिअनेनप्रकारेणएषुधिष्ण्येषु॥ ४६॥ उक्तायाः भक्तेः फलमाह॥ इष्टापूर्त्तेनेति॥ सद्भक्तिं दृढांभक्तिं॥ अ

यद्यदिष्टतमंलोकेयच्चातिप्रियमात्मनः॥ तत्तन्निवेदयेन्मह्यंतदानंत्यायकल्पते॥ ४१॥ सूर्योऽग्निर्ब्राह्मणो
गावोवैष्णवः खंमरुज्जलं॥ भूरात्मासर्वभूतानिभद्रपूजापदानिमे॥ ४२॥ सूर्येतुविद्ययात्रय्याहविषा
ग्नौयजेतमां॥ आतिथ्येनतुविप्राग्र्येगोष्वंगयवसादिना॥ ४३॥ वैष्णवेबंधुसत्कृत्याहृदिखेध्याननिष्ठया॥ वा
यौमुख्यधिया तोयेद्रव्यैस्तोयपुरस्कृतैः॥ ४४॥ स्थंडिलेमंत्रहृदयैर्भोगैरात्मानमात्मनि॥ क्षेत्रज्ञंसर्वभूते
षुसमत्वेनयजेतमां॥ ४५॥ धिष्ण्येष्वेतेषुमद्रूपंशंखचक्रगदांबुजैः॥ युक्तंचतुर्भुजंशांतंध्यायेन्नर्चेत्स
माहितः॥ ४६॥ इष्टापूर्त्तेनमामेवंयोयजेतसमाहितः॥ लभतेमयिसद्भक्तिंमत्स्मृतिःसाधुसेवया॥ ४७॥ प्रा
येणभक्तियोगेनसत्संगेनविनोद्धव॥ नोपायोविद्यतेसम्यक्प्रायणंहिसतामहं॥ ४८॥ श्रीदत्तात्रयानमः॥

स्याभक्तेरंतरंगसाधनमाह॥ इयंचमत्स्मृतिःसाधुसेवयाभवति॥ यद्वा॥ स्मृतिर्ज्ञानंततश्चदृढभक्तिमतःपुंसःसाधु
सेवयामज्ज्ञानंभवतीत्यर्थः॥ ४७॥ ज्ञानभक्तिमार्गावुक्तौ॥ तत्रज्ञानमार्गादपिभक्तिमार्गश्रेष्ठइत्याह॥ प्रायेणेति॥ सत्संगे
नयोभक्तियोगः तेनविनोपायः संसारतरणेनविद्यते॥ सत्संगेनेत्यत्रहेतुमाह॥ हियस्मात्सतामहंप्रायणंप्रकृष्टमयन
माश्रयः अतः सत्संगोप्यंतरंगइत्यर्थः॥ ४८॥

इदानीं सांख्ययोगादीनि साधनांतरसापेक्षाणि सव्यभिचाराणि च सत्संगस्तु स्वतंत्र एव समर्थः फलाव्यभिचारी चेति वर्ण
यितुमाह॥ अथेति॥ एतद्वक्ष्यमाणं परमं गुह्यं॥ अतः शृण्विसर्थः॥ ४९॥ इतिश्रीभागवते दीपिकायामेकादशे॥ ११॥ १२॥ द्वा
दशे साधुसंगस्य महिमा वर्णितः पुरा॥ कर्मानुष्ठानतत्त्यागव्यवस्था च ततः परं॥ १॥ नरोधयतीति न वशीकरोति॥
योगः आसनप्राणायामादिः सांख्यं तत्त्वानां विवेकः धर्मः सामान्यतो ऽहिंसादिः॥ स्वाध्यायो वेदजपः तपः कृच्छ्रादिः त्यागः

अथैतत्परमं गुह्यं शृण्वतो यदुनंदन। सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा॥ ४९॥ इतिश्रीभागवते महा
पुराणे एकादशस्कंधे भगवदुद्धवसंवादे एकादशोऽध्यायः॥ ११॥ ७॥ श्रीभगवानुवाच॥ नरोधयति मां यो
गो न सांख्यं धर्म एव च। न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा॥ १॥ व्रतानि यज्ञश्छंदांसि तीर्थानि नियमा य
माः। यथावरुंधे सत्संगः सर्वसंगापहो हि मां॥ २॥ सत्संगेन हि दैतेया यातुधाना खगा मृगाः। गंधर्वाप्सरसो
नागाः सिद्धाश्चारणगुह्यकाः॥ ३॥ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोऽत्यजाः। रजस्तमःप्रकृतयस्तस्मिं
स्तस्मिन्युगे युगे॥ ४॥ बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः। वृषपर्वा बलिर्बाणो मयश्चाथ बिभीषणः
॥ ५॥ सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः। व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथा परे॥ ६॥ ७॥ ७॥

सन्यासः इष्टापूर्तं च। तत्रेष्टमग्निहोत्रादि। पूर्तं कूपारामादिनिर्माणं॥ दक्षिणाशब्देन सामान्यतो दानं लक्ष्यते॥ १॥
व्रतान्येकादश्युपवासादीनि। यज्ञः देवपूजा॥ छंदांसि रहस्यमंत्राः अवरुंधे वशीकरोति॥ २॥ ३॥ ४॥ त्वाष्ट्रो वृत्रः॥ का
याधवः प्रह्लादः॥ ५॥ ऋक्षो जांबवान्॥ गृध्रो जटायुः वणिक्पथस्तुलाधारः॥ व्याधः धर्मव्याधः यज्ञपत्न्यः दीक्षितभा
र्याः॥ ६॥ ७॥

तेषां सत्संगव्यतिरिक्तसाधनांतराभावमाह॥ तेनाधीतश्रुति॥ न अधीताः श्रुतिगणा यैः॥ तदर्थं न उपासिताः महत्तमा यैस्ते तथा॥
किंच॥ अव्रतातप्ततपसः न व्रतानि येषां॥ न तप्तानि तपांसि यैः ते च ते तथा॥ सत्संगादिति॥ सद्भिः संगो नाम मय्येव संग इत्यभिप्र
सोक्तं॥ यद्वा स्वसंगस्यापि सत्संगत्वं विवक्ष्यते स्वस्यापि सत्त्वात्॥ यद्वा मदीयानां संगादित्यर्थः॥ ७॥ तत्र वृत्रादीनां भवतु नाम क
थंचित्साधनांतरं॥ गोपीप्रभृतीनां तु नान्यदस्तीत्याह॥ केवलेनेति॥ सत्संगलब्धेन केवलेनैव भावेन प्रीत्या॥ नगा यम
लार्जुनादयः नागाः कालियादयः॥ यद्वा तदानींतनसर्वतरुगुल्मादीनामपि भगवति भावोऽस्तीति गम्यते॥ तदुक्तं भगव

तेनाधीतश्रुतिगणा नोपासितमहत्तमाः॥ अव्रतातप्ततपसो सत्संगान्मामुपागताः॥ ७॥ केवलेन हि भावेन
गोप्यो गावो नगा मृगाः॥ येऽन्ये मूढधियो नागाः सिद्धा मामीयुरंजसा॥ ८॥ यं न योगेन सांख्येन दानव्रततपो-
ध्वरैः॥ व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि॥ ९॥ रामेण सार्द्धं मथुरां प्रणीते श्वफल्किना मय्यनुरक्त
चित्ताः॥ विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृशुः सुखाय॥ १०॥ छ

तैव॥ अहो अमी देववरामरार्चितं पदांबुजं ते सुमनःफलार्हणं॥ नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म य
त्कृतमित्यादि॥ सिद्धाः कृतार्थाः संतः ईयुः प्रापुः॥ ८॥ स्वप्राप्तेर्दुर्लभतामाह॥ यमिति॥ योगादिभिः कृतप्रयत्नोऽपि यं न प्रा
प्नुयात्॥ तं मामीयुरिति पूर्वेणान्वयः॥ अत्र च प्रथमं या गोप्यः पश्चाद्यो वा श्रीघ्रोन सह संगताः॥ ते संगः सत्संगोऽन्येषां
तत्संगः तेन च तेषां भक्तिरिति ज्ञातव्यं॥ ९॥ गोपीनां भावं प्रपंचयति॥ रामेणेति चतुर्भिः॥ श्वफल्किना अक्रूरेण मयि प्र
णीते सति मे मत्तोऽन्यं सुखाय न ददृशुः॥ कुतः वियोगेन तीव्रा दुःसहा आधिर्यासां ताः अत्र हेतुः॥ मयि विगाढेन अतिदृढेन भा
वेन प्रेम्णा अनुरक्तानि संसक्तानि चित्तानि यासां ताः॥ १०॥ ७॥

तीव्राधिलंघ्यनक्ति॥ताइति॥मयासहएवक्षपारात्रयःक्षणार्द्धवन्नीताः॥ताएवपुनर्मयाहीनास्तासांकल्पसमाः॥बभूवुः॥वाचामगो
चराइत्यर्थः॥११॥किंचएवंतीव्राधयस्ताःमोहमिषेणसमाधिंप्राप्ताइत्याह॥ताइति॥मयिअनुषंगेणआसक्त्याबद्धाःधियोया
भिस्ताःस्वमात्मानंस्वदेहं।अदःदूरस्थंइदंसन्निहितंचनाविदन्यद्वास्वंपतिपुत्रादिममतास्पदंआत्मानंअहंकारास्पदंअदः
परलोकंइदंइमंलोकंचनाविदन्निति।यथामुनयःसमाधौनामरूपेनविदुस्तद्वत्॥किंतुअब्धितोयेनद्यइवमयिप्रविष्टाइ
त्यन्वयः॥१२॥एवंताःअबलाःकेवलंमत्कामाःअस्वरूपविदःस्वरूपेणजानंति॥तथापिसत्संगात्जारंब्रह्मजारबुद्धिवेद्यमपिब्र

तास्ताःक्षपाःप्रेष्ठतमेननीताःमयैववृंदावनगोचरेण॥क्षणार्द्धवत्ताःपुनरंगतासांहीनामयाकल्पसमाबभूवुः॥११॥
तानाविदन्मय्यनुषंगबद्धधियःस्वमात्मानमदस्तथेदं॥यथासमाधौमुनयोऽब्धितोयेनद्यःप्रविष्टाइवनामरूपे॥१२॥
मत्कामारमणंजारमस्वरूपविदोऽबलाः॥ब्रह्ममांपरमंप्रापुःसंगाच्छतसहस्रशः॥१३॥तस्मात्त्वमुद्धवोत्सृज्यचोद
नांप्रतिचोदनां॥प्रवृत्तंचनिवृत्तंचश्रोतव्यंश्रुतमेवच॥१४॥मामेकमेवशरणमात्मानंसर्वदेहिनां॥याहिसर्वात्म
भावेनमयास्याह्यकुतोभयः॥१५॥उद्धवउवाच॥संशयःशृण्वतोवाचंतवयोगेश्वरेश्वर॥ननिवर्त्ततआत्मस्थोयेन
भ्राम्यतिमेमनः॥१६॥७

ह्मस्वरूपमेवमांपरमंप्रापुरित्यर्थः॥१३॥यस्मादेवंभूतोमद्भजनप्रभावःतस्मात्त्वंचोदनांश्रुतिंप्रतिचोदनांस्मृतिंच।यद्वाविधि
निषेधंचउत्सृज्य॥१४॥मांशरणंयाहिमयैवअकुतोभयःस्याःभव॥१५॥पूर्वंतावन्मयोदितेष्ववहितःस्वधर्मेष्विज्यादिनाकर्मक
र्तव्यमित्युक्तं॥इदानींतुसर्वंसत्यक्त्वामांशरणंयाहीत्युच्यते।तत्रकिमात्मनःकर्त्तृत्वाद्यस्तिनास्तिवेतिआत्मस्थःआत्मविषयःसं
शयोननिवर्त्तते।यद्वाकर्मकार्यंसाङ्ख्यंनेतिआत्मस्थःहृदिस्थःसंशयोननिवर्त्ततइतिपृच्छति।संशयइति।येनसंशयेन॥१६॥

उत्तरं स एष द्व्यष्टभिः ॥ अयं भावः ॥ ईश्वरस्तावत्स्वमायावशात्प्रपंचात्मना भाति ॥ तत्र पंचाध्यासात् जीवानामानाद्यविद्ययाकर्तृत्वादि ॥ ततो विधिप्रतिषेधाधिकारः ॥ इदानीं सत्त्वमुमुक्षुरर्थं कर्माणि कुर्वित्युक्तं ॥ सत्त्वे च मुमुक्षुः पुनः कर्मजाड्यपरिहाराय भक्तिविक्षेपकं कर्मादरं परित्यज्य विश्वासेन भजेदित्युक्तं ॥ जातायां तु विद्यायां न किंचित्कर्तव्यमस्तीति ॥ तत्र तावदीश्वराद्वागादींद्रियवराजीवसंसृतिकारणभूतं प्रपंचोद्भवमाह ॥ सार्धैश्चतुर्भिः ॥ स एषः अपरोक्षः जीवयतीति जीवः परमेश्वरः ॥ अपरोक्षत्वे हेतुविवरेष्वाधारादिचक्रेषु प्रसूतिरिव प्रसूतिरभिव्यक्तिर्यस्य सः ॥ तामेवाभिव्यक्तिमाह ॥ घोषेणेति ॥ घोषेण पराख्येन नादवता प्राणेन सह गुहामाधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मरूपं पश्यंत्याख्यं मध्यमाख्यं च मणिपूरकचक्रे विशुद्धिचक्रे च उप

श्रीभगवानुवाच ॥ स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ॥ मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ॥ १७ ॥ यथाऽनिलः खेऽनिलबंधुरूष्मा बलेन दारुण्यधिमथ्यमानः ॥ अणुः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणी ॥ १८ ॥

य प्राप्य वक्त्रे मात्रा ह्रस्वादिः स्वरः उदात्तादिः वर्णः अकारादिः इत्येवं वैखर्याख्यः स्थविष्ठः अतिस्थूलो नानावेदशाखात्मको भवति ॥ तथा च श्रुतिः ॥ चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ॥ गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंतीति ॥ अभियुक्तः श्लोकश्च ॥ या सा मित्रावरुणसदनादुच्चरंती त्रिषष्टिं वर्णानंतः प्रकटकरणैः प्राणसंगात्प्रसूते ॥ तां पश्यंतीं प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये इति ॥ १७ ॥ अव्यक्तस्य सतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृष्टांतः ॥ यथेति ॥ यथाऽग्निः खे ऊष्मात्मना अव्यक्तोष्मरूपः दारुणि अधिकं मथ्यमानः अनिलसहायः सन् ॥ अणुः सूक्ष्मविस्फुलिंगादिरूपो व्यक्तो भवति ॥ पुनः प्रकृष्टो जातो हविषा संवर्धते ॥ तथैवेयं वाणी मम अभिव्यक्तिः ॥ १८ ॥

॥भा॰ए॰॥

॥४६॥

उक्त्वां वाग्वृत्तिमुपसंहरन्नितरेंद्रियवृत्तिष्वतिदिशति॥ एवंगदिः भाषणंमेव्यक्तिरिसृसंहारः कर्महस्तयोर्वर्तिः॥ गतिःपादयोः॥ विस
र्गःपायूपस्थयोरितिकर्मेंद्रियाणां॥ घ्राणः श्रवघ्राणं॥ रसोरसनं॥ दृग्दर्शनं॥ स्पर्शः स्पर्शनं॥ श्रुतिःश्रवणमिति॥ ज्ञानेंद्रिया
णां॥ संकल्पोमनसः॥ विज्ञानंबुद्धिचित्तयोः॥ अभिमानोऽहंकारस्य॥ सूत्रंप्रधानस्य॥ सत्वरजस्तमसांविकारोऽधिभूताधिदै
वादिस्त्रिविधः॥ प्रपंचःमेव्यक्तिरितिपूर्वेणान्वयः॥१९॥ तस्मादीश्वराभिव्यक्तिरूपःप्रपंचोनेश्वराद्भिन्नोस्तीत्याह॥ अयमिति॥
अयंजीवईश्वरः आद्यावक्तृएकएवबयसाकालेनविश्लिष्टाविभक्ताव्यागादींद्रियरूपाःशक्तयोयस्य॥ यद्वाविशेषणाश्लिष्टाः

एवंगदिःकर्मगतिर्विसर्गोघ्राणोरसोदृक्स्पर्शःश्रुतिश्च॥ संकल्पविज्ञानमथाभिमानःसूत्रंरजःसत्वतमोविकारः॥१९॥
अयंहिजीवस्त्रिवृदब्जयोनिरव्यक्तएकोवयसासआद्यः॥ विश्लिष्टशक्तिर्बहुधेवभातिबीजानियोनिंप्रतिपद्ययद्वत्॥२०॥
यस्मिन्निदंप्रोतमशेषमोतंपटोयथातंतुवितानसंस्थः॥ यएषसंसारतरुःपुराणःकर्मात्मकःपुष्पफलेप्रसूते॥२१॥

आलिंगितामायाशक्तिर्येनसःबहुप्रकारइवाभाति॥ यतःसएवाद्यःत्रिवृत्त्रिगुणाश्रयः अब्जयोनिःलोकपद्मस्यकारणभूतः
एकस्यबहुधाभानेदृष्टांतः॥ योनिंक्षेत्रंप्रतिपद्यप्राप्यबीजानियद्वत्॥२०॥ तत्तस्मात्तन्मायाविलसितत्वात्तदाश्रयमिदंजगत्स्व
ततःपद्यगितिसदृष्टांतमाह॥ यस्मिन्निति॥ तंतुवितानेसंस्थास्थितिर्यस्यसः॥ पटोयथातथाबयस्मिन्निदंविश्वंओतंदीर्घतं
तुषुपटइवप्रोतंतिर्यक्तंतुष्विव॥ एवंभूतंसमष्टिव्यष्ट्यात्मकंविश्वंममविद्ययाऽन्यथ्यस्तंतत्स्वरूपंजीवस्यकर्तृत्वादिसंसार
हेतुः॥ अतस्तद्विवेकज्ञानेनकर्मादिसर्वंत्याज्यमित्युक्तमित्याशयेनाह॥ यएषइति॥ सार्द्धैस्त्रिभिः॥ पुराणः अनादिःकर्मात्म
कःप्रवृत्तिस्वभावःपुष्पफलेभोगापवर्गौ॥ कर्मतत्फलेवाप्रसूतेजनयति॥२१॥ ७॥

॥रामः॥

॥४६॥

वृक्षस्वरूपकं प्रपंचयति । द्वे इति । द्वे पुण्यपापे अस्य बीजे । स च शतमूलः शतमपरिमिताः वासनाः मूलानि यस्य । त्रयो गुणाः नालानि प्रकांडा यस्य । पंच भूतानि स्कंधा यस्य । पंच रसाः शब्दादि विषयाः तेषां प्रसूतिर्यस्मात् । दश च एका च शाखाः इंद्रियाणि यस्य । द्वयोः सुपर्णयोः जीवपरमात्मनोः नीडं यस्मिन् । त्रीणि वल्कलानि त्वचो वातपित्तश्लेष्माणो यस्य । द्वे सुखदुःखे फले यस्य । अर्कं प्रविष्टः सूर्यमंडलपर्यंतं व्याप्तः ॥ तन्निर्भेदे गतस्य संसाराभावात् ॥ २२ ॥ तत्फलभोक्तॄनाह । अदंतीति । गृध्राः कामिनः ग्रामेच

द्वे अस्य बीजे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः । दशैकशाखो द्विसुपर्णनीडस्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः ॥ २२ ॥ अदंति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः । हंसा य एकं बहुरूपमिज्यैर्मायामयं वेद स वेद वेदं ॥ २३ ॥ एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः । विवृश्च्य जीवाशयमप्रमत्तः संपद्य चात्मानमथ सजास्त्रं ॥ २४ ॥ इति श्रीमाहापुराणे भागवते एकादशस्कंधे द्वादशोध्यायः ॥ १२ ॥ छ छ छ छ

राः गृहस्थाः अस्य वृक्षस्यैकं फलं दुःखमदंति । परिणामतः स्वर्गादेरपि दुःखरूपत्वात् हंसाः विवेकिनः अरण्यवासाः संन्यासिनः एकं फलं सुखमदंति । एकं परमात्मानं मायामयं एवं बहुरूपं इज्यैः पूज्यैः गुरुभिः कृत्वा यो वेद स वेदं तत्त्वार्थं वेद ॥ २३ ॥ त्वं चैवं ज्ञात्वा कृतकृत्यः सन् सर्वसाधनं सजेत्याह ॥ एवमिति । एकांतभक्त्या शितेन तीक्ष्णेन ज्ञानकुठारेण स्वतंत्रतावाहयोर्ज्ञानभक्त्योः जीवोपाधिं त्रिगुणात्मकं लिंगशरीरं विवृश्च्य छित्वा परमात्मानं च संपद्य प्राप्य अथ यास्त्रं साधनं सजेति ॥ २४ ॥ इति टीकायां एकादशस्कंधे द्वादशोध्यायः ॥ १२ ॥ छ ॥

त्रयोदशोऽथ सत्त्वस्य मुख्या विद्योदयक्रमः ॥ हंसेतिहासतश्चित्तगुणविश्लेषवर्णनं ॥१॥ विद्याकुठारेण जीवात्रायं संवक्ष्य साध
नं स्यजेस्फक्तं ॥ ननु तत्र तमआदिगुणत्रयवृत्तिप्रतिबंधे सति कथं विद्योत्पत्तिरित्याशंक्य तन्निवृत्त्या विद्योत्पत्तिप्रकारमाह ॥ स
त्वमिति सप्तभिः ॥ तत्र यथा नदादिवदात्मधर्मा गुणाः स्युः तर्हि तत्स्वरूपत्वात्तेषां निवृत्तिर्न स्यात् न त्वेदस्तीत्याह ॥ बुद्धेः प्रकृते
रेते गुणाः न त्वात्मन इति ॥ अतः सत्त्वेन सत्त्ववृत्त्याऽन्यतमो हन्यात् रजस्तमोवृत्ती जयेदित्यर्थः ॥ सत्त्वं च सत्यादिवृत्तिरूपमु
पशमात्मकेन सत्त्वेनैव हन्यात् ॥१॥ ननु गुणत्रयवृत्तीनां परस्परोपमर्दकत्वात्कथं सत्त्ववृत्त्यैवेतरवृत्त्योर्नियमेन हंतव्याः

॥ श्रीभगवानुवाच ॥ सत्त्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः ॥ सत्त्वेनान्यतमौ हन्यात्सत्त्वं सत्त्वेन चैव हि ॥१॥ सत्त्वाद्धर्मो
भवेद्वृद्धात्पुंसो मद्भक्तिलक्षणः ॥ सात्त्विकोपासया सत्त्वं ततो धर्मः प्रवर्त्तते ॥२॥ धर्मो रजस्तमो हन्यात्सत्त्ववृद्धिरनु
त्तमः ॥ आशु नश्यति तन्मूलो ह्यधर्म उभये हते ॥३॥ आगमोऽपः प्रजा देशः कालः कर्म च जन्म च ॥ ध्यानं मंत्रोऽथ
संस्कारो दशैते गुणहेतवः ॥४॥ तत्तत्सात्त्विकमेवैषां यद्यद्वृद्धाः प्रचक्षते ॥ निंदंति तामसं तत्तद्राजसं तदुपेक्षितं ॥५॥

तत्राह ॥ सत्त्वादिति ॥ मद्भक्तिं लक्षयति ॥ यो धर्मः सद्भक्तिरूप एव वा ॥ सत्त्वमेव कथं वर्द्धेत तत्राह ॥ सात्त्विकानां पदार्थानामुपास
यासेवया सत्त्वं वृद्धं भवतीत्यर्थः ॥२॥ स च धर्मो रजस्तमश्च हन्यात् ॥ कुतः न विद्यते उत्तमो यस्मात्सर्वोत्तमः यतः सत्त्ववृद्धिः स
त्त्वस्य वृद्धिर्यस्मात् यस्मिन् कारणे सः अत एव तत्कार्यो धर्मप्रतिबंधोऽपि नास्तीत्याह ॥ तस्मिन्नुभयस्मिन् हते तन्मूलः तै रजम
सी रागद्वेषादिना प्रमादालस्यादिना च मूलं यस्य सः ॥३॥ सात्त्विकोपासनया सत्त्वं वर्द्धत इत्युक्तं तान्येव सत्त्ववृद्धिहेतून्दर्शयितुं
सामान्यतो गुणत्रयवृद्धिहेतूनाह ॥ आगम इति ॥ आगमः शास्त्रं ॥ अपः आपः ॥ कश्चिदागमोऽर्थ इति पाठः ॥४॥ एषु सात्त्विका
दिनिर्णयमाह ॥ एषामिति ॥ एषामेव मध्ये प्रचक्षते प्रशंसंति ॥ यद्यत् निंदंति तत्तत् ॥ यत्तु तैर्वृद्धैरुपेक्षितं न च प्रनिंदितं तद्राज

सात्विकान्येवेतिनिवृत्तिशास्त्राण्येवसेवेतनप्रवृत्तिपाखंडशास्त्राणि॥तीर्थापएवनगंधोदकसुराद्याः॥प्रजाःजनानांनिवृत्तानजना
नजप्रवृत्तदुराचारान्॥विविक्तंदेशंनरथ्याद्यूतदेशान्॥कालंब्राह्ममुहूर्तादिकंध्यानादौ॥नप्रदोषनिशीथादिन्॥कर्मच
नित्यं॥नकाम्याभिचारादीनि॥जन्मचवैष्णवशैवदीक्षालक्षणं॥नशाक्तक्षुद्रदीक्षारूपं॥ध्यानंविष्णोःनकामिनीवि
टिषां॥मंत्रंप्रणवादिकं॥नकाम्यक्षुद्रान्॥संस्कारमात्मनःशोधकं॥ननुकेवलंदेहगेहादीनां॥ननुस्त्रानंमहावाक्य
श्रवणादेवोत्पद्यते॥किंतत्रसत्वद्धाधर्मेणवा॥अतआह॥यावत्स्मृतिःआत्मापारोक्ष्यं॥यावच्चदेहद्वयतत्का

सात्विकान्येवसेवेतपुमान्सत्वविवृद्धये॥ततोधर्मस्ततोज्ञानंयावत्स्मृतिरपोहनं॥६॥वेणुसंघर्षजोवह्नि
र्दग्ध्वाशाम्यतितद्वनं॥एवंगुणव्यत्ययजोदेहःशाम्यतितत्क्रियः॥७॥उद्धवउवाच॥विदंतिमर्त्याःप्रा
येणविषयान्पदमापदां॥तथापिभुंजतेकृष्णतत्कथंश्वखराजवत्॥८॥

रणभूतगुणापोहःतावत्पर्यंतंज्ञानंनभवतीत्यर्थः॥६॥ननुगुणव्यतिकराज्जातोदेहःकथंस्वाश्रयभूतान्गुणान्स्वत
एवोत्सन्नयाविद्यया॰पोह्यस्वयमप्युपरमेत्तत्राह॥वेणूनांसंघर्षाज्जातोग्निर्यथास्वतएवोत्पन्नाभिर्ज्वालाभिस्तद्वनं
सर्वंदग्ध्वास्वयंशाम्यति॥एवंदेहोपितत्क्रियःतस्याग्नेरिवक्रियाव्यापारोयस्यसः॥७॥ननुनियतेंद्रियतयासात्वि
कसेवायामियानस्तिपुरुषार्थः॥तथापिराजसादीन्विषयान्दुःखमितिजानंतोपिकथंसेवंतइतिपृच्छति॥विदंती
ति॥पदंस्थानं॥श्वानोयथाभर्त्स्यमानाअपि॥खरायथापश्चाताड्यमानाअपिखरीमनुधावंतः॥अजायथानि
र्लज्जाहंतुमानीताअपितद्वदित्यर्थः॥८॥७॥

मिथ्याभिनिवेशेन भुंजत इति सहेतुकमाह॥ अहमिति त्रिभिः॥ प्रमत्तस्य विविकशून्यस्य देहादावहमिति मिथ्याबुद्धिर्हृदि यया
थावदुत्सर्पति॥ ततो हंबुद्धेश्च वैकारिकं सत्वप्रधानमपि मनः प्रति घोरं दुःखात्मकं रजः उत्सर्पति मनः व्याप्नोतीत्यर्थः॥१९॥ इद
मेवं भोग्यमिति सविकल्पः संकल्पः स्यात्॥ ततश्च अहो रूपमहो भाव इति गुणध्यानात् दुर्धरः कामः स्यात्॥२०॥ ततो विष
यान् भोक्तुं कर्माणि करोति॥२१॥ एवं चेन्न कस्यापि दुःखनिवृत्तिः स्यात् इत्याशंक्याह॥ यद्यपीति॥ यद्यपि यद्यपि रजस्तमोभ्यां

॥श्रीभगवानुवाच॥ अहमित्यन्यथाबुद्धिः प्रमत्तस्य यथा हृदि॥ उत्सर्पति रजो घोरं ततो वैकारिकं मनः॥१९॥ रजोयुक्त
स्य मनसः संकल्पः सविकल्पकः॥ ततः कामो गुणध्यानात् दुःसहः स्याद्धि दुर्मतेः॥२०॥ करोति कामवशगः कर्माण्यवि
जितेंद्रियः॥ दुःखोदर्काणि संपश्यन् रजोवेगविमोहितः॥२१॥ रजस्तमोभ्यां यदपि विद्वान्विक्षिप्तधीः पुनः॥ अतंद्रि
तो मनो युंजन्दोषदृष्टिर्न सज्जते॥२२॥ अप्रमत्तोनुयुंजीत मनो मय्यर्पयंछनैः॥ अनिर्विण्णो यथाकालं जितश्वा
सो जितासनः॥२३॥ एतावान्योग आदिष्टो मच्छिष्यैः सनकादिभिः॥ सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा॥२४॥

विक्षिप्तधीर्मूढधीश्च तथापि विद्वान्विवेकी पुनर्मनो निरुंधन्न सज्जते॥२२॥ विषयदोषदृष्ट्यापि मनो निरोधात् आत्मसुखं
तन्निरोधोपायमाह॥ अप्रमत्त इति॥ अनिर्विण्णः अनलसः यथाकालं त्रिषवणं मयि परमानंदरूपे अर्पयन् समादध्या
त्॥२३॥ विषयैः संग्रथितस्य मनसस्तद्वियोगेनेश्वरनिष्ठत्वसंभावितं मन्यमानं प्रति तन्निरूपणायेतिहासमुपक्षिपति॥ एत
वानिति॥ यथावन्मय्यावेश्यत इत्येतावानित्यर्थः॥२४॥४८॥

मच्छिष्यैरिक्तत्ते तेषामभीज्यामस्तामनेनरूपेणनिरूपणासंभवात्पृच्छतियद्देति॥ तंकालंतदेतद्रूपंचवेदितुमिच्छामितत्कथयेति॥
२५॥मानसाःमनोभवाःपुत्राःसूक्ष्मांदुर्ज्ञेयां॥एकांतिकींगतिंपराकाष्ठां॥२६॥तदेवाह॥गुणेष्विति॥विषयेषुस्वभावतोरागा
दिवशाच्चेतःप्रविशति॥तेचानुभूतविषयाःवासनारूपेणचेतसिप्रविशंति॥अतितितीर्षोःविषयानतिक्रमितुमिच्छोः॥२७

॥उद्धवउवाच॥ यदात्वंसनकादिभ्योयेनरूपेणकेशव॥ योगमादिष्टवानेतद्रूपमिच्छामिवेदितुं॥२५॥ श्रीभग
वानुवाच॥ पुत्राहिरण्यगर्भस्यमानसाःसनकादयः॥ पप्रच्छुःपितरंसूक्ष्मांयोगस्यैकांतिकींगतिं॥२६॥ सन
कादयऊचुः॥ गुणेष्वाविशतेचेतोगुणाश्चेतसिचप्रभो॥ कथमन्योन्यसंत्यागोमुमुक्षोरतितितीर्षोः॥२७॥ श्रीभ
गवानुवाच॥ एवंपृष्टोमहादेवःस्वयंभूर्भूतभावनः॥ ध्यायमानःप्रश्नबीजंनाभ्यपद्यतकर्मधीः॥२८॥ समा
मचिंतयद्देवःप्रश्नपारतितीर्षया॥ तस्याहंहंसरूपेणसकाशमगमंतदा॥२९॥ दृष्ट्वामांतउपव्रज्यकृत्वापा
दाभिवंदनं॥ ब्रह्माणमग्रतःकृत्वापप्रच्छुःकोभवानिति॥२०॥ इत्यहंमुनिभिःपृष्टस्तत्त्वजिज्ञासुभिस्तदा॥
यदवोचमहंतेभ्यस्तदुद्धवनिबोधमे॥२१॥७

एवमिति॥महादेवोपिस्वयंभूरपिभूतानांस्रष्टापिध्यायमानःविचारयन्नपिप्रश्नस्यबीजंयद्ज्ञानादयंप्रश्नस्तन्नाविंदत्
यतःकर्मविक्षिप्तधीः॥२८॥प्रश्नस्यपारमुत्तरमभिप्रायोवातस्यतितीर्षयाजिज्ञासया॥हंसरूपेणेतियथाहंसोनीरंक्षीरं
चपृथक्करोत्येवमहंगुणांश्चेतश्चेतिद्योतयितुंहंसरूपेणागतोऽस्मीति॥२९॥२०॥इत्यहंमुनिभिःपृष्टइतिपृथग्वाक्यं
यदवोचमितिपृथक्॥अतोऽस्मच्छब्दावृत्तिरदोषः॥तेभ्योयदवोचंतन्मेवाचंनिबोध॥२१॥

देहादिविविक्तात्मज्ञानेसतितन्निष्ठस्यरागाद्यसंभवात्स्वयमेवविषयचेतसोर्विश्लेषोभवतीतिवक्तुंप्रश्नखंडनमिषेणैवतावद्दात्मा
नात्मविवेकमाह॥वस्तुनइतित्रिभिः॥किमात्मनोयंप्रश्नः तदुपाधेर्भूतसंघस्यवा॥यद्यात्मनस्तर्हितस्यवस्तुतःपरमार्थभूतस्य
अनानात्वेसतिहेविप्राःयुष्माभिःकृतःप्रश्नईदृशः बहुषुनिर्द्धारणरूपःकथंघटेत॥वक्तुरुत्तरदातुर्वामेममकआश्रयः॥अ
विशेषेआत्मनिकंजातिगुणादिविशेषमाश्रित्योत्तरंवक्ष्यामीत्यर्थः॥२२॥भूतसंघविषयत्वेपिनअयंभावः॥प्रश्नःवाचारंभः
वाङ्मात्रेणारब्धःयतोऽनर्थकः कुतःभूतेषुदेवमनुष्यादिदेहेषुपंचात्मकेषु॥अतःसमानेषुअभिन्नेषुपुनश्चवस्तुतःपरम
कारणात्मनाअभिन्नेषु॥वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमितिश्रुतेः॥२३॥तत्रप्रपंचात्मकत्वंप्रत्यक्षादिसि

वस्तुनोयद्यनानात्वेआत्मनःप्रश्नईदृशः॥कथंघटेतवोविप्रावक्तुर्वामेकआश्रयः॥२२॥पंचात्मकेषुभूतेषुसमाने
षुचवस्तुतः॥कोभवानितिवःप्रश्नोवाचारंभोह्यनर्थकः॥२३॥मनसावचसादृष्ट्यागृह्यतेऽन्यैरपीन्द्रियैः॥अहमेव
नमत्तोन्यदितिबुध्यध्वमंजसा॥२४॥गुणेष्वाविशतेचेतोगुणाश्चेतसिचप्रजाः॥जीवस्यदेहउभयंगुणाश्चेतोमदा

द्धमेवेतिपरमकारणाभेदमेवोपपादयतिमनसेति॥मनआदिभिर्यद्यद्गृह्यतेतत्तदहमेवेत्यर्थः॥अंजसातत्त्वविचारेणएते
नैवसर्वात्मकोऽहमित्यंजसाप्युत्तरमुक्तंभवति॥२४॥एवंप्रश्नखंडनमिषेणैवात्मस्वरूपंसामान्यतोनिरूप्यब्रह्मणोपिपुः
परिहरंयत्पृष्टंतत्रोत्तरमाह॥गुणेष्वित्यादिनायावदध्यायसमाप्ति॥अयमभिप्रायः॥यदिकर्तृत्वभोक्तृत्वादिरूपतयावि
षयैःसंग्रथितंचित्तंबुद्ध्यादिशब्दवाच्यमेवजीवस्वरूपंभवेत्॥ततस्तद्वियोगोनघटेत॥तस्यतुस्वरूपमहंब्रह्मैवचित्ता
ध्यासेनतुतत्स्वभावतयाविषयैःसंग्रथितं॥अतःस्वस्यब्रह्मभावनयाविषयाणांचमिथ्यात्वानुसंधानेनसर्वतोनिर्विघ्नंभ
गवंतंभजतोभवत्येवपरिपूर्णस्वरूपावस्थानमिति॥हेप्रजाःपुत्रकाःससंगुणेषुचेतआविशति॥गुणाश्चचेतसि॥एवंगु

गाश्चेतोमद्ग्रथितंमदात्मनोब्रह्मरूपस्य
जीवस्यदेह॥२६॥अः[illegible]पाधिः॥ततुस्वरूपस्य॥

तस्मादभीक्ष्णं पुनः पुनः गुणसेवया तत्संस्कारेण गुणेष्वाविशद्चित्तं ॥ ते च पुनर्वासनारूपेण चित्ते प्रकर्षेण भवंतीति तथा ते गुणाश्च चेत श्चयदुभयं तन्मद्रूपः सन्त्यजेत् ॥२५॥ ननु जाग्रदाद्यवस्थावतः कुतः कूटस्थस्वरूपता तत्राह ॥ जाग्रत् जागरः स्वप्नः सुषुप्तं चेति बुद्धेर्वृ त्तयः ॥ तासां न स्वाभाविक्यः किंतु ॥ सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् ॥ प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततमि ति ॥ वक्ष्यमाणक्रमेण गुणत एव ॥ जीवस्तु विलक्षणः ॥ तदवस्थारहित एव विनिश्चितः कुतः तासां साक्षित्वेन ॥२६॥ ननु तर्हि कथमहं जागर्मीत्यादिप्रतीतिस्तत्राह ॥ यर्हि यस्मात्सम्यक् संसृतिः सरणमनयेति संसृतिर्बुद्धिः ॥ तया बंधोयमात्मनो गुणवृत्तीर्ददातीति तस्मा

गणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ॥ गुणाश्च चित्तप्रभवा मद्रूप उभयं सजेत् ॥२५॥ जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः ॥ तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥२६॥ यर्हि संसृतिबंधोयमात्मनो गुणवृत्तिदः ॥ मयि तु र्ये स्थितो जह्यात् त्यागस्तद्गुणचेतसां ॥२७॥ अहंकारकृतं बंधमात्मनोऽर्थविपर्ययं ॥ विद्वान्निर्विद्य संसारचिंतां र्ये स्थितस्त्यजेत् ॥२८॥ यावन्नानार्थधीः पुंसो न निवर्त्तेत युक्तिभिः ॥ जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ॥२९॥

न्मयि तुर्ये स्थितः सन्निमं संसृतिबंधं जह्यात् ॥ तत्तदा गुणचेतसां गुणानां चेतसश्चान्योन्यं त्यागो भवति ॥२७॥ कथं संसृत्या बंधः कथं च तं ज ह्यात्तत्राह ॥ अहंकारेण कृतं बंधं आत्मनः अर्थविपर्ययं आनंदाद्यावरणेनानर्थहेतुं विद्वान् जानन् सन् निर्विद्य दुःखमेतदिति ज्ञात्वा तुर्ये स्थितो भूत्वा संसारचिंतां संसारो बुद्धिस्तस्मिन् ॥ चिंतां अभिमानं तत्कृतां भोगचिंतां च सजेदिति ॥२८॥ यावदेवं न त्यजेत्तावत्त स्य कर्मज्ञानादिसर्वं व्यर्थमित्याह ॥ यावदिति ॥ यद्यपि जागर्त्ति कर्मादिषु तथापि स्वपन् स्वप्नान् पश्यन्निव भवति ॥ यतोऽज्ञः असम्य ग्दर्शी ॥ अत्र जागरणस्य स्वप्नदृष्टांतः स्वप्न इति ॥२९॥

ननुकथंवेदप्रमितवर्णाश्रमकर्मादिनानाधीनिवर्त्ततत्राह॥असत्वादिति॥भावानांदेहादीनांतत्कृताभिदावर्णाश्रमादिरूपागतयः
स्वर्गादिफलानि॥हेतवःकर्माणिचास्यात्मनोमृषाअविद्याबद्धिषयोवेदइतिभावः॥३१॥युक्तिभिरिरुक्तंताएवयुक्तीराह॥यइति॥अ
र्थान्स्थूलान्देहादीन्समस्तकरणैश्चक्षुरादिभिर्भुंक्ते॥कथंभूतान्॥अनुक्षणधर्मिणःक्षणिकबाल्यतारुण्यादिधर्मवतः॥
यश्चस्वप्नेहृदिजागरसदृशान्वासनामयान्भुंक्ते॥पश्चात्सुषुप्तेतान्सर्वानुपसंहरति॥सएकःकुतःत्रिगुणवृत्तिदृक्॥अव
स्थात्रयद्रष्टा॥ननुजाग्रदवस्थांसर्वेंद्रियाणिपश्यंति॥स्वप्नंमनःसुषुप्तिंतत्संस्कारशेषाबुद्धिःकथमात्मातद्द्रष्टातत्राह॥

असत्वादात्मनोऽन्येषांभावानांतत्कृताभिदा॥गतयोहेतवश्चास्यमृषास्वप्नदृशोयथा॥३१॥योजागरेबहिरनुक्षण
धर्मिणोर्थान्भुंक्तेसमस्तकरणैर्हृदितत्सदृक्षान्॥स्वप्नेसुषुप्तउपसंहरतेसएकःस्मृत्यन्वयात्त्रिगुणवृत्तिदृगिंद्रियेशः
॥३२॥एवंविमृश्यगुणतोमनसस्त्र्यवस्थामन्माययामयिकृताइतिनिश्चितार्थाः॥संछिद्यहार्दमनुमानसदुक्तितीक्ष्णज्ञा
नासिनाभजतमाखिलसंशयाधिं॥३३॥७

इंद्रियेशः॥ननुइंद्रियेशाः॥अपिविश्वतैजसप्राज्ञाःभिन्नाःन॥कुतःस्मृत्याप्रतिसंधानेनसर्वावस्थास्वन्वयात्॥यःस्वप्नानद्रा
क्षं॥पश्चात्तदनंतरंनकिंचिद्वेदिषंस्वएवएतर्हिजागर्मीत्युपाधिभेदेनविश्वादिव्यवहारइतिभावः॥एतेनबाल्युवाद्यवस्थास्व
पिप्रतिसंधानेनात्मैक्यंद्रष्टव्यं॥३२॥ततःकिमतआह॥एवमिति॥गुणतोयाएतामनसस्त्र्यवस्थातामद्विषयामयिकृताःनतत्त्वतःसंती
तिनिश्चितआत्मरूपोऽर्थोयैस्तेयूयंअखिलसंशयाधिंआधीयंतेयस्मिन्नितिआधिःअहंकारस्तंसंछिद्यहार्दंहृदिस्थितंमांभ
जत॥केनछित्वातदाह॥अनुमानैःसदुक्तिभिःसतामुपदेशैःश्रुतिभिश्चतीक्ष्णेनज्ञानखड्गेन॥३३॥श्रीदत्तात्रेयायनमः॥७

अनुमानानि दर्शयति। ईक्षेतेति। इदं जगद्विभ्रममीक्षेत॥ तत्र हेतवः॥ मनोविजृंभितत्वात्॥ दृष्टत्वाद्विनाशित्वाच्च स्वप्नवत् अतिचंचलत्वाच्च अलातचक्रवत्। ननु भ्रमोऽपि निर्विषयः कथं स्यात्तत्राह॥ विज्ञानमिति॥ निगमनं॥ तस्मात्त्रिधायोयं गुणपरिणामकृतो विकल्पो भेदः स मायेति॥ ३४॥ तस्मात्ततो दृश्यात् दृष्टिं प्रतिनिवर्त्य निजसुखानुभवो भवेत्॥ तन्नैष्वस्वार्थं च निवृत्ततृष्णस्तूष्णीं निरीहश्च भवेत्॥ मनोवाक्कायव्यापाररहित इत्यर्थः॥ ननु देहवतः सर्वथा दृष्टिप्रतिनिवर्तनायोगात् पुनः संसारः स्यादेवतत्राह॥ संदृश्य

ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं। विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः॥ ३४॥ दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः॥ संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृतिरानिपातात्॥ ३५॥ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं। दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः॥ ३६॥ श्रीराम॥ ७ ७

त इति॥ क्वचिदावश्यकाहारादिषु यद्यपि दीः संदृश्यते तथापि पूर्वमवस्तुबुद्ध्या यत्त्यक्तं तत्पुनर्मोहाय न भवेदेव॥ किंतु देहपातपर्यंतस्मृतिरिव स्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः॥ ३५॥ एतदेवोपपादयति॥ देहमिति॥ आसनादुत्थितं उत्थाय तत्रैवस्थितं ततः क्वचिदपेतं निर्गतं॥ पुनस्तत्रैवोपेतं वा देहमपि नानुसंधत्ते॥ कुतोऽन्यत्॥ यतः येन देहेन स्वरूपमध्यगमत् ज्ञातवान्॥ तं देहं यतः कारणात्॥ परिकृतं परिहितं वासो गतं स्थितं वा यथा न वेत्ति तद्वत्॥ ३६॥ श्रीदत्तात्रेयाय नमः॥ ७॥॥

ननुचयः परिपाल्यमानोपिमुंमूर्षतितंचेन्नपश्यतितर्हिपतेद्देवनेत्याह॥ देहोपीति॥ दैववशोनगछन्स्वारंभकंकर्मयावदस्तितावत्स्वयं तंप्रतिसमीक्षतएव॥ सासुःप्राणेंद्रियसहितः॥ ननुतर्हितस्मिन्कदाचिदासज्जेतापिनेत्याह॥ तमिति॥ स्वाप्नंस्वप्नतुल्यं॥ अधिरूढःप्राप्तःसमाधिपर्यंतोयोगोयेन॥ अतएवप्रतिबुद्धंज्ञातंपरमार्थवस्तुयेनसः॥ तथाचश्रुतिः॥ तस्यतावदेवचिरंयावन्नविमोक्ष्यसे॥ अथसंपत्स्यतइति॥ ३७॥ उक्तार्थेतेषांविश्वासार्थंस्वस्वरूपमाह॥ मयेति॥ सांख्यमात्मानात्मविवेकः योगोष्टांगः॥

देहोपिदैववशगःखलुकर्मयावत्स्वारंभकंप्रतिसमीक्षतएवसासुः॥ तंसप्रपंचमधिरूढसमाधियोगःस्वाप्नंपुनर्नभजतेप्रतिबुद्धवस्तुः॥ ३७॥ मयैतदुक्तंवोविप्रागुह्यंयत्सांख्ययोगयोः॥ जानीतमागतंयज्ञंयुष्मद्धर्मविवक्षया॥ ३८॥ अहंयोगस्यसांख्यस्यसत्यस्यर्तस्यतेजसः॥ परायणंद्विजश्रेष्ठाःश्रियःकीर्तेर्दमस्यच॥ ३९॥ मांभजंतिगुणाःसर्वेनिर्गुणंनिरपेक्षकं॥ सुहृदंप्रियमात्मानंसाम्यासंगादयोगुणाः॥ ४०॥ इतिमेछिन्नसंदेहामुनयःसनकादयः॥ सभाजयित्वापरयाभक्त्यागृणतसंस्तवैः॥ ४१॥ तैरहंपूजितःसम्यक्संस्तुतःपरमर्षिभिः॥ प्रत्येयायस्वकंधामपश्यतःपरमेष्ठिनः॥ ४२॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेहंसगीतायांत्रयोदशोध्यायः॥ १३॥

तयोर्गुह्यंरहस्यं॥ यज्ञंविष्णुं॥ युष्मद्धर्मविवक्षयेसनेनधर्माश्चप्युपदिष्टाइतिज्ञेयं॥ ३८॥ अतएवयत्तेनहंसरूपेणब्रह्मणेत्र भ्याद्धमाधवेइत्यनुवादोभविष्यति॥ ऋतंप्रमीयमाणोधर्मःसत्यमनुष्ठीयमानोधर्मःतेजःप्रभावः॥ एतेषांपरमयनम्॥ ३९॥ किंचमामिति॥ कथंभूताःअगुणाःगुणपरिणामरूपानभवंति॥ किंतुनित्याइत्यर्थः॥ ४०॥ मेमया॥ अगृणतमांतुष्टुवुः॥ ४१॥ प्रत्येयायप्रत्यागतोस्मि॥ ४२॥ इतिश्रीभागवतेएकादशस्कंधेटीकायांहंसगीतव्याख्यानंत्रयोदशोध्यायः॥ १३॥ छ॥ छ॥ छ॥

चतुर्दशेपरंश्रेयोभक्तिरेवनचेतरत्॥ इत्येतद्वर्ण्यतेध्यानंयोगश्चसहसाधनैः॥१॥ एवंतावद्भगवताभक्त्यामोक्षइत्युक्तंअन्येत्वन्या
निसाधनानिवदंति॥ तत्रविशेषनिर्द्धारणायपृच्छति॥ वदंतीति॥ श्रेयांसिश्रेयःसाधनानि॥ किंविकल्पेनप्राधान्यंउताहोकिंवा
एकस्यैवमुख्यता॥१॥ एकमुख्यतापक्षेप्यनेकारणंभवतेति॥ अनपेक्षितःनअपेक्षितंअपेक्षायस्मिन्सः॥ अत्रहेतुः॥ अ
यमर्थः॥ भगवतायोभक्तियोगउक्तःअन्येचयानिश्रेयःसाधनानिवदंति॥ तेषांकिंसाक्षात्फलसाधनत्वेनप्राधान्यमेवसर्वे

॥ उद्धवउवाच॥ वदंतिकृष्णश्रेयांसिबहूनिब्रह्मवादिनः॥ तेषांविकल्पप्राधान्यमुताहोएकमुख्यता॥१॥ भवतोदा
हृतःस्वामिन्भक्तियोगोऽनपेक्षितः॥ निरस्यसर्वतःसंगंयेनत्वय्याविशेन्मनः॥२॥ श्रीभगवानुवाच॥ कालेनन
ष्टाप्रलये॥ वाणीयंवेदसंज्ञिता॥ मयादौब्रह्मणेप्रोक्तायस्यांधर्मोमदात्मकः॥३॥ तेनप्रोक्ताचपुत्रायमनवेपूर्वजा
यसा॥ ततोभृग्वादयोगृह्णन्सप्तब्रह्ममहर्षयः॥४॥ तेभ्यःपितृभ्यस्तत्पुत्रादेवदानवगुह्यकाः॥ मनुष्याःसिद्धगंध
र्वाःसविद्याधरचारणाः॥५॥५

षांउतांगांगित्वं॥ प्रधान्येपिकिंविकल्पेनसर्वेषांतुल्यफलवत्वंयद्वाकश्चिदस्तिविशेषइति॥२॥ तत्रभक्तिरेवमहाफलत्वेन
मुख्या॥ अन्यानितुस्वस्वप्रकृत्यनुसारेणपुष्पस्थानीयस्वर्गादिफलबुद्धिभिःप्राणिभिःप्राधान्येनपरिकल्पितानिक्षुल्लकफ
लानीतिवक्तुंप्रकृत्यनुसारेणबहुधावेदार्थप्रतिपत्तिमाह॥ कालेनेतिसप्तभिः॥ मदात्मकःमय्येवात्माचित्तंयेनसः॥३॥
भृग्वादयःभृगुश्चमरीचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुरित्येतेचसप्तब्राह्मणाःप्रजापतयःतेचतेमहर्षयश्च॥४॥५॥

॥भा॰ए॰॥

॥५२॥

किंचदेयाः कूमस्वेददोर्गंध्यादिराहित्येन किंदेवा मनुष्या वेति संदेहास्पदं द्वीपांतर मनुष्या एव किंनराः किंचिन्नरा इव मुखतः शरीरतो वा॥ किंपुरुषाः किंचित्पुरुषा एव वानरादयः॥ प्रकृतयो वासनाः बह्व्यः॥ कुतः रजःसत्वतमोभिर्भुवः जन्मस्थानानि यासां ताः॥६॥ भूतानि देवासुरमनुष्यादीनि॥ चित्रा वाचः वेदार्थव्याख्यानविषयाः॥७॥ एवमित्युक्तोपसंहारः॥ केषांचिद्ध्ययनादिस्मृत्यानां मध्युपदेशपारंपर्येण अपरे पाखंडमतयः वेदविरुद्धार्थमतयः तत्प्रकृतीनां मायागुणमूलत्वान्मन्मायामोहितधियः अनेकांतं नाना

किंदेवाः किन्नरा नागा रक्षःकिंपुरुषादयः॥ बह्व्यस्तेषां प्रकृतयो रजःसत्वतमोभुवः॥६॥ ताभिर्भूतानि भिद्यंते भूतानां मतयस्तथा॥ यथाप्रकृति सर्वेषां चित्रा वाचः स्रवंति हि॥७॥ एवं प्रकृतिवैचित्र्याद्भिद्यंते मतयो नृणां॥ पारंपर्येण केषांचित्पाखंडमतयोऽपरे॥८॥ मन्मायामोहितधियः पुरुषाः पुरुषर्षभ॥ श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि॥९॥ धर्ममेके यशश्चान्ये कामं सत्यं दमं शमं॥ अन्ये वदंति स्वार्थं वा ऐश्वर्यं त्यागभोजनं॥१०॥ ६९ ६९

विधं॥१॥ तदेवाह॥ धर्ममिति सार्धेन॥ धर्मं कर्ममीमांसकाः॥ तदुक्तं॥ मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः॥ नित्यनैमित्तिके कुर्यात्प्रत्यवायजिघांसया इत्यादि॥ यशः काव्यालंकारकृतः॥ यथाहुः॥ यावत्कीर्तिर्मनुष्यस्य पुण्यलोकेषु गीयते॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते इति॥ कामं वात्स्यायनादयः॥ सत्यं शमं दमं च योगशास्त्रकृतः॥ अन्ये दंडनीतिकृतः॥ वैप्रसिद्धं ऐश्वर्यमेव स्वार्थं पुरुषार्थं वदंति॥ अतः समाद्युपाय एव श्रेयःसाधनमिति तेषां मतं तथैव त्यागं भोजनं च लोकायतिकाः यज्ञं तपो दानं॥ यज्ञो देवतानां पूजनं॥ तपश्च दानं च॥२०॥ ॥

क्वचिद्दानं तपो व्रतानि नियमान्यमान्॥१

॥रामः॥

॥५२॥

तेषांतुच्छफलत्वमाह॥ आद्यंतवंतइति॥ एषांलोकाः एतैःसाध्यानिफलानि॥ तमोनिष्ठाः मोहावसानाः भोगकालेप्यसूयादिभिः शुचा र्पिताः व्याप्ताः॥११॥ भक्तेर्मुख्यत्वमाह॥ मयीतियावत्समाप्ति॥ हेसभ्य मयापरमानंदरूपेण आत्मनास्वरूपेण स्फुरता॥१२॥ किं चान्येषांतत्तल्लोकादिपरिच्छिन्नंसुखंभक्तस्यतुपरिपूर्णमित्याह॥ अकिंचनस्येति॥१३॥ परिपूर्णतामाह॥ नपारमेष्ठ्य

आद्यंतवंतएवैषांलोकाःकर्मविनिर्मिताः॥ दुःखोदर्कास्तमोनिष्ठाःक्षुद्रानंदाःशुचार्पिताः॥११॥ मय्यर्पि तात्मनःसभ्यनिरपेक्षस्यसर्वतः॥ मयात्मनासुखंयत्तत्कुतःस्याद्विषयात्मनां॥१२॥ अकिंचनस्यदांतस्य स्यशांतस्यसमचेतसः॥ मयासंतुष्टमनसःसर्वाःसुखमयाःदिशः॥१३॥ नपारमेष्ठ्यंनमहेंद्रधिष्ण्यंनसा र्वभौमंनरसाधिपत्यं॥ नयोगसिद्धीरपुनर्भवंवामय्यर्पितात्मेच्छतिमद्विनान्यत्॥१४॥ नतथामेप्रियतमो आत्मयोनिर्नशंकरः॥ नचसंकर्षणोनश्रीर्नैवात्माचयथाभवान्॥१५॥ निरपेक्षंमुनिंशांतंनिर्वैरंस मदर्शिनं॥ अनुव्रजाम्यहंनित्यंपूयेयेत्यंघ्रिरेणुभिः॥१६॥ श्रीदत्तात्रेयायनमः॥ श्रीरामचंद्रायनमः॥
[जं]

मिति॥ रसाधिपत्यंपातालादिस्वाम्यं॥ अपुनर्भवंमोक्षमपि॥ मद्विनामांहित्वाअन्यन्नेच्छति॥ अहमेवतस्यप्रेष्ठइत्यर्थः॥१४ ममापिसएवप्रेष्ठइत्याह॥ नतथेति॥ द्वाभ्यां॥ आत्मयोनिर्ब्रह्मापुत्रोपि॥ शंकरोमत्स्वरूपोपि॥ संकर्षणःभ्रातापि॥ श्रीर्भा र्यापि॥ आत्मामूर्त्तिरपि॥ यथाभक्तइतिवक्तव्येजतिहर्षेणाह॥ भवानिति॥१५॥ पूयेयमदंतर्वर्त्तिब्रह्मांडानिपवित्रीकुर्यामिति भावेनेत्यर्थः॥१६॥

किंच मद्भक्तानां सुखं एतावदेवं भूतमिति वा को वक्तुं समर्थः यतस्तत्सुखसंवेद्यं निरूपममित्याह॥ निःकिंचना इति॥ महांतः निरहं
मानाः अनालब्धधियः अस्पृष्टचित्ताः निष्किंचनत्वादीनां यथेष्टं हेतुहेतुमद्भावः॥ एवंभूताः मम मदीयाः यत्सुखं जुषंति तत्सु
खं त एव विदुः नान्ये कुतः नैरपेक्ष्यं नास्ति अपेक्षणीयं येषां ते निरपेक्षास्तैरेव लभ्यं न तु मोक्षापेक्षैरपीत्यर्थः॥ यद्वा॥ एवंभूताः
संतो मम मामित्यर्थः॥ जुषंते प्रीणयंतीति त एव यन्नैरपेक्ष्यं सुखं तद्विदुर्नान्य इत्यन्वयः॥१७॥ अपि च अन्यास्तां तावदुत्तमभक्तकथा॥

निःकिंचना मय्यनुरक्तचेतसः शांता महांतोऽखिलजीववत्सलाः॥ कामैरनालब्धधियो जुषंति यत्तन्नैरपेक्ष्यं न वि
दुः सुखं मम॥१७॥ बाध्यमानोपि मद्भक्तो विषयैरजितेंद्रियः॥ प्रायः प्रगल्भया भक्त्या विषयैर्नाभिभूयते॥१८॥ यथा
ऽग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात्॥ तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्नशः॥१९॥ न साधयति मां योगो
न सांख्यं धर्म उद्धव॥ न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता॥२०॥ भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां॥
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात्॥२१॥ धर्मः सत्यदयोपेतो विद्या वा तपसान्विता॥ मद्भक्त्यापेतमात्मानं न स
म्यक् प्रपुनाति॥२२॥ ७२ हि

यतः प्राकृतोपि भक्तः कृतार्थ एवेत्याह॥ बाध्यमान इति द्वाभ्यां॥ विषयैराकृष्यमाणोपि प्रगल्भया समर्थया॥१८॥ यथाग्निरिति॥ पा
कार्थं प्रज्वालितोऽग्निर्यथा काष्ठानि भस्मीकरोतीति तथा॥ रागादीनापि कथंचिन्मद्विषयास्ती भक्तिः समस्तपापानीति॥ भगवा
नपि स्वभक्तिमहिमाश्चर्येण संबोधयति॥ अहो उद्धव विस्मयं शृण्विति॥१९॥ अत एवंभूतं श्रेयं नास्तीत्याह॥ न साधयतीति द्वा
भ्यां॥२०॥ श्रद्धया भक्तिस्तया संभवात्॥ जातिदोषादपीत्यर्थः॥२१॥ भक्त्यभावेऽन्यत्साधनं व्यर्थमित्याह॥ धर्म इति द्वाभ्यां॥२२॥

रोमहर्षादिकंविनाकथंभक्तिर्गम्यते॥भक्त्याचविनाकथमाशयःशुध्येदिति॥२३॥किंचभक्तिःस्वाश्रयंशोधयतीतिकिंवक्तव्यं॥यतोगद्गदत्वादि
लक्षणोमद्भक्तियुक्तोलोकंसर्वंपुनातीत्याह॥वागिति॥२४॥अपिचभक्त्यैवात्मशुद्धिर्नान्यतइतिसदृष्टांतमाह॥यथाऽग्निनाध्मातंतापित
मेवहेमसुवर्णंअंतर्मलंजहाति॥नक्षालनादिभिः॥स्वंनिजंरूपंभजते॥कर्मानुशयंकर्मवासनां॥मांभजतेमद्रूपतामापद्यते॥२५॥ननुब्र
ह्मविदाप्नोतिपरं॥तमेवविदित्वातिमृत्युमेतीत्यादिश्रुतिभ्योज्ञानादेवाविद्यानिवृत्यात्मप्राप्तिरेवगम्यतेकुतोभक्तियोगेनेत्युच्यतेत

कथंविनारोमहर्षंद्रवताचेतसाविना॥विनानंदाश्रुकलयाशुध्येद्भक्त्याविनाशयः॥२३॥वाग्गद्गदाद्रवतेयस्यचित्तंरुदत्य
भीक्ष्णंहसतिकचिच्च॥विलज्जउद्गायतिनृत्यतेचमद्भक्तियुक्तोभुवनंपुनाति॥२४॥यथाऽग्निनाहेममलंजहातिध्मातंपु
नःस्वंभजतेस्वरूपं॥आत्माचकर्मानुशयंविधूयमद्भक्तियोगेनभजत्यथोमां॥२५॥यथायथात्मापरिमृज्यतेसौमत्पुण्य
गाथाश्रवणाभिधानैः॥तथातथापश्यतिवस्तुसूक्ष्मंचक्षुर्यथैवांजनसंप्रयुक्तं॥२६॥विषयान्ध्यायतश्चित्तंविषयेषुवि
षज्जते॥मामनुस्मरतश्चित्तंमय्येवप्रविलीयते॥२७॥तस्मादसदभिध्यानंयथास्वप्नमनोरथं॥हित्वामयिसमाधत्स्वमनो
मद्भावभावितं॥२८॥

त्राह॥यथायथेति॥आत्माचित्तंपरिमृज्यतेशोध्यते॥मत्पुण्यगाथानांश्रवणैरभिधानैश्चभक्तेरेवांतरव्यापारोज्ञानंनपृथगित्यर्थः॥
२६॥किंचज्ञानंनामचित्तस्यमदाकारपरिणामःसचमांभजतःस्वतएवभवति॥नन्वयत्नांतरमपेक्षतइतिसदृष्टांतमाह॥विषया
निति॥तदुक्तंलुब्धाधनमयंविश्वंकामुकाःकामिनीमयं॥नारायणमयंधीराःपश्यंतिज्ञानचक्षुषः॥२७॥यस्मादत्यत्नाधनंतत्फलं
चस्वप्नमनोरथवदसदभिध्यानमात्रं॥तत्तस्माद्विहायमय्येवमनःसमाहितंकुर्विंतिप्रकरणार्थमुपसंहरति॥तस्मादिति॥मद्भाव

भावितंमद्भावेनमद्रूपेणयोजितं॥२८॥१४॥

विशेषतोवात्स्यायनाद्युक्तकाममार्गाःपरित्याज्याइत्याह॥ स्त्रीणामिति॥ आत्मवान्धीरःसन्क्षेमेनिर्भयदेशेविविक्तेविजने॥ २९॥ ए
तदुपपादयति॥ नतथेति॥ अस्यपुंसःयथातत्संगिसंगतःक्लेशोभवेत्॥ यथाचबंधोयोषित्संगतःतथाऽन्यप्रसंगतःनभवेदिति
॥ ३०॥ मांचिंतयेदित्युक्तंतत्प्रकारंपृच्छति॥ यथेति॥ ध्यानांगप्रश्नःयाद्दशमिति ध्येयविशेषणप्रश्नः॥ यदात्मकमितियस्यैतानिवि
शेषणानितत्स्वरूपप्रश्नः॥ एतन्मेध्यानं॥ मेवक्तुमर्हसीतिपाठः॥ तत्रायमर्थः॥ मुमुक्षुस्त्वांयथाध्यायेत्तत्तन्मेवक्तुमर्हसि॥ जि

स्त्रीणांस्त्रीसंगिनांसंगंत्यक्त्वादूरतआत्मवान्॥ क्षेमेविविक्तआसीनश्चिंतयेमामतंद्रितः॥ २९॥ नतथाऽस्यभवेत्क्ले
शोबंधश्चान्यप्रसंगतः॥ योषित्संगाद्यथापुंसोयथातत्संगिसंगतः॥ ३०॥ उद्धवउवाच॥ यथात्वामरविंदाक्षयाद्दृ
शंवायदात्मकं॥ ध्यायेन्मुमुक्षुरेतन्मेध्यानमेवक्तुमर्हसि॥ ३१॥ श्रीभगवानुवाच॥ समआसनआसीनःस
मकायोयथासुखं॥ हस्तावुत्संगआधायस्वनासाग्रकृतेक्षणः॥ ३२॥ प्राणस्यशोधयेन्मार्गंपूरकुंभकरेचकैः॥
विपर्ययेणापिशनैरभ्यसेन्निर्जितेंद्रियः॥ ३३॥ छ॥

शासोःकथनायमेपुनरेतत्तद्ध्यस्यमेवपुरुषार्थः॥ ननुध्यानेनक्वसमस्तीति॥ तदुक्तं॥ त्वयोपभुक्तस्रग्गंधेत्यादि॥ त्वंवक्तु
मर्हसीतिपाठस्तुसुगमः॥ ३१॥ तत्रध्यानांगत्वेनासनप्राणायामप्रकारमाह॥ समइतिचतुर्भिः॥ समेनात्युच्चेनातिनीचेआ
सनेकंबलादौसमकायःसन्यथासुखमासीनइतिनास्तिस्वस्तिकादिनियमइत्युक्तं॥ नासाग्रनिरीक्षणंचचित्तस्थैर्याय॥
अंतर्लक्ष्याबहिर्दृष्टिःस्थिरचित्तःसुसंयतइतियोगशास्त्रोक्तेः॥ ३२॥ विपर्ययेणरेचकपूरककुंभकक्रमेण॥ यद्वावामनाड्या
पूरितंदक्षिणयासृजेत्॥ तयावापूरितंवामयेत्येवंविपर्ययेण॥ यथोक्तंयोगे॥ इडयापूरयेद्वायुंसृजेत्पिंगलयाततइति॥ निर्जि
तेंद्रियइतिप्रत्याहारउक्तः॥ ३३॥ छ॥

प्राणायामो द्विविधः॥ सगर्भो ऽगर्भश्चेति॥ तत्र श्रेष्ठत्वात्प्रणवगर्भमाह॥ हृदीति द्वाभ्यां॥ मूलाधारादारभ्याविच्छिन्नं संततं घंटानादतुल्यमों
कारं हृदि संस्थितं प्राणेन उदीर्य ऊर्ध्वं द्वादशांतपर्यंतं नीत्वा॥ कथं बिसोर्णवत् कमलनालतंतुवत्॥ तत्र मात्रातीते स्वरे पंचदशं बिंदु सं
वेशयेत्॥ अथ पुनरित्यस्य तं च बिंदुं शिरस्कं कुर्यादित्यर्थः॥ यद्वा मूलाधारादारभ्य मूर्द्धांतपर्यंतं बिसतंतुवत् सूक्ष्ममविच्छिन्नं छिसं
तं हृदि मनसि प्राणेनोदीर्याभिव्यज्य॥ अथ पुनस्तत्रोंकारे घंटानादतुल्यं स्वरं उदात्तं नादं स्थिरीकुर्यादिति॥ २४॥ मासादर्वाकूजिता

हृद्यविच्छिन्नमोंकारं घंटानादं बिसोर्णवत्॥ प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरं॥ ३४॥ एवं प्रणवसंयुक्तं प्राणमेव
समभ्यसेत्॥ दशकृत्वस्त्रिषवणं मासादर्वाग्जितानिलः॥ ३५॥ हृत्पुंडरीकमंतस्थमूर्ध्वनालमधोमुखं॥ ध्यात्वोर्ध्व
मुखमुन्निद्रमष्टपत्रं सकर्णिकं॥ ३६॥ कर्णिकायां न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं॥ वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमं
गलं॥ ३७॥ समं प्रशांतं सुमुखं दीर्घचारुचतुर्भुजं॥ सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं॥ ३८॥ समानकर्णविन्यस्तस्फु
रन्मकरकुंडलं॥ हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं॥ ३९॥ शंखचक्रगदापद्मवनमालाविभूषितं॥ नूपुरैर्विलसत्पा
दं कौस्तुभप्रभयायुतं॥ ४०॥ ७

ञ्जितानिलो भवति॥ ३५॥ एवं ध्यानांगमुक्त्वा यादृशमित्यस्योत्तरं वक्तुं ध्येयपीठमाह॥ हृत्पुंडरीकमिति सार्द्धेन॥ अंतस्थं देहांतर्वर्ति ऊ
र्ध्वनालमधोमुखं मुकुलितं च॥ कदलीपुष्पसंकाशं यदस्ति तद्विपरीतं ध्यात्वेत्यर्थः॥ ३६॥ न्यसेच्चिंतयेत्॥ सविशेषणं ध्यानमाह॥
वह्निमध्य इति षड्भिः॥ ध्यानमंगलं ध्यानस्य शुभं विषयं॥ ३७॥ समं अनुरूपावयवं दीर्घाश्चत्वारो भुजा यस्मिन् तत्॥ सुचारु अतिर
म्यं॥ ३८॥ ३९॥ समानयोः कर्णयोर्विन्यस्ते स्फुरती मकराकारे कुंडले यस्मिन् तत्॥ श्रीवत्सश्रियो निकेतनं॥ वक्षसि दक्षिणवामतः ता
भ्यां युक्तमित्यर्थः॥ ४०॥

ष्मद्भिः किरीटादिभिः आसमंतात्कृतमलंकृतं॥ प्रसादेन शोभनं मुखमीक्षणं च यस्मिन् तत्॥४१॥ सुकुमारमतिकोमलं॥ स
विशेषणं ध्यानमुपसंहरति॥ इंद्रियाणीति॥ प्रकर्षेण नयेत्॥ सर्वतः सर्वांगयुक्ते॥४२॥ यादशाभिसस्योत्तरत्वेन सविशेषणमु
क्त्वा यदात्मकमिसस्योत्तरत्वया शनैर्विशेषणत्यागेन ध्यानमेव समाधिपर्यंतमाह॥ तदिति त्रिभिः॥ एकत्रांगे अन्यान्यंगा
नि न चिंतयेत्॥ एकत्रेति यदुक्तं तद्देवांगं दर्शयति॥ सुस्मितमिति॥४३॥ व्योम्नि सर्वकारणरूपे॥ तच्च कारणत्वमपि स

घुमत्किरीटकटककटिसूत्रांगदायुतं॥ सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणं॥४१॥ सुकुमारमभिध्यायेत्सर्वांगेषु म
नो दधत्॥ इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः॥ बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः॥४२॥ तत्सर्वव्यापकं चि
त्तमाकृष्यैकत्र धारयेत्॥ नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखं॥४३॥ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारये
त्॥ तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत्॥४४॥ एवं समाहितमतिर्मामेवात्मानमात्मनि॥ विचष्टे मयि सर्वात्म
न् ज्योतिर्ज्योतिषि संयुतं॥४५॥ ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः॥ संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः॥४६॥
॥इति श्रीभा॰ महापु॰ एका॰ भगवदुद्धवसंवादे चतुर्दशोऽध्यायः॥२४॥

क्रामदारोहः मयि ब्रह्मणि आरूढः सन् न किंचिद्ध्यातृध्येयविभागमपि चिंतयेत्॥४४॥ मामेवात्मनि विचष्टे॥ आत्मा
नं च सर्वात्मनि मयि संयुतं विचष्टे॥ ज्योतिर्ज्योतिषि संयुक्तमिवेत्यन्वयः॥४५॥ एवंभूतं समाधिपर्यंतं ध्यानस्य फ
लमाह॥ ध्यानेनेति॥ मनो युंजतः समादधतः द्रव्यज्ञानक्रियाभ्रमः॥ अधिभूताधिदैवाध्यात्मरूपः द्रष्टृदृश्यद
र्शरूपो वा भ्रमः निर्वाणं शांतिं सम्यग्यास्यतीति॥४६॥ इति श्रीभागवते भावार्थदीपिकायां चतुर्दशोऽध्यायः॥२४॥ ॥

ततःपंचदशोप्रोक्ताःसिद्धयोधारणानुगाः॥श्रीविष्णुपदसंप्राप्तावंतरायतयामताः॥४॥एवंमनोयुंजतोयोगिनोंतराविर्भवंत्यःसिद्धयोप्यंतरा
यप्रायाएव॥अतस्ताःपरिहृत्यपरमेश्वरपरएवभवेदितिवक्तुंसिद्धीराह॥जितेंद्रियस्येति॥युक्तस्यस्थिरचित्तस्य॥१॥स्विदितिवितर्के
कास्वित्किंनाम॥कथंस्वित्कीदृशीवाधारणाश्चकतीतिप्रश्नांतरेवाशब्दः॥त्वमेवैतज्जानासिनान्यइत्याशयेनाह॥योगिनामिति॥२
धारणाश्चअष्टादशस्वनुषंगः॥योगपरागैरितित्रिकालज्ञत्वादिक्षुद्रसिद्धीरन्यपिजानंतीतिभावः॥अहमेवप्रधानंमुख्यःस्वभाव

॥श्रीभगवानुवाच॥जितेंद्रियस्ययुक्तस्यजितश्वासस्ययोगिनः॥मयिधारयतश्चेतउपतिष्ठंतिसिद्धयः॥१॥उद्धवउ
वाच॥कयाधारणयाकास्वित्कथंस्वित्सिद्धिरच्युत॥कतिवासिद्धयोब्रूहियोगिनांसिद्धिदोभवान्॥२॥श्रीभग
वानुवाच॥सिद्धयोऽष्टादशप्रोक्ताधारणायोगपारगैः॥तासामष्टौमत्प्रधानादशैवगुणहेतवः॥३॥अणिमा
महिमामूर्त्तेर्लघिमाप्राप्तिरिंद्रियैः॥प्राकाम्यंश्रुतदृष्टेषुशक्तिप्रेरणमीशिता॥४॥श्रीरामचंद्रायनमः॥

तत्राष्टयोपासांतामत्सारूप्यंप्राप्तेषुकिंचिन्न्यूनतयाभवंतीतिभावः॥गुणहेतवः॥सर्वोत्कर्षहेतुकाः॥३॥ताःस्वरूपेणोप
दिशति॥अणिमेतिसार्द्धैःपंचभिः॥अणिमामहिमालघिमाचमूर्त्तेर्देहस्यतिस्रः॥सिद्धयः॥प्राप्तिर्नामसिद्धिःसर्वप्राणिना
मिंद्रियैःसहतत्तद्देवताधिष्ठातृरूपेणसंबंधइत्यर्थः॥श्रुतेषुपारलौकिकेषु॥दृष्टेषुदर्शनयोग्येष्वपिसर्वेषुभुविवरादिष्वपिहि
तेष्वपिप्राकाम्यंभोगदर्शनसामर्थ्यंसिद्धिःशक्तीनांमायातत्कार्याभूतानांप्रेरणंतत्रेश्वरेमायाअन्येषुतदंशानांप्रेरणमी
शितानामसिद्धिः॥४॥७२॥

॥ भा॰ ए॰ ॥
॥ ५६ ॥

विषयभोगेष्वसंगोवशितासिद्धिः ॥ यत्कामःयद्यत्सुखंकामयतेतत्तदवस्यतितस्यतस्यसीमानंप्राप्नोतीतिसिद्धिः ॥ औत्पत्तिकाःस्वा
भाविक्योनिरतिशयाश्चेत्यर्थः ॥५॥ गुणहेतुसिद्धीराह ॥ अनूर्मिमत्त्वंक्षुत्पिपासादिराहित्यं ॥ दूरेश्रवणंदर्शनंचेतिद्वेसिद्धी ॥ मनोवे
गेनदेहस्यगतिःकामितरूपप्राप्तिः ॥ परकायप्रवेशः ॥६॥ स्वेच्छामृत्युः ॥ अप्सरोभिःसहदेवानांयाःक्रीडाःतासामनुदर्शनंप्राप्तिः
संकल्पानुरूपाप्राप्तिः अप्रतिहताआसमंताद्गतिर्यस्याःसाआज्ञाचेसेतादृशा ॥७॥ क्षुद्रसिद्धीश्चपंचाह ॥ त्रिकालज्ञत्वमिति ॥

गुणेष्वसंगोवशितायत्कामस्तदवस्यति ॥ एतामेसिद्धयःसौम्यअष्टावौत्पत्तिकामताः ॥५॥ अनूर्मित्वंदेहेस्मिन्दू
रश्रवणदर्शनं ॥ मनोजवःकामरूपंपरकायप्रवेशनं ॥६॥ स्वछंदमृत्युर्देवानांसहक्रीडानुदर्शनं ॥ यथासंकल्पसं
सिद्धिराज्ञाप्रतिहतागतिः ॥७॥ त्रिकालज्ञत्वमद्वंद्वंपरचित्ताद्यभिज्ञता ॥ अग्न्यर्कांबुविषादीनांप्रतिष्टंभोऽपराजयः
॥८॥ एताश्चोद्देशतःप्रोक्तायोगधारणसिद्धयः ॥ ययाधारणयायास्याद्यथावास्यान्निबोधमे ॥९॥ भूतसूक्ष्मात्मनि
मयितन्मात्रंधारयेन्मनः ॥ अणिमानमवाप्नोतितन्मात्रोपासकोमम ॥१०॥ महत्यात्मन्मयिपरेयथासंख्यंमनोदधत् ॥
महिमानमवाप्नोतिभूतानांचपृथक्पृथक् ॥११॥

अद्वंद्वंशीतोष्णाद्यभिभवः ॥ अग्न्यादीनांसंस्तंभनं ॥८॥ तत्तद्धारणाभिःसहविशेषतोनिरूपयति ॥ ययेतियावत्समाप्ति ॥९॥ भूत
सूक्ष्मोपाधौमयितन्मात्रंभूतसूक्ष्माकारंसःतन्मात्रोपासकःमममदीयमणिमानं ॥१०॥ ज्ञानशक्तिमहत्तत्वोपाधौमयिय
थासंख्यंमहत्तत्वाकारं ॥ भूतानांचेतिआकाशादिभूतोपाधौचमयिमनोधारयन्तत्तद्भूतमहिमानमाप्नोतीत्यर्थः ॥११॥७॥

॥ रामः ॥
॥ ५६ ॥

वाय्वादिभूतानां ये परमाणवः तन्मये तदुपाधौ मयि चित्तं रंजयन्योगी कालसूक्ष्मार्थतां कालोपरमाणूपाधिरूपतामिति लघुत्वविवरणं ॥ तदुक्तं ॥ स कालः ॥ परमाणुर्वै यो भुंक्ते परमाणुतामिति ॥ १२ ॥ वैकारिकाहंकारोपाधौ मयि अखिले एकाग्रे ॥ आत्मत्वं अधिष्ठातृत्वं ॥ अत्र हेतुः ॥ मन्मनाः मयि मनोधारणप्रभावादेव भवति ॥ नात्रातीव हेतुरनुसंधेय इति भावः ॥ एवं मद्धारणानुभावेन मद्योगबलमाश्रय इत्यादिषु द्रष्टव्यं ॥ १३ ॥ क्रियाशक्तिप्रधानं महत्तत्त्वमेव सूत्रं तदुपाधौ मयि सः पारमेष्ठ्यं सर्वोत्कृष्टं प्राकाम्यं विंदते ॥ कथंभूतस्य ॥ अव्यक्ताज्जन्म यस्य तस्य सूत्रस्य तदुपाधेर्मम सर्थः ॥ १४ ॥ त्र्यधीश्वरे त्रिगुणमायानियंतरि

परमाणुमये चित्तं भूतानां मयि रंजयन् ॥ कालसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात् ॥ १२ धारयन्मय्यहंतत्त्वे मनो वैकारिके ऽखिले ॥ सर्वेंद्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः ॥ १३ महत्यात्मनि यः सूत्रे धारयेत् मयि मानसं प्राकाम्यं पारमेष्ठ्यं मे विंदते ऽव्यक्तजन्मनः ॥ १४ विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे ॥ स ईशित्वमवाप्नोति क्षेत्रक्षेत्रज्ञचोदनां ॥ १५ नारायणे तुरीयाख्ये भगवच्छब्दशब्दिते ॥ मनो मय्यादधद्योगी मद्धर्मा वशितामियात् ॥ १६

अत एव कालविग्रहे आकलयितृरूपे अंतर्यामिणि ॥ ईशित्वं विशितादि ॥ क्षेत्रज्ञानां जीवानां तदुपाधीनां च चोदनां प्रेरणां न तु विश्वसृष्ट्यादिकर्तृत्वं लक्षणमित्यर्थः ॥ १५ ॥ तुरीयाख्ये विराट् हिरण्यगर्भ अव्याकृतकारणं चेति रूपात्रयः ॥ ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्पदं विदुरित्येवंलक्षणे ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णां भग इतींगना तच्छब्दिते भगवच्छब्दशब्दिते ॥ १६ ॥ श्रीदत्तात्रयायनमः ॥ श्रीदिगंबरायनमः ॥ श्रीरामचंद्रायनमः ॥ श्रीकृष्णाय परमात्मने नमः ॥

यत्रपरमानंदरूपेसर्वोपिकामस्तदंतराभूतोऽवसीयतेसमाप्यते॥२७॥अतःपरंगुणहेतुकाशुद्धसत्वात्मकेश्वेततांशुद्धरूपतां॥२८
आकाशात्मायःप्राणःसमषिरूपस्तद्रूपमयिमनसाघोषंनादंचिंतयन्आसोहंसोजीवःतत्रवआकाशेलब्धाज्ञातासन्तत्र
स्थाःविचित्राःवाचःश्रणोति॥यद्वा॥तत्रआकाशेउपलब्धाःअभिव्यक्ताःभूतानांवाचस्ताःदूरतःश्रणोतीति॥२९॥त्वष्टाआदि
सुःतस्मिन्परिच्छिन्नेचक्षुःसंयोज्य॥तंचचक्षुषिसंयोज्यतत्रोभयसंयोगेमांध्यायन्विश्वंदूरज्ञातःपश्यति॥२०॥मनोदेहंच

निर्गुणेब्रह्मणिमयिधारयन्विशदंमनः॥परमानंदमाप्नोतियत्रकामोवसीयते॥२७॥श्वेतद्वीपतौचित्तंशुद्धेधर्ममं
येमयि॥धारयनश्वेततांयातिषडूर्मिरहितोनरः॥२८॥मय्याकाशात्मनिप्राणेमनसाघोषमुद्वहन्॥तत्रोपलब्धाभू
तानांहंसोवाचःश्रणोत्यसौ॥२९॥चक्षुस्त्वष्टरिसंयोज्यत्वष्टारमपिचक्षुषि॥मांतत्रमनसाध्यायन्विश्वंपश्यतिसू
क्ष्मदृक्॥२०॥मनोमयिसुसंयोज्यदेहंतदनुवायुना॥मद्धारणानुभावेनतत्रात्मायत्रवैमनः॥२१॥यदाम
नउपादाययद्यद्रूपंबुभूषति॥तत्तद्भवेन्मनोरूपंमद्योगबलमाश्रयः॥२२॥श्रीदत्तात्रयायनमः॥७००

तदनुवार्त्तिनावायुनासहमयिसुसंयोज्ययामद्धारणाक्रियतेतस्याःप्रभावेनयत्रमनोयातितत्रात्मादेहोयातीत्यर्थः॥य
द्वामनःकर्त्तृआत्मानंवायुनासहदेहंचमयिसुसंयोज्ययत्रपत्नयातितदनुतत्रदेहोयातीति॥२१॥मनःउपादायउ
पादानकारणंकृत्वायद्यद्देववादिरूपंभवितुमिच्छतितत्तन्मनोरूपंमनसोऽभीष्टंरूपंयोगीनवत्॥कुतःयतोयतामं
द्योगबलंयोऽहमचिंत्यशक्तिर्नानाकारस्तस्मिन्मयिमनसायोगधारणातस्यबलंप्रभावःसएवाश्रयःकारणं॥२२॥

यत्र प्रविविक्षुस्तित्तत्रात्मानं चिंतयेत् ॥ ततः पिंडं स्वदेहं हित्वा प्राणः प्राणप्रधानलिंगशरीरोपाधिः वायुभूतः बाह्यवायोर्भूत्तः प्रविष्टस्तेन मार्गे
णेत्यर्थः ॥ षडंघ्रिवत् भृंगो यथा पुष्पात्पुष्पांतरमनायासेन प्रविशति तद्वत् ॥ २२ ॥ पिंडं हित्वेत्येतत्तत्प्रकारं कथयन्सुघटं स्पष्टमाह ॥ पा
र्ष्ण्यापार्ष्णिना गुदं निरुध्य प्राणं प्राणोपाधिमात्मानं ब्रह्मरंध्रेण मूर्ध्नछिद्रेण ॥ ब्रह्मैकरूपलक्षणं ॥ ब्रह्म वात्मन्यन्यद्वा अपेक्षितं स्थानं मन
सानीत्वा ॥ २४ ॥ मत्स्थं मन्मूर्तिरूपं शुद्धं सत्वं विचिंतयेत् ॥ न ह्यासलवत्तयः सत्वांशभूत्ता ॥ २५ ॥ यद्वा वात्मकालेपि ॥ यथा वेति पा
के यथा वान्येन केनापि प्रकारेण बुद्ध्या संकल्पयेत् ॥ तत्तथा यथा प्राप्नोतीत्यर्थः ॥ यद्वा यथा संकल्पयेत् यथा वा मत्परो मयि
परकायं विशन्सिद्ध आत्मानं तत्र भावयेत् ॥ पिंडं हित्वा विशेत्प्राणो वायुभूतः षडंघ्रिवत् ॥ २२ ॥ पार्ष्ण्यापीड्य गुदं प्राणं हृदुरः
कंठमूर्द्धसु ॥ आरोप्य ब्रह्मरंध्रेण ब्रह्मनीत्वोत्सृजेत्तनुं ॥ २४ ॥ विहरिष्यन्सुराक्रीडे मत्स्थं सत्वं विभावयेत् ॥ विमानेनोपति
ष्ठंति सत्वरवृत्तीः सुरस्त्रियः ॥ २५ ॥ यथा संकल्पयेद्बुद्ध्या यदा वा मत्परः पुमान् ॥ मयि सत्ये मनो युंजंस्तथा तत्समुपाश्
नुते ॥ २६ ॥ यो वै मद्भावमापन्न ईशितुर्वशितुः पुमान् ॥ कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम ॥ २७ ॥ मद्भक्त्या शुद्धस
त्त्वस्य योगिनो धारणाविदः ॥ तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता ॥ २८ ॥ अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः ॥
मद्योगश्रांतचित्तस्य यादसामुदकं यथा ॥ २९ ॥ मद्विभूतीरभिध्यायन् श्रीवत्सास्त्रविभूषिताः ॥ ध्वजातपत्रव्यजनैः स भवेद
विश्वास्त्रवान् भवति तथा तदनुरूपं सर्वमाप्नोतीत्यर्थः ॥ किं कुर्वन् सत्ये सत्यसंकल्पे मयि मनो युंजन् ॥ २६ ॥ मदिति पृथक्पदं ममेत्यर्थः ॥ ईशि
तुः सर्वनियंतुः वशितुः स्वतंत्रस्य मम भावं स्वभावं प्राप्तः एता गुणहेतवः ॥ २७ ॥ अतः परं क्षुद्रधारणा धारणाविद् इति त्रिकालज्ञेश्वर
धारणा सूचिता ॥ त्रैकालिकी त्रिकालवस्तुविषयी स्वजन्ममृत्युभ्यां उपबृंहिता तत्सहिता ॥ अनयैव परचित्ताद्यभिज्ञताऽपि व्याख्याता
॥ २८ ॥ अग्न्यादिसर्वोपघातशून्यो भगवानिव भूत्वा योगमयं तेन नाभिभूयेत ॥ अत्र हेतुः ॥ मद्योगेति ॥ यादसामुदकं यथा अभिघा

उपसंहरति॥उपासकस्येति॥एवं एग्धारणाभिः॥२९॥यद्वा किं नाना धारणाप्रयासेन एकयैव सर्वाः सिद्धयो भवंतीत्याह॥जितेंद्रियस्ये
ति॥मद्धारणां नारायणे तुरीयाख्ये इत्यत्रोक्तां॥या सुदुर्लभा स्यात्सा का न काचिदित्यर्थः॥३२॥यद्यप्येवं तथापि न प्रार्थ्या इत्याह॥अंतरायानिति॥३३॥तस्मात् दैहिक ऐहिकीयमेव धारणा कार्या नान्याः काम्या इत्याह॥जन्मेति॥जन्मनैव काश्चित्सिद्धयो भवंति॥यथा देवानां॥
यथा च यादसामुदकस्तंभः॥पक्ष्यादीनां खेचरत्वादि॥तदुक्तं पातंजले॥जन्मौषधितपोमंत्रयोगजाः सिद्धय इति॥योगगतिं मत्सा
लोक्यादिरूपां॥२४॥कुत इत्यत आह॥सर्वासामिति सार्द्धेन॥प्रभुत्वोपपादनं हेतुः कारणं॥पतिः पालयिता चेति॥किं च न केवं
उपासकस्य मामेवं योगधारणया मुनेः॥सिद्धयः पूर्वकथिताः उपतिष्ठंति सिद्धयः॥२९॥जितेंद्रियस्य दांतस्य जितश्वासात्म
नो मुनेः॥मद्धारणां धारयतः का सा सिद्धिः सुदुर्लभा॥३२॥अंतरायान्वदंत्येता युंजतो योगमुत्तमं॥मया संपद्यमानस्य का
लक्षपणहेतवः॥३३॥जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धयः॥योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेत्॥२४॥सर्वा
सामपि सिद्धीनां हेतुः पतिरहं प्रभुः॥अहं सांख्यस्य योगस्य धर्मस्य ब्रह्मवादिनां॥२५॥अहमात्मांतरो बाह्योऽनावृतः स
र्वदेहिनां॥यथा भूतानि भूतेषु बहिरंतः स्वयं तथा॥२६॥इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसं
वादे अष्टादशयोगसिद्धिकथनं नाम पंचदशोऽध्यायः॥१५॥छ॥श्रीरामचंद्राय नमः॥श्रीदत्तात्रयाय नमः॥छ॥
लं सिद्धीनामेव प्रभुः॥अपि तु मोक्षादीनामपीत्याह॥अहमिति॥योगो मोक्षः सांख्यं तत्साधनज्ञानं॥धर्मस्य तदुपदेष्टॄणां ब्रह्म
वादिनां च॥२५॥कुत इत्यत्राह॥सर्वदेहिनां जीवानामात्मा॥यतः आंतरः अंतर्यामी॥एष त आत्मांतर्याम्यमृत इति श्रुतेः॥तर्हि किं
मंतर्वर्तित्वात्परिच्छिन्नः न बाह्यश्च व्यापक इत्यर्थः॥तत्र हेतुः॥अनावृतः॥एतत्स दृष्टांतमाह॥भूतेषु चतुर्विधेषु महाभूतानि य
था॥बहिश्चांतश्च भवंति॥स्वयं अहमपि तथेत्यर्थः॥२६॥इति श्रीभागवते एकादशस्कंधे टीकायां पंचदशोऽध्यायः॥१५॥

षोडशेतुहरेराविर्भावकर्माविभूतयः ॥ ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः ॥१॥ अंतश्चिंतेनयन्नाममत्रात्कमकृतात्मनां ॥ अत
स्तपोगम्यतापर्यैविभूत्यादिनिरूपणं ॥२॥ एवंतावन्नवाध्यायामष्टप्रश्नानिरूपिताः ॥ ब्रह्मत्वसंभवेतावत्सप्तमादिचतुष्टये ॥३॥
बंधमुक्तस्यास्तकनिष्ठारेसहृत्तयोश्चततःपरे ॥ द्वादशेनंतरंकर्मकृतिसागव्यवस्थितौ ॥४॥ हंसेतिहासतोयोगनिष्ठायांचत्रयो
दशे ॥ श्रेयःसाधननिर्द्धारेध्यानेचैवचतुर्दशे ॥५॥ धारणासिद्धिभेदेचप्रसंगेननिरंतरे ॥ उद्धवप्रश्नतोदत्तमुत्तरंहरिणोदि
तं ॥६॥ षोडशेभूतिविस्तारेह्ययोर्वर्णाश्रमव्रते ॥ ज्ञानादिनिर्णयेचातोयमादीनांचनिर्णये ॥७॥ योगत्रयाधिकारेतुविंशेचत
दनंतरे ॥ तत्वसंख्याविवादेचपुंप्रकृत्योर्विवेचने ॥८॥ जन्मम्रकप्रकारेचद्वाविंशेदत्तमुत्तरं ॥ परापराधसहनेचतुर्भिस्त

॥ उद्धव उवाच ॥ त्वंब्रह्मपरमंसाक्षादनाद्यंतमपावृतं ॥ सर्वेषांमपिभावानांत्राणस्थित्यप्ययोद्भवः ॥१॥ श्री० म०

दनंतरे ॥९॥ सप्तविंशेक्रियायोगप्रश्नेतदुपवर्णनं ॥ अष्टाविंशेततःप्रोक्ताज्ञानयोगोपसंहृतिः ॥१०॥ संसारसंभवप्रश्ने
तन्मध्येदत्तमुत्तरं ॥ तद्दशात्तयापुनःप्रश्नेभक्तियोगोपसंहृति ॥११॥ एवंप्रश्नोत्तराण्यत्रक्रमेणैतानिविंशतिः ॥ अहमा
त्माऽंतराबाह्योऽनावृतःसर्वदेहिनां ॥ यथाभूतानिभूतेषुबहिरंतःस्वयंतथेत्युक्तं ॥ तत्रभूतानियथाकेचित्केनचि
द्गुणविशेषेणाधिक्यानिवर्तंते ॥ कचित्सामान्यरूपेणैव ॥ तथात्वमपिकंकथंवर्तसइतिविभूतीःपृष्टुंप्रथमंतावदु
क्तमेवसर्वात्मकत्वमनुवदति ॥ त्वंब्रह्मेति ॥ अनावृतंनिरावरणंस्वतंत्रंवा ॥ अतएवसर्वेषामपिमंत्राणांरक्षणंस्थि
तिजीवनं ॥ त्राणस्थितिसहितौअप्ययोद्भवौयस्मात्त्वत्तउपादानकारणमित्यर्थः ॥२॥ श्रीदत्तात्रयायनमः ॥ श्रीराम०

अत्रसदाचारंप्रमाणमाह॥याथातथ्येनयथार्थत्वेनसर्वभूतकारणंत्वांब्राह्मणाःवेदतात्पर्यविदः॥२॥एवंकारणत्वेनसर्वात्मत्व
मनूद्यविभूतीःपृच्छति॥येष्विति॥उपासीनाःसेवमानाःसंतः॥३॥दुर्ज्ञेयत्वमाह॥गूढः अस्फुटः भूतानांप्राणिनांमध्ये॥अत्र
हेतुः॥भूतानामात्माअंतर्यामी॥अत्रापिहेतुः॥हेभूतभावनेति॥त्वेवया॥४॥ताएवसाकल्येनपृच्छति॥हेमहाविभूते॥याः
काश्चिद्भूम्यादिषुतेविभूतयः॥रसायांरसातले॥अनुभाविताःत्वयैवकेनचिच्छक्तिविशेषेणसंयोजिताः॥तीर्थानांपदं

उच्चावचेषुभूतेषुदुर्ज्ञेयमकृतात्मभिः॥उपासतेत्वांभगवन्याथातथ्येनब्राह्मणाः॥२॥येषुयेषुचभावेषुभक्त्यात्वांपर
मर्षयः॥उपासीनाःप्रपद्यंतेसंसिद्धिंतद्वदस्वमे॥३॥गूढश्चरसिभूतात्माभूतानांभूतभावन॥नत्वांपश्यंतिभू
तानिपश्यंतंमोहितानिते॥४॥याःकाश्चभूमौदिविवैरसायांविभूतयोदिक्षुमहाविभूते॥तामह्यमाख्याह्यनु
भावितास्तेनमामित्तेतीर्थपदांघ्रिपद्मं॥५॥श्रीभगवानुवाच॥एवमेतदहंपृष्टःप्रश्नंप्रश्नविदांवर॥युयुत्सु
नाविनशनेसपत्नैरर्जुनेनवै॥६॥ज्ञात्वाज्ञातिवधंगर्ह्यमधर्मंराज्यहैतुकं॥ततोनिवृत्तोहंताहंहतोयमिति
लौकिकः॥७॥सतदापुरुषव्याघ्रोयुक्त्यामेप्रतिबोधितः॥अभ्यभाषतमामेवंयथात्वंरणमूर्द्धनि॥८॥९

चतरंघ्रिपद्मंच॥५॥नरावताराद्अर्जुनप्रश्नसंवादित्वात्तवायंप्रश्नः॥साधीयानितितावदनुमोदते॥एवमितित्रिभिः॥प्रश्न
दृव्यंसपत्नैर्योद्धुमिच्छता॥विनशनेकुरुक्षेत्रे॥६॥युयुत्सोर्विभूतिप्रश्नेकःप्रसंगस्तत्राह॥ज्ञात्वेति॥लौकिकःप्राकृत
मतिःसन्॥७॥सचयदाततोज्ञातिवधान्निवृत्तःतदामयाप्रतिबोधितःसन्यथात्वमभिभाषसेएवंसंग्राममुखेमाम
भ्यभाषत॥तद्देवतवापिकथयिष्यामीतिभावः॥८॥९॥

ताः विभूतीः कथयति ॥ अहमिति ॥ अस्मच्छब्दसामानाधिकरण्यात् प्रथमान्ताः द्वितीयान्ताश्च सर्वाः विभूतयः ताः स्ताश्चोपासनार्थं कथ्यन्ते ॥ षष्ठीत्व
कचिन्निर्द्धारेण संबंधे च क्वचिद्यथायोग्यं द्रष्टव्या ॥ ननु आमीषां भूतानामात्मेति सुहृदिति ईश्वर इति च सामान्येनाहमुपास्य इत्यर्थः ॥ ए
वं सर्वत्र ॥ तेषां स्थितिरुद्भवाप्ययः तद्धेतुरित्यर्थः ॥ १९ ॥ विशेषतो विभूतिराह ॥ कलयतां वशीकुर्वतां मध्ये गुणानां मध्ये साम्यं गुणिनि धर्मिणि ॥

अहमात्मोद्भवामीषां भूतानां सुहृदीश्वरः ॥ अहं सर्वाणि भूतानि तेषां स्थितिरुद्भवाप्ययः १९ अहं गतिर्गतिमतां कालः क
लयतामहं ॥ गुणानां चाप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः २० गुणिनामप्यहं सूत्रं महतां च महानहं ॥ सूक्ष्माणामप्यहं
जीवो दुर्जयानामहं मनः २१ ॥ हिरण्यगर्भो वेदानां मन्त्राणां प्रणवस्त्रिवृत् ॥ अक्षराणामकारोऽस्मि पदानि छन्दसामहं २२
इन्द्रोऽहं सर्वदेवानां वसूनामस्मि हव्यवाट् ॥ आदित्यानामहं विष्णू रुद्राणां नीललोहितः २३ ब्रह्मर्षीणां भृगुरहं राज
र्षीणामहं मनुः ॥ देवर्षीणां नारदोऽहं हविर्धान्यस्मि धेनुषु २४ ॥ सिद्धेश्वराणां कपिलः सुपर्णोऽहं पतत्रिणां ॥ प्रजापती
नां दक्षोऽहं पितृणामहमर्य्यमा २५ मां विद्ध्यसुरदैत्यानां प्रह्लादमसुरेश्वरं ॥ सोमं नक्षत्रौषधीनां धनेशं यक्षर
क्षसां २६ ऐरावतं गजेन्द्राणां यादसां वरुणं प्रभुं ॥ तपतां द्युमतां सूर्यं मनुष्याणां च भूपतिं ॥ २७ ॥ छ छ

औत्पत्तिकः स्वाभाविको गुणः सोऽहं ॥ २० ॥ सूत्रं प्रथमकार्यं ॥ महान् महत्तत्त्वं ॥ सूक्ष्मोपाधित्वात् दुर्ज्ञेयत्वाच्च जीवस्य सूक्ष्मत्वं ॥ बुद्धेर्गु
णेन चैव माराग्रमात्रो ह्यवरोऽपि दृष्ट इति श्रुतेः ॥ २१ ॥ वेदानां संबंधी तेषामध्यापकः ॥ पदानि त्रिपदा गायत्रीत्यर्थः ॥ २२ ॥ २३ ॥ हविर्धानी का
मधेनुः ॥ २४ ॥ २५ ॥ नक्षत्रौषधीनां प्रभुं सोमं ॥ यक्षरक्षसां प्रभुं ॥ यादसां प्रभुं ॥ २६ ॥ तपतां तापवतां ॥ द्युमतां दीप्तिमतां च मध्ये
॥ २७ ॥

संयमतांदंडयतामित्यर्थः॥२८॥श्टंगीणांदंष्ट्रिणांचमध्येतेषांप्रभुर्वा॥तुर्यःसन्यासःप्रथमःब्राह्मण॥२९॥स्रोतसांप्रवाहानांच॥सरसांस्थिरोदकानांयानां॥२०॥धिष्ण्यानांनिवासस्थानानां॥गहनानांदुर्गमानां॥२१॥ब्रह्मिष्ठानांवेदार्थनिष्ठानां॥सेनान्यांचमूपतीनां॥अग्रण्यांसन्मार्गप्रवर्त्तकानां॥अजःब्रह्मा॥२२॥शुचीनांशोधकानामपिमार्जनतक्षणघर्षणादीनांमध्येवाय्वादिरूपःशोधकोऽहं॥२३॥योगा

उच्चैःश्रवास्तुरंगाणांधातूनामस्मिकांचनं॥यमःसंयमतांचाहंसर्पाणामस्मिवासुकिः॥१८॥ग॥नागेंद्राणामनंतोहंमृगेंद्रःश्टंगिदंष्ट्रिणां॥आश्रमाणामहंतुर्योवर्णानांप्रथमोऽनघ॥१९॥तीर्थानांस्रोतसांगंगासमुद्रःसरसामहं॥आयुधानांधनुरहंत्रिपुरघ्नोधनुष्मतां॥२०॥धिष्ण्यानामस्म्यहंमेरुर्गहनानांहिमालयः॥वनस्पतीनामश्वत्थओषधीनामहंयवः॥२१॥पुरोधसांवसिष्ठोहंब्रह्मिष्ठानांबृहस्पतिः॥स्कंदोहंसर्वसेनान्यामग्रण्यांभगवानजः॥२२॥यज्ञानांब्रह्मयज्ञोहंव्रतानामविहिंसनं॥वाय्वग्न्यर्कांबुवाग्आत्माशुचीनामप्यहंशुचिः॥२३॥योगानामात्मसंरोधोमंत्रोहंविजिगीषतां॥आन्वीक्षिकीकौशलानांविकल्पःख्यातिवादिनां॥२४॥स्त्रीणांतुशतरूपाहंपुंसांस्वायंभुवोमनुः॥नारायणोमुनीनांचकुमारोब्रह्मचारिणां॥२५॥

गानांयोगांगानामष्टानामध्येआत्मसंरोधःसमाधिरहं॥मंत्रोनीतिः॥कौशलानांविवेकादिनैपुण्यानांमध्येआन्वीक्षिकीआत्मानात्मविवेकविद्या॥आख्यासन्यथाख्यातिश्रन्याख्यासत्यासत्ख्यातिअनिर्वचनीयख्यातिवादिनामेवमेदमेवमितिएवंचेतियोदुरंतोविकल्पःसोऽहं॥२४॥कुमारःसनत्कुमारः॥२५॥श्रीदत्तात्रयायदिगंबरायनमः॥श्रीनारायणपरमात्मनेनमः॥७७॥

सन्यासः भूताभयप्रदानं॥क्षेमाणां अभयस्थानानां मध्ये अबहिर्मतिः॥अंतर्निष्ठा॥सूनृतं प्रियवचनं मौनं च नहि प्रियभाषणे मौने च पुरुषस्या
भिप्रायो ज्ञायते॥अजः प्रजापतिः यस्य देहाद्धाभ्यां मिथुनमभूत्स एव मुख्यं मिथुनं॥अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः॥२६॥अनि
मिषां अप्रमत्तानां॥मधुमाधवौ वसंतस्यर्तुः॥अभिजिदुत्तराषाढाचतुर्थः पादः॥तथा च श्रुतिः॥अभिजिन्नाम नक्षत्रमुपरिष्टादषा
ढानामवस्ताच्छ्रोणायाइत्यादि॥२७॥कृतं कृतयुगं॥देवलः असितश्च व्यासानां वेदविभागकर्तॄणां॥कवीनां विदुषां काव्यः शुक्रः
भगवतां॥उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिं॥वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति सेवं लक्षणानां॥२९॥सुपेन्द्रास्सां सुद
धर्माणामस्मि सन्यासः क्षेमाणामबहिर्मतिः॥गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहं॥२६॥संवत्सरो स्म्यनिमिषामृतूनां
मधुमाधवौ॥मासानां मार्गशीर्षोहं नक्षत्राणां तथा ऽभिजित्॥२७॥अहं युगानां च कृतं धीराणां देवलो ऽसितः॥द्वैपाय
नोस्मि व्यासानां कवीनां काव्य आत्मवान्॥२८॥वासुदेवो भगवतां त्वं तु भागवतेष्वहं॥किंपुरुषाणां हनुमान्विद्या
ध्राणां सुदर्शनः॥२९॥रत्नानां पद्मरागोस्मि पद्मकोशः सुपेशसां॥कुशोस्मि दर्भजातीनां गव्यमाज्यं हविष्ष्वहं॥३०॥
व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः॥तितिक्षास्मि तितिक्षूणां सत्त्वं सत्त्ववतामहं॥३१॥ओजः सहो बल
वतां कर्माहं विद्धि सात्वतां॥सात्वतां नवमूर्तीनामादिमूर्तिरहं परा॥३२॥विश्वावसुः पूर्वचित्तिर्गंधर्वाप्सरसामहं॥भूध
राणां॥दर्भजातीनां काशादर्भादीनां हविःषु चरुपुरोडाशादिषु घृतेषु वा॥३०॥लक्ष्मीः धनादिसंपत्॥३१॥बलवतां मोजस्सहस्व॥
सात्वतां भगवतां भक्त्या कृतं कर्माहमिसर्थः॥तेषामेव नवव्यूहार्चने वासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववरा
हनारसिंहब्रह्माणइतियाः नवमूर्तयस्तासां मध्ये वासुदेवाख्या॥३२॥गंधर्वाणां विश्वावसुः अप्सरसां पूर्वचित्तिः॥गंधमादनम
विकृतं॥३३॥

मेधुरेःपेरमेः॥ परःपराख्यः॥२४॥ अर्जुनःपार्थः॥ भूतानां प्राणिनां प्रतिसंक्रमः प्रलयः॥२५॥ गद्याद्यैःपंचकर्मेंद्रियव्यापाराःस्पर्शा
द्योज्ञानेंद्रियव्यापाराः॥ तत्रलक्षणदर्शनं॥ सर्वेंद्रियाणामिंद्रियतत्तदर्थग्रहणशक्तिरप्यहं॥२६॥ तदेवंतत्रतत्रनिर्धारणेनतत्तत्
बंधेनचविशेषतोविभूतिर्निरूप्येदानीं सामान्यतःसर्वाण्यपिनिरूपयति॥ पृथिवीतिसार्द्धद्वयेन॥ पृथिव्यादिशब्दैस्तन्मात्राणि
विवक्षितानि॥ अहंअहंकारःमहान्महत्तत्वं॥ एताःसप्तप्रकृतिविकृतयःविकाराःपंचमहाभूतानिएकादशेंद्रियाणिचेत्येवं
षोडशसंख्याकः॥ पुरुषोजीवः॥ अव्यक्तंप्रकृतिःएवंपंचविंशतितत्वानि॥ तदुक्तं॥ मूलप्रकृतिरविकृतिर्महदाद्याःप्रक

॥ अपांरसश्चपरमस्तेजिष्ठानांविभावसुः॥ प्रभासूर्येंदुताराणांशब्दोहंनभसःपरः॥२४॥ ब्रह्मण्यानांबलिरहंवीरा
णामहमर्जुनः॥ भूतानांस्थितिरुत्पत्तिरहंवैप्रतिसंक्रमः॥२५॥ गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं॥ आस्वादः
श्रुतंस्पर्शंघ्राणमहंसर्वेंद्रियेंद्रियं॥२६॥ पृथिवीवायुराकाशआपोज्योतिरहंमहान्॥ विकारःपुरुषोऽव्यक्तंरजःसत्व
तमःपरं॥२७॥ अहमेवप्रसंख्यानंज्ञानंतत्वविनिश्चयः॥२८॥ मयेश्वरेणजीवेनगुणेनगुणिनाविना॥ सर्वात्मना
पिसर्वेणनभावोविद्यतेक्वचित्॥२९॥

तिविकृतिविकृतयःसप्तषोडशकश्चविकारोनप्रकृतिर्नविकृतिःपुरुषइति॥ किंचरजःसत्वतमइतिप्रकृतेर्गुणाश्च॥ परंब्रह्म
चतदेतत्सर्वमहमेव॥ किंच॥ एतत्प्रसंख्यानंएतेषांपरिगणनं॥ एतेषांलक्षणतोज्ञानंचतत्फलंतत्वविनिश्चयःअहमेव॥२८॥
एतदेवसंक्षिप्याह॥ जीवेश्वररूपोपाधिविभागोयोभावःयश्चगुणगुणिरूपःयश्चक्षेत्रक्षेत्रज्ञरूपःससर्वोपिमयाविनामद्व्यति
रेकेणनास्तिअहमेवसर्वमित्यर्थः॥२९॥ श्रीदत्तात्रयायनमः॥ श्रीगुरुचरणारविंदाभ्यांनमः॥ श्रीकृष्णायपरमात्मनेनम

ननु सामान्यतः किमेवं संक्षिप्य कथयति। पूर्ववन्निर्धारणसंबंधाभ्यां विशेषतः सर्वाः कथय इति चेत्तत्राह। संख्यानं पृथिव्यादिपरमाणू-
नां कालेन महता तत्स्यपि मयैव क्रियते रूत्वा व कुतः उच्यते। तथा मे विभूतीनां संख्यानं कर्तुं न शक्यते। कुत इत्यत आह। सृजतोऽण्डानि-
ति। यदा मया सृज्यमानानां ब्रह्माण्डानामेव तावत्संख्या नास्ति तदा कुतस्तत्स्थानां विभूतीनां संख्येत्यर्थः॥ ३९॥ तथापि विशेषत एव
सर्वास्वपि संक्षेपतः कथयामीति आह। तेजः प्रभावः श्रीः संपत्सौभगं मनोनयनाह्लादकत्वं। भगः भाग्यं। वीर्यं बलं। अन्यत्राकः

संख्यानं परमाणूनां कालेन क्रियते मया॥ न तथा मे विभूतीनां सृजतोऽण्डानि कोटिशः॥ ३९॥ तेजः श्रीः कीर्तिरैश्व-
र्यं ह्रीः सागः सौभगं भगः॥ वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽशकः॥ ४०॥ एतास्ते कीर्तिताः सर्वाः संक्षेपे-
ण विभूतयः॥ मनोविकारा एवैते यथा वाचाभिधीयते॥ ४१॥ वाचं यच्छ मनो यच्छ प्राणं यच्छेन्द्रियाणि च॥ आ-
त्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने॥ ४२॥ यो वै वाङ्मनसी सम्यगसंयच्छन्धिया यतिः॥ तस्य व्रतं तपो दा-
नं स्रवत्यामघटांबुवत्॥ ४३॥ तस्माद्वचो मनः प्राणान्नियच्छेन्मत्परायण॥ मद्भक्तियुक्तया बुद्ध्या ततः परिस-
माप्यते॥ ४४॥ इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे विभूतिकथनं नाम षोडशोऽध्यायः॥ १६॥

विभूति॥ ४०॥ उपसंहरति। एते च विभूतिभेदा मयि चिन्तावतारायकल्पिताः अतो नात्रातीवाभिनिवेशः कार्य इत्याह।
मनोविकारा एव न तु परमार्थ। यथा किंचित्खपुष्पादि वाङ्मात्रेणाभिधीयते तत्तुल्याः॥ ४१॥ तस्मादागादीन्नयच्छ। आत्मानं बु-
द्धिमात्मना सत्वसंपन्नया यात्तयैव नियच्छ। अध्वने संसारमार्गाय॥ ४२॥ असंयमने दोषमाह। यो वै वाङ्मनसी इति। असंय-
च्छन्नसंयच्छति॥ ४३॥ परिसमाप्यते॥ कृतकृत्यो भवतीत्यर्थः॥ ४४॥ इति एकादशे भावार्थदीपिकायां षोडशोऽध्यायः॥ १६॥

ततः स प्रष्टुरोपदेशे स्वधर्मे भक्तिलक्षणे ॥ हंसोक्तं धर्मं मन्वानो ब्रह्मचारिगृहस्थयोः ॥१॥ कर्माहं विद्विषाललतामियत्र भक्त्याकृतं कर्म मोक्षसा
धनं मद्भिन्नेति रिक्तत्वं ॥ भक्तिसाधनत्वं कर्मणां मयोदितेष्ववहितः स्वधर्मो विप्रादीनां तत्र तत्रोक्तं ॥ नच कर्मानुष्ठातृणां नियमेन भ
क्तिरुच्यते ॥ अतः पृच्छति ॥ यस्त्वयेति त्रिभिः ॥ पूर्वं कस्मादौ त्वद्भक्तिलक्षणः ॥ त्वज्ज्ञापकः तत्साधनमित्यर्थः ॥ वर्णाश्रमहीनानाम
पि द्विपदां नराणां ॥२॥ यथा येन प्रकारेण ॥ अनुष्ठीयमानेन स्वधर्मेण ॥३॥ ननु संप्रदायादेव ज्ञास्यते किं पुनर्वर्णनेन तत्राह ॥

॥उद्धव उवाच ॥ यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः ॥ वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि ॥१॥ यथानुष्ठी
यमानेन त्वयि भक्तिर्नृणां भवेत् ॥ स्वधर्मेणारविंदाक्ष तत्समाख्यातुमर्हसि ॥२॥ पुरा किल महाबाहो धर्मं परमकं
प्रभो ॥ यत्तेन हंसरूपेण ब्रह्मणेऽभ्यात्थ माधव ॥३॥ स इदानीं सुमहता कालेनाऽमित्रकर्शन ॥ न प्रायो भविता मर्त्य
लोके प्रागनुशासितः ॥४॥ वक्ता कर्त्ताऽविता नान्यो धर्मस्याच्युत ते भुवि ॥ सभायामपि वैरिंच्यां यत्र मूर्त्तिधराः
कलाः ॥५॥ कर्त्राऽवित्रा प्रवक्त्रा च भवता मधुसूदन ॥ त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्यति ॥६॥ तत्त्वं नः सर्वध
र्मज्ञ धर्मस्त्वद्भक्तिलक्षणः ॥ यथा यस्य विधीयेत तथा वर्णय मे प्रभो ॥७॥ श्रीशुक उवाच ॥ एवं स्वभृत्यमुख्येन पृ
ष्टः स भगवान् हरिः ॥ प्रीतः क्षेमाय मर्त्यानां धर्मानाह सनातनान् ॥८॥ श्रीभगवानुवाच ॥ धर्म्य एष तव प्रश्नो नैःश्रे

पुरेति ॥ परमकं परमश्वासौ कं सुखरूपश्चेति ॥ यत् यं हंसरूपेण धर्मोऽप्युक्त एव ॥ न तु योगमात्रं ज्ञानीमागतं यस्त्वं युष्म
द्धर्मविवक्षये स्फुक्तत्वात् ॥३॥ प्रागनुशासितोपि न भविता न भविष्यति ॥४॥ अत्र हेतुमाह ॥ वक्तेति ॥ द्वाभ्यां ॥ त्वत्तोऽन्यः
कलाः वेदाद्याः ॥५॥६॥ तत्तस्मात् नः अस्माकं मनुष्याणां मध्ये यस्य यथा विधीयते ॥७॥८॥ धर्म्यः धर्मादनपेतः कुतः नैःश्रे
यसकरः भक्तिजनकः ॥ अतः मम तः त्वं धर्मान्निबोध ॥९॥

तत्रादौ मदुपासनालक्षण एव मुख्यो धर्म आसीत्॥ आचारलक्षणस्तु पश्चात्प्रवृत्तः स चैवमनुष्ठितो भक्तिहेतुरिति वर्णयितुमाह॥ आदाविति॥ कस्मादौ यत्कृतयुगं तस्मिन्॥ ते च तदा मामुपासत एव केवलं॥ नान्यत्कुर्वंतीति वक्तुं कृतयुगनामनिरुक्तिमाह॥ कृतकृत्या इति॥ जन्मन एव॥ १०॥ किंच विधायकाभावादपि तदानीं नान्यत्कर्मास्तीत्याह॥ धर्मश्च मनो विषयो ऽहमेव वृषरूपः कृचतुष्पात्॥ नक्रियाविषयो यज्ञादिः॥ अतस्तपोनिष्ठाः॥ मनसश्चेंद्रियाणां च स्वैकाग्र्यं परमं तप इति वचनादैकाग्रतपो हंसं शुद्धं मां ध्यायंतीत्यर्थः॥ ११॥ पश्चात्त्रेतायुगप्रवेशे मे वैराजरूपस्य प्राणान्निमित्तात्॥ हृदयात्सकाशात् तस्याः त्रय्याः सकाशात्॥ हौत्रा

आदौ कृतयुगे वर्णो नृणां हंस इति स्मृतः॥ कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः॥ १०॥ वेदः प्रणव एवाग्रे धर्मो ऽहं वृष

रूपधृक्॥ उपासते तपोनिष्ठा हंसं मां मुक्तकिल्बिषाः॥ ११॥ त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्रयी॥ विद्या प्रादुरभूत्त

स्या अहमासं त्रिवृन्मखः॥ १२॥ विप्रक्षत्रियविट्शूद्रा मुखबाहूरुपादजाः॥ वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः॥ १३॥

गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम॥ वक्षःस्थलाद्वनेवासो न्यासः शीर्षणि संस्थितः॥ १४॥ वर्णानामाश्रमाणां च जन्मभू

म्यनुसारिणीः॥ आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमैः॥ १५॥ शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवं॥ मद्भक्तिश्च

दया सत्यं ब्रह्मप्रकृतयस्त्विमाः॥ १६॥ तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः॥ स्थैर्यं ब्रह्मण्यतैश्वर्यं क्षत्रप्रकृतयस्त्विमाः॥ १७

धर्यवां हौत्रैः त्रिवृत् त्रिरूपः॥ यज्ञो वै विष्णुरिति श्रुतेः॥ १२॥ वर्णानामाश्रमाणां च धर्मान्वक्तुं तेषामुत्पत्तिमाह॥ विप्रेति द्वाभ्यां॥ आत्माचारः स्वधर्म एव लक्षणं ज्ञापको येषां ते॥ १३॥ मम वैराजरूपस्य हृदः वक्षसो ऽधस्तात्॥ ब्रह्मचर्यमिति नैष्ठिकाभिप्रायं॥ १४॥ एतेषामधिकारिविशेषणस्वभावानाह॥ वर्णानामिति पंचभिः॥ जन्मस्थानानुसारिण्यः नीचैरिस्वयं॥ अतोयमर्थः॥ मंदाभिर्जन्मभूमिभिर्मंदा॥ उत्तमाभिरुत्तमाश्चेति॥ १५॥ तपः आलोचनं॥ १६॥ तेजः प्रतापः॥ एते राश्रमस्वभावा अपि ज्ञेयाः॥ १७॥

आस्तिक्यमिति॥१८॥१९॥ तदुत्पन्नानां स्वभावानाह॥ अशौचमिति॥ शुष्कविग्रहः निर्मूलकलहः॥ तर्षस्तृष्णा॥२०॥ तत्र तावत्सर्वसाधारणं
धर्ममाह॥ अहिंसेति॥ सार्ववर्णिक इति वर्णग्रहणमुपलक्षणार्थं॥२१॥ वर्णधर्मान्गृहस्थप्रकरणे वक्ष्यति॥ प्रथमं तावदाश्रमेषु ब्रह्मचा
रिणो धर्मा वर्ण्यंते॥ स च द्विविधः॥ उपकुर्वाणो नैष्ठिकश्च॥ तत्राद्यस्य धर्मानाह॥ द्वितीयमिति सार्धैर्नवभिः॥ द्विजः त्रैवर्णिकः॥ आ
नुपूर्व्यात् गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपनयनाख्यं जन्म प्राप्य॥ आचार्येणाहूतो ब्रह्म वेदमधीयीत॥ चकारात्तदर्थं च वि

आस्तिक्यं दाननिष्ठा च अदंभो ब्रह्मसेवनं॥ अतुष्टिरर्थोपचये वैश्यप्रकृतयस्त्विमाः॥१८॥ शुश्रूषणं द्विजगवां देवानां चाप्य
मायया॥ तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः॥१९॥ अशौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः॥ कामः क्रोधश्च तर्ष
श्च स्वभावोंतेवसायिनां॥२०॥ अहिंसा सत्यमस्तेयमकाममक्रोधलोभता॥ भूतप्रियहितेहा च धर्मोयं सार्ववर्णिकः॥२१॥
द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः॥ वसन्गुरुकुले दांतो ब्रह्माधीयीत चाहुतः॥२२॥ मेखलाजिनदंडाक्षब्रह्मसूत्र
कमंडलून्॥ जटिलो धौतदद्वासोऽरक्तपीठः सकुशान्दधत्॥२३॥ स्नानभोजनहोमेषु जपोच्चारे च वाग्यतः॥ नछिंद्यान्नख
रोमाणि कक्षोपस्थगतान्यपि॥२४॥ रेतो नावकिरेज्जातु ब्रह्मव्रतधरः स्वयं॥ अवकीर्णो वगाह्याप्सु यतासुस्त्रिपदीं जपेत्॥२५॥

चारयेत्॥२२॥ किंच मेखलादीन्कुशांश्च दधत्॥ तत्राक्षशब्देनाक्षमाला॥ कथंभूतः जटिलः अनभ्यंगादिना जातजटः॥ तथा धौतद
द्वासोऽरक्तपीठः दंताश्च वासश्च दद्वासांसि न धौतानि तानि यस्य सः॥ अधौतदद्वासाः स चासावरक्तपीठश्च॥ न कौतुकादिना रक्तं पी
ठमासनं यस्य सः॥२३॥ जपश्च उच्चारो मूत्रपुरीषोत्सर्गश्च जपोच्चारं तस्मिन्वाग्यतः मौनी भवेत्॥२४॥ रेतो बुद्धिपूर्वं नावकिरेत्
नोत्सृजेत्॥ ब्रह्मव्रतधरः अगृहस्थः स्वयमेव कथंचिदवकीर्णः अवगाह्य स्नात्वा यतासुः कृतप्राणायामः त्रिपदीं गायत्रीं जपेत्॥२५॥

संध्येचयतवाक्जपन्नुपासीत॥मध्यान्हेसंध्यानिमित्तंमौनंनास्तीतिद्विवचनं॥२६॥२७॥अन्यदपियत्सप्राप्तंतत्तन्निवेदयेत्॥तेनैवानुज्ञातं
तुसंयतःसन्नुपभुंजीतेत्यर्थः॥२८॥यानशय्यासनस्थानेःयानंपृष्ठतोयानेनानिहितमप्रमत्ततयासमीपशयनेनविश्रांतपादसंवाहना
दिभिःसमीपासनेनासीनं॥कृतांजलिः॥नियोगप्रतीक्षयानातिदूरेऽवस्थानेनेत्यर्थः॥२९॥एवंभूतंव्रतंयस्यसः॥३०॥एवमुपकुर्वा

अग्न्यर्काचार्यगोविप्रान्गुरून्वृद्धसुरान्शुचिः॥समाहितउपासीतसंध्येचयतवाग्जपेत्॥२६॥ आचार्यं(चा)मांविजानीयान्नाव
मन्येतकर्हिचित्॥नमर्त्यबुद्ध्यासूयेतसर्वदेवमयोगुरुः॥२७॥सायंप्रातरुपानीयभैक्ष्यंतस्मैनिवेदयेत्॥यच्चान्यद
प्यनुज्ञातमुपयुंजीतसंयतः॥२८॥शुश्रूषमाणआचार्यंसदोपासीतनीचवत्॥यानशय्यासनस्थानैर्नातिदूरेकृतां
जलिः॥२९॥एवंवृत्तोगुरुकुलेवसेद्भोगविवर्जितः॥विद्यासमाप्यतेयावत्बिभ्रद्व्रतमखंडितः॥३०॥यद्यसौछंदसां
लोकमारोक्ष्यन्ब्रह्मविष्टपं॥गुरवेविन्यसेद्देहंस्वाध्यायार्थंबृहद्व्रतः॥३१॥अग्नौगुरावात्मनिचसर्वभूतेषुमां
परं॥अपृथग्धीरुपासीतब्रह्मवर्चस्व्यकल्मषः॥३२॥स्त्रीणांनिरीक्षणंस्पर्शसंलापक्ष्वेडनादिकं॥प्राणिनोमिथुनीभूता
नऽगृहस्थोऽग्रतस्त्यजेत्॥३३॥७

णस्यधर्मानुक्त्वानैष्ठिकस्यविशेषधर्मानाह॥यद्यतीतिषड्भिः॥असौब्रह्मचारीयदिछंदसांलोकंमहर्लोकं॥ततोब्रह्मलोकंचारोक्ष्य
न्आरोढुमिच्छतीत्यर्थः॥यद्वाछंदसांलोकमितिब्रह्मलोकविशेषणं॥यत्रमूर्त्तिधराःकलाउत्पन्नत्वात्॥तर्हिबृहद्व्रतःसन्नैष्ठि
कव्रतंयस्यसः॥विन्यसेत्समर्पयेत्॥अधिकस्वाध्यायार्थंअधीतनिष्क्रियार्थंवा॥३१॥ब्रह्मवर्चःवेदाभ्यासजंतेजःतद्वान्॥३२॥त
स्यैववनस्थयतिसाधारणधर्मानाह॥स्त्रीणामिति॥निरीक्षणंभावगर्भं॥क्ष्वेलनपरिहासः॥एवमादिकंसजेत्॥मिथुनभूतानग्रतस्स

॥भा॰ए॰॥

॥६४॥

तस्यैवसर्वाश्रमसाधारणंधर्ममाह॥ शौचमितिद्वाभ्यां॥ ३४॥ ३५॥ निष्कामनैष्ठिकस्यतुमोक्षफलमाह॥ एवमिति॥ अमलः निष्काम
श्चेत्॥ दग्धःकर्मत्रयोंतःकरणंयस्यतथाभूतःसन्भक्तोभवति॥ ३६॥ उपकुर्वाणस्यसमावर्तनप्रकारमाह॥ अथेति॥ अनंतरं
द्वितीयाश्रमंआविवक्षन्प्रवेष्टुमिछन्यथाययथावत्विचारितवेदार्थःस्नायात्॥ अभ्यंगादिकंकृत्वासमावर्ततेसर्थः॥ ३७॥ तस्या
धिकारानुरूपमाश्रमविकल्पसमुच्चयावाह॥ गृहमिति॥ सकामश्चेद्गृहं॥ अंतःकरणशुद्ध्यादिकामश्चेद्वनंविशेत्॥ शुद्धांतःक

शौचमाचमनंस्नानंसंध्योपासनमार्जवं॥ तीर्थसेवाजपोऽस्पृश्याभक्ष्यासंभाष्यमावर्जनं॥ ३४॥ सर्वाश्रमप्रयुक्तोयंनियमः
कुलनंदन॥ मद्भावःसर्वभूतेषुमनोवाक्कायसंयमः॥ ३५॥ एवंबृहद्व्रतधरोब्राह्मणोऽग्निरिवज्वलन्॥ मद्भक्तस्तीव्रतपसा
दग्धकर्माशयोऽमलः॥ ३६॥ अथानंतरमावेक्ष्यन्यथाजिज्ञासितागमः॥ गुरवेदक्षिणांदत्वास्नायाद्गुर्वनुमोदितः॥ ३७॥
गृहंवनंवोपविशेत्प्रव्रजेद्वाद्विजोत्तमः॥ आश्रमादाश्रमंगछेन्नान्यथामत्परस्त्यजेत्॥ ३८॥ गृहार्थीसदृशींभार्यामुद्वहे
दजुगुप्सितां॥ यवीयसींतुवयसायांसवर्णामनुक्रमात्॥ ३९॥

रणःसचद्विजोत्तमःब्राह्मणश्चेत्प्रव्रजेदित्यर्थः॥ यद्वा॥ आश्रमादाश्रमांतरंगछेत्॥ अन्यथाअनाश्रमीप्रतिलोमंचनाचरे
दित्यर्थः॥ अमत्परइतिबाधेदःस्वभक्तस्याश्रमनियमाभावस्यवक्ष्यमाणत्वात्॥ ३८॥ विवाहनियमपूर्वकंवर्णधर्मैःसह
गृहस्थधर्मानाह॥ गृहार्थीति॥ सदृशींसवर्णां॥ अजुगुप्सितांकुलशीललक्षणतश्चानिंदितां॥ कामतस्तुयामन्यामुद्वहेत्॥
तांनसवर्णामनुतस्याअनंतरंतत्रापिवर्णक्रमेणोद्वहेदित्यर्थः॥ तिस्रोवर्णानुपूर्व्येणद्वेतथैकायथाक्रमं॥ ब्राह्मणक्षत्रियविशां
भार्याःस्वशूद्रजन्मनइतिस्मृतेः॥ ३९॥ ७

॥यम॰॥

॥६४॥

ऽसाधारण्यस्त्रैवर्णिकानामावश्यकधर्माः॥ प्रतिग्रहादिस्त्रयं तु वृत्तिः सा च ब्राह्मणस्यैवेति॥४०॥ तत्रापि मुख्यां मुख्यतमां चान्यां वृत्तिमाह॥ प्रतिग्रहमिति॥ तयोर्याजनाध्यापनयोरपि कार्पण्यादिदोषं पश्यन्॥ शिलैः स्वामिपरित्यक्तैः क्षेत्रपतितैः कणिशैः॥४१॥ एवं च वृत्तिकार्श्यं ब्राह्मणेन सोढव्यं इत्याह॥ ब्राह्मणस्येति॥४२॥ उंछवृत्तिर्नाम विपणादि पतितकणोपादानं तां शिलवृत्त्यैकीकृत्य तया तुष्टचित्तस्य मोक्षफ

इज्याध्ययनदानानि सर्वेषां च द्विजन्मनां॥ प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनं॥४०॥ प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदं॥ अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक् ततः॥४१॥ ब्राह्मणस्य हि देहोयं क्षुद्रकामाय नेष्यते॥ कृच्छ्राय तपसे चेह प्रेत्यानंतसुखाय च॥४२॥ शिलोंछवृत्त्या परितुष्टचित्तो धर्मं महांतं विरजं जुषाणः॥ मय्यर्पितात्मा गृह एव तिष्ठन्नातिप्रसक्तः समुपैति शांतिं॥४३॥ समुद्धरंति ये विप्रं सीदंतं मत्परायणं॥ तानुद्धरिष्ये नचिरादापद्भ्यो नौरिवार्णवात्॥४४॥ सर्वाः समुद्धरेद्राजा पितेव व्यसनात्प्रजाः॥ आत्मानमात्मना धीरो यथा गजपतिर्गजान्॥४५॥ एवंविधो नरपतिर्विमानेनार्कवर्चसा॥ विधूयेहाशुभं कृत्स्नमिंद्रेण सह मोदते॥४६॥ सीदन्विप्रो वणिग्वृत्त्या पण्यैरेवापदं तरेत्॥ खड्गेन वापदाक्रांतो न श्ववृत्त्या कथंचन॥४७॥४

लमाह॥ शिलोंछेति॥ महांतं आतिथ्यादिलक्षणं॥४३॥ एवमधनस्य महत्फलमुक्त्वा सधनानामप्याह त्रिभिः॥ समुद्धरंतीति दारिद्र्या दुत्तारयंति॥ विप्रमिक्षपलक्षणं॥ मत्परायणं एकमपि॥४४॥ राज्ञस्त्वावश्यकमेतदित्याह॥ सर्वा इति॥४५॥४६॥ सर्वेषामापद्वृत्तीराह॥ सीदन्निति त्रिभिः॥ पण्यैर्विक्रियार्हैः॥ न तु सुरालवणाद्यैः॥ तत्राप्यापदाक्रांतश्चेत्खड्गेन क्षत्रियवृत्त्या वा॥ गौतमोनेत्तरां पापीयसीं वृत्तिमातिष्ठेत् इति स्मरन्खड्गधारणं पण्यविक्रियाद्युत्तमं मन्यते तथापि हिंसातो वणिग्वृत्तिरेव श्रेष्ठेति भगवतोम

तत्राप्यापरस्मिन् गया॥ विप्ररूपेणवा॥ अध्यायनादिना॥४८॥ कारवः प्रतिलोमजविशेषाः बुरुडादयः॥ तेषांवृत्तिकटादिक्रियां॥ आ
पदुत्तीर्णस्तु नानुकूल्येनवर्त्तेतेत्याह॥ क्षुधार्त्तादिति॥४९॥ तदेवंवृत्तिव्यवस्थामुक्त्वापुनर्गृहस्थस्यावश्यकार्यंचयज्ञानाह॥ वेदाध्य
यनंब्रह्मयज्ञः तेनऋषीन्॥ स्वधाकारेणपितॄन्॥ स्वाहाकारेणदेवान्॥ बलिहरणेनभूतानि॥ अन्नाद्यैरन्नोदकादिभिर्मनुष्या
निति ज्ञातव्यं॥ यथोदयंविभवानुसारतः॥ तेषांश्वदर्षिविधत्ते॥ मद्रूपाणीति॥५०॥ आवश्यकंधर्ममुक्त्वाशास्त्यनसारधर्ममा

वैश्यवृत्त्यातुराजन्योजीवेन्मृगययापदि॥ चरेद्वाविप्ररूपेणनत्वेवसाकथंचन॥४८॥ शूद्रवृत्तिंभजेद्वैश्यः शूद्रः कारु
कटक्रियां॥ क्षुधार्त्तान्मुक्तोनगर्ह्येणवृत्तिंलिप्सेतकर्मणा॥४९॥ वेदाध्यायः स्वधास्वाहाबल्यन्नाद्यैर्यथोदयं॥ देवर्षिपि
तृभूतानिमद्रूपाण्यन्वहंयजेत्॥५०॥ यदृच्छयोपपन्नेनशुक्लेनोपार्जितेनवा॥ धनेनापीडयन्भृत्यान्न्यायेनैवाहरे
त्क्रतून्॥५१॥ कुटुंबेषुनसज्जेतनप्रमाद्येत्कुटुंब्यपि॥ विपश्चिन्नश्वरंपश्येददृष्टमपिदृष्टवत्॥५२॥ पुत्रदाराप्तबं
धूनांसंगमःपांथसंगमः॥ अनुदेहंवियंत्येतेस्वप्नोनिद्रागमोयथा॥५३॥ इत्थंपरिमृशन्मुक्तोगृहेष्वतिथिवद्वसन्॥
नगृहैरनुबध्येतनिर्ममोनिरहंकृतः॥५४॥७॥

ह॥ यदृच्छयाउद्यमंविनाउपार्जितेनवा॥ शुक्लेनस्ववृत्त्यालब्धेनशुद्धेनधनेनवाभृत्यान्पोष्यान्॥५१॥ गृहस्थस्यापिनिवृत्तिनिष्ठा
मेवाह॥ कुटुंबेष्विति॥ त्रिभिः॥ नप्रमाद्येतईश्वरनिष्ठायांप्रमत्तोनभवेत्॥ ननुदृष्टादृष्टार्थकर्मासक्तस्यकथमप्रमादः विचार
णेत्याह॥ विपश्चिदिति॥५२॥ तत्रापिदृष्टेष्वासक्तेरधिकत्वात्तेषांनश्वरतांप्रपंचयति॥ पुत्रादीनामेकत्रसंगमःपांथानांप्रप
यासंगइव॥ तत्रहेतुः॥ अनुदेहंप्रतिदेहमेतेवियंतिनश्यंति॥ निद्रानुवर्तीस्वप्नोनिद्रापायेयथेति॥५३॥ अतिथिवत्उदासीनः॥५४॥

अस्याप्याश्रमविकल्पमाह॥ कर्मभिरिति॥ गृहाश्रम एव तिष्ठन्॥ यदि प्रजावान् तर्हि प्रव्रजेद्वा॥ ५५॥ गृहाद्यासंगे दोषमाह॥ यस्त्विति त्रिभिः॥ ५६॥ बंधमेवाभिनयेन दर्शयति॥ अहो इति॥ बालाः आत्मजायस्याः सा॥ आत्मजाश्च मां विना अनाथाः संतः कथं जीविष्यंतीति॥ ५७॥ गृहे यत् आशयो वासना तेन आ सर्वतः क्षिप्तं हृदयं यस्य सः॥ अंधं तमः अतितामसीर्योनीं॥ ५८॥ इत्येका

कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान्॥ तिष्ठेद्वनं चोपविशेत्प्रजावान्वा परिव्रजेत्॥ ५५॥ यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः॥ स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते॥ ५६॥ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः॥ अनाथा मामृते दीनाः कथं जीवंति दुःखिताः॥ ५७॥ एवं गृहाशयाक्षिप्तहृदयो मूढधीरयं॥ अतृप्तस्ताननुध्यायन्मृतोऽन्धं विशते तमः॥ ५८॥ ७॥ इति श्रीभागवते महापुराणे एकादशस्कंधे सप्तदशोऽध्यायः॥ १७॥ श्रीभगवानुवाच॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा॥ वन एव वसेच्छांतस्तृतीयं भागमायुषः॥ १॥ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत्॥ वसीत वल्कलं वासस्तृणपर्णाजिनानि च॥ २॥ श्रीदत्तात्रयाय नमः॥

दशोसप्तदशा॥ १७॥ अष्टादशे वदत्कर्म वनस्थयतिगोचरं॥ अधिकारविशेषेण विशेषं चापि तत्कृतं॥ १॥ क्रमप्राप्तान् वनस्थधर्मानाह॥ वनमिति॥ आयुषस्तृतीयं भागं पंचसप्ततिवर्षपर्यंतं ततः पुरः क्षीणेंद्रियस्य षष्ठिरागे पि सन्न्यासाधिकारः स्यादिति भावः॥ १॥ वसीत परिदधीत॥ २॥ श्रीरामचंद्राय नमः॥ श्रीदत्तात्रयाय नमः॥ श्रीराम राम॰

दतः दंतान्न धावेन शोधयेत् ॥ त्रिकालमप्सु मज्जेत् ॥ मुशलवत् स्नायात् ॥ स्थंडिले शायः भूमिशायी ॥ ३ ॥ तप्येत पंचाग्नीन् सूर्ये
णसह चतुर्दिशाम् अग्नीन्निधायात्मानं तापयेदित्यर्थः ॥ आसारं धारासंपातं सहत इति तथा अभावकाशं नाम व्रतं चरेत् ॥ जलेआ
कंठमग्नः उदकवासं नाम व्रतं चरेत् ॥ ४ ॥ उलूखलेन वा अश्मना वा कुट्टयति कंडयतीति तथा ॥ दंता एवोलूखलं यस्य स तथा ॥ ५ ॥

केशरोमनखश्मश्रुमलानि बिभृयाद्दतः ॥ न धावेदप्सु मज्जेत त्रिकालं स्थंडिलेशयः ॥ ३ ॥ ग्रीष्मे तप्येत पंचाग्नीन् च
र्षास्वासारषाड् जले ॥ आकंठमग्नः शिशिर एवं वृत्तस्तपश्चरेत् ॥ ४ ॥ अग्निपक्वं समश्नीयात् कालपक्वमथापि वा ॥
उलूखलाश्मकुट्टो वा दंतोलूखल एव वा ॥ ५ ॥ स्वयं संचिनुयात्सर्वमात्मनो वृत्तिकारणं ॥ देशकालबलाभि
ज्ञो नाददीतान्यदाहृतं ॥ ६ ॥ वन्यैश्चरुपुरोडाशैर्निर्वपेत्कालचोदितान् ॥ न तु श्रौतेन पशुना मां यजेत वनाश्र
मी ॥ ७ ॥ अग्निहोत्रं च दर्शश्च पूर्णमासश्च पूर्ववत् ॥ चातुर्मास्यानि च मुनेराम्नातानि च नैगमैः ॥ ८ ॥ एवं ची
र्णेन तपसा मुनिर्धमनिसंततः ॥ मां तपोमयमाराध्य ऋषिलोकादुपैति मां ॥ ९ ॥ ६ ॥

संचिनुयात् आहरेत् ॥ अन्यदा कालांतरे आहृतं कालांतरेनाददीत ॥ लब्धे नवे नवेऽन्नाद्ये पुराणं तु परित्यजेत् इति नारदोक्तेः ॥
॥ ६ ॥ कालचोदितानाग्रयणादीन् ॥ ७ ॥ किं च अग्निहोत्रमिति ॥ मुनेश्च नैगमैः वेदवादिभिः ॥ ८ ॥ अस्य निष्कामस्य फलमा
ह ॥ एवमिति ॥ धमनिभिः शिराभिः संततः व्याप्तः यावज्जीवं कृतेन तपसा मुख्यमांसरसस्यर्थः ॥ ऋषिलोकात् महर्लोकादि
क्रमेण ॥ अयं भावः ॥ अंतःकरणशुद्धिभक्ति यदा स्यात् तदा तावन्मुच्यते ॥ प्रतिबंधकवाहुल्ये त्वनेन क्रमेण मुच्यते ॥ ९ ॥ ६ ॥

तं सकामं निंदति ॥ यस्त्विति ॥ निःश्रेयसं मोक्षं ॥ आत्मीयसे आविरंच्यादलमेव तस्मै ॥ २० ॥ एवं यावज्जीवं वर्त्तमानस्य मोक्षः ॥ तृतीयमा
गावसानं तु मंदविरागेपि संन्यासाधिकारः ॥ यदि तु ततोऽर्वागेव स्वधर्माचारात्तो भवेत्तदापि सम्यग्विरक्तः विरक्तो वा ॥ तत्राविर
क्तस्य कृत्यमाह ॥ यदेति ॥ जातो वेपथुः कंपो देहे यस्य सः ॥ २१ ॥ विरक्तं प्रत्याह ॥ यदेति ॥ २२ ॥ तत्रादौ कृत्यमाह ॥ इष्ट्वेति ॥ ययोपदेशं

यस्त्वेतत्कृच्छ्रतश्चीर्णं तपो निःश्रेयसं महत् ॥ कामायात्मीयसे युंज्यात् बालिशः कोपरस्ततः ॥ २० ॥ यदाऽसौ नियमे
कल्पो जरया जातवेपथुः ॥ आत्मन्यग्नीन्समारोप्य मच्चित्तोऽग्निं समाविशेत् ॥ २१ ॥ यदा कर्मविपाकेषु लोकेषु नि
रयात्मसु ॥ विरागो जायते सम्यक् न्यस्ताग्निः प्रव्रजेत्ततः ॥ २२ ॥ इष्ट्वा यथोपदेशं मां दत्वा सर्वस्वमृत्विजे ॥ अग्नी
न्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् ॥ २३ ॥ विप्रस्य वै संन्यसतो देवा दारादिरूपिणः ॥ विघ्नान्कुर्वंत्ययं ह्यस्माना
क्रम्य समियात्परं ॥ २४ ॥ बिभृयाच्चेन्मुनिर्वासः कौपीनाच्छादनं परं ॥ त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि ॥ २५ ॥

आद्धाष्टकपूर्वकं प्राजापत्येष्ट्या मामिष्ट्वा ॥ स्वप्राणे आत्मनि ॥ २३ ॥ संन्यासे विघ्नाः भवंतीति तानविगणय्य संन्यसेदेवेत्याशये
नाह ॥ विप्रस्येति ॥ केनाभिप्रायेण कुर्वंतीति तमाह ॥ अयमिति ॥ परं परं ब्रह्म ॥ २४ ॥ एवं प्रव्रजितस्य धर्मानाह ॥ बिभृयाच्चे
ति ॥ परं कौपीनादन्यद्वासो यदि धारयितुमिच्छति तर्हि कौपीनमाच्छाद्यते यावता तावन्मात्रं धारयेदित्यर्थः ॥ त्यक्तं प्रैषोच्चा
रात्पूर्वमेव ॥ अतोऽन्यत्किंचिदपि न बिभृयात् ॥ दंडपात्राभ्यामित्यावश्यकजलपात्रादेरुपलक्षणं ॥ २५ ॥ श्रीदत्तात्रेया ॥

मनःपूतं मनसम्यग्विचार्य यद्युक्तं तदाचरेत्॥२६॥ मौनं वाचो दंडः॥ अनीहा काम्यकर्मत्यागो देहस्य॥ प्राणायामश्चेतसः॥ एते त्रयं तस्य
योदंडा यस्य न संति॥ अंग हे उद्धव॥ अंगेध ते वेणुभिरिति वा॥२७॥ चतुर्ष्वेति॥ ब्राह्मणे चैव वृत्ति भेदेन चतुर्विधेषु॥ पूर्वपूर्वासंभवे बा॥
विगर्ह्यान् अभिशस्तपतितान् असंकूप्तान् अत्रायं लाभो भविष्यतीति पूर्वमनुद्दिष्टान्॥२८॥ बहिर्ग्रामात् पावितं प्रोक्षणादिभिः शोधि
तं॥ विभज्य विष्णुब्रह्मार्कभूतेभ्यः॥ अशेषमित्यधिकाहरणं निरस्तं॥ याचितमिति पाठे माधुकरेण याचितमन्नं चेत् तर्हि विभज्य भुंजी

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्॥ सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत्॥२६॥ मौनानीहानिलायामा दंडा वा
ग्देहचेतसां॥ न ह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः॥२७॥ भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत्॥ सप्तागारानसं
संकूप्तांस्तुष्येल्लब्धेन तावता॥२८॥ बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः॥ विभज्य पावितं शेषं भुंजीताशेषमा
हृतं॥२९॥ एकश्चरेन्महीमेतां निःसंगः संयतेंद्रियः॥ आत्मक्रीड आत्मरत आत्मवान्समदर्शनः॥३०॥ वि
विक्तक्षेमशरणो मद्भावविमलाशयः॥ आत्मानं चिंतयेदेकमभेदेन मया मुनिः॥३१॥ श्रीदत्तात्रेयाय नमः॥

त॥ न त्वयाचितादि भैक्ष्यचतुष्टयमित्यर्थः॥ माधुकरे तु नैवेद्यं भैक्ष्येनान्येषु विद्यते॥ नैवेद्यं कंक्षिपेदप्सु त्रितयं भौतिकं बहिरिति
स्मृतेः॥ यद्वा तद्दानीं केनापि याचितं चेत् तन्मध्ये तस्मै किंचिद्विभज्य दत्तेत्यर्थः॥२९॥ किंच एकश्चरेदिति॥ आत्मन्येव क्रीडा कौ
तुकं यस्य सः॥ आत्मन्येव चरतः संतुष्टः आत्मवान् धीरः॥३०॥ विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः॥ मद्भावेन विमल
आशयो यस्य सः॥३१॥

बंधं मोक्षं च केन बंधः केन वा मोक्ष इति तत्राह। बंध इति। एषामिंद्रियाणां चकारादात्मस्मरणेन॥२२॥ यस्मादेवंभूतौ बंधमोक्षौ तस्मान्मद्भावेन मां स्मरन् पुरादिकं प्रविशन् महीं चरेदित्यन्वयः॥२३॥ पुराणि हट्टादिमंति। ग्रामास्तद्रहिताः॥ व्रजा गोष्ठानि॥ सार्थान्यात्रिकजनसमूहान्॥२४॥ यतः शिलवृत्त्या प्राप्तेन तदीयेनांधसान्नेन शुद्धसत्त्वः सन्॥ निवृत्तमोहः संसिध्यति मुच्यते॥२५॥ ननु मिष्टान्नं विहाय कथं शिलान्ने प्रवृत्तिः स्यादत आह॥ नेति॥ एतत् दृश्यमानं मिष्टान्नादि

अन्वीक्षेतात्मनो बंधं मोक्षं च ज्ञाननिष्ठया॥ बंध इंद्रियविक्षेपो मोक्ष एषां च संयमः॥२२॥ तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः॥ विविक्तः क्षुल्लकामेभ्यो लब्ध्वात्मनि सुखं महत्॥२३॥ पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत्॥ पुण्यदेशसरिच्छैलवनग्रामवतीं महीं॥२४॥ वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत्॥ संसिध्यत्याश्वसंमोहः शुद्धसत्त्वः शिलांधसा॥२५॥ नैतद्वस्तुतया पश्येत् दृश्यमानं विनश्यति॥ असक्तचित्तो विरमेदिहामुत्रचिकीर्षितात्॥२६॥ यदेतदात्मनि जगन्मनोवाक्प्राणसंहतं॥ सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत्॥२७॥ ७

वस्तुतया न पश्येत्॥ यतो विनश्यति॥ अत इहामुत्र च लोके असक्तचित्तः सन्॥ चिकीर्षितात् तदर्थकर्मात् विरमेत्॥२६॥ ननु तथापि यावच्छिन्नात्रां सुखहेतुत्वाच्चिंतावतः कुतो विरागः स्यात् तत्राह॥ यदेतदिति॥ एतज्जगत् ममतास्पदं मनोवाक्प्राणैः संहतं सहितम् अहंकारास्पदं शरीरं च सर्वं तज्जन्यं सुखं च आत्मनि मायामात्रमिति तर्केण स्वप्नादिदृष्टांतेन स्वस्थः आत्मनिष्ठः सन् पुनस्तत्र स्मरेत् न चिंतयेत्॥२७॥ श्रीरामचंद्राय नमः॥ श्रीरामकृष्णाय॰

॥भा॰ ए॰॥
॥६९॥

एवं बह्वृकादिधर्मानुक्त्वा परमहंसधर्मानाह ॥ ज्ञाननिष्ठ इति सार्द्धैः षड्भिः ॥ बहिर्विरक्तो मुमुक्षुः सन् यो ज्ञाननिष्ठो वा मोक्षे प्यनपेक्षो मद्भक्तो वा सलिङ्गान् त्रिदंडादिसहितानाश्रमान् तद्धर्मान् सत्यक्त्वा तदासक्तिं त्यक्त्वा यथोचितं धर्मं चरेदित्यर्थः ॥ न पुनस्तत्त्याग एव विवक्षितः पुनर्धर्मविधानात् ॥ अक्रियत्वस्यानंतराध्याये वक्ष्यमाणत्वाच्च तर्हि पूर्वस्मात्को विशेषः ॥ अविधिगोचरः विधिकिंकरो न स्यादिति ॥ एतदेव स्फुटीकरिष्यति ॥ शौचमाचमनं स्नानं न तु चोदनया चरेदित्यादिना ॥

ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः ॥ सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ॥२८॥ बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत् ॥ वदेदुन्मत्तवद्विद्वान्गोचर्यां नैगमश्चरेत् ॥२९॥ वेदवादरतो न स्यान्न पाखंडी न हैतुकः ॥ शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत् ॥३०॥ नोद्विजेत जनाद्धीरो जनं चोद्वेजयेन्न तु ॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ देहमुद्दिश्य पशुवद्वैरं कुर्यान्न केनचित् ॥३१॥ एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ॥ यथेंदुरुदपात्रेषु भूतान्येकात्मकानि च ॥३२॥ अलब्ध्वा न विषीदेत काले कालेऽशनं क्वचित् ॥ लब्ध्वा न हृष्येद्धृतिमानुभयं दैवतंत्रितं ॥३३॥७

तर्हि कथं चरेत्तदाह ॥ बुधः विवेकवानपि बालवत् ॥ मानापमानविवेकशून्यः कुशलः निपुणोऽपि जडवत् ॥ फलानुसंधानाभावेन विद्वानपि पंडितोऽपि उन्मत्तवत् ॥ लोकरंजनाभावेन नैगमः वेदार्थनिष्ठोऽपि गोचर्यामनियताचारमिव ॥२९॥ वेदवादरतः कर्मकांडव्याख्याननिष्ठः हैतुकः केवलतर्कनिष्ठः शुष्कवादे निःप्रयोजने गोष्ठ्यां यो विवादस्तस्मिन् ॥३०॥ अतिवादान् दुरुक्तानि ॥३१॥ आत्मदृष्ट्या तावद्वैरकारणं नास्तीत्युक्तं तमेवाह ॥ एक एवेति ॥ देहदृष्ट्यापि नास्तीत्याह ॥ भूतानि च देहापि कारणरूपेणैकात्मकानि ॥३२॥ दैवतंत्रितं दैवाधीनं यतः ॥३३॥७॥

॥रामः॥
॥६९॥

अलं तर्हि भिक्षाप्रयत्नेनापि तत्राह। आहारमात्रार्थं समीहतैव। यतः तस्य प्राणधारणं युक्तं सम्यक् कथं तेन प्राणधारणेन तत्त्वं वि
चार्यते। किं तेनापि तत्राह। तद्विज्ञायेति॥२४॥ तर्हि किं मिष्टान्नादिकमप्यास्यमेव केनैव युक्तमित्याह। यदृच्छयेति॥२५॥ यथाहमी
श्वरो लीलया चरामि तथा ज्ञानी ज्ञाननिष्ठः अनासक्तः कुर्यात्। ननु विधिकिंकरत्वेन तस्य ज्ञाननिष्ठाविरोधादित्यर्थः॥२६॥ कुतो
विधिकिंकरत्वाभावस्तस्य तत्राह। नहीति॥ न हि तस्य विकल्पाख्या भेदप्रतीतिः॥ न त्वस्ति सा सत्यं या चासीत्सापि मद्वीक्षया ज्ञानेन हता।

आहारार्थं समीहेत युक्तं तत्प्राणधारणं॥ तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते॥२४॥ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठ
मुतापरं॥ तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः॥२५॥ शौचमाचमनं स्नानं न तु चोदनया चरेत्॥ अन्यांश्च
नियमान्ज्ञानी यथाहं लीलयेश्वरः॥२६॥ न हि तस्य विकल्पाख्या या च मद्वीक्षया हता॥ आदेहान्तात्क्वचित्ख्याति
स्ततः संपद्यते मया॥२७॥ दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान्॥ अजिज्ञासितमद्धर्मो गुरुं मुनिमुपव्रजे
त्॥२८॥ तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः॥ यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः॥२९॥ यस्त्वसंयत
षड्वर्गः प्रचंडेंद्रियसारथिः॥ वैराग्यज्ञानरहितस्त्रिदंडमुपजीवति॥४०॥७॥

ननु हता पुनर्दृश्यमानत्वात् तत्राह। आदेहान्तात् क्वचित् कदाचित् बाधितैव ख्यातिर्भवति॥२७॥ तदेवं विरक्तस्य परोक्षज्ञानव
तः संन्यासं तद्धर्मांश्चोक्त्वा केवलं वैराग्यवतो विविदिषुं प्रत्याह। दुःखोदर्केष्विति॥ न जिज्ञासिता मद्धर्मा मत्प्राप्तिसाधनं येन
नसः॥२८॥ मामेव मद्दृष्ट्यैव गुरुं परिचरेत्॥ ततः परमेश्वरे दिसादिधर्मैर्वर्तेतेति भावः॥२९॥ अनधिकारिणः संन्यासं
निन्दति। द्वाभ्यां। यस्त्विति। प्रचंडोऽसासक्त इंद्रियसारथिर्बुद्धिर्यस्य सः॥४०॥७॥

भि

सुरान्यष्टव्यान्देवान्॥स्वात्मानंच आत्मस्थं मांचनिन्हुते प्रतारयति॥निन्हवफलमाह॥आस्मादिति॥४१॥चतुर्णांप्रधानध
र्मानाह॥भिक्षोरिति॥४२॥अन्यधर्मान्कांक्षितरःगृहस्थेप्यतिदिशति॥ब्रह्मचर्यमिति॥शौचंरागादिराहित्यं॥तस्यब्रह्मचर्य
प्रकारमाह॥ऋतावितिगन्तुरिति॥४३॥एवंभूतवर्णाश्रमधर्मफलमाह॥इतीति॥दृढांमद्भक्तिंविंदते॥४४॥ततःकिमतआह॥महे
श्वरत्वेहेतुः॥सर्वोत्पत्त्यप्ययंसर्वस्योत्पत्त्यप्ययौयस्मात्॥अतएवतत्कारणंमामांब्रह्मरूपंवैकुंठवासिनं॥यद्वाब्रह्मणोवेदस्यका

सुरानात्मानमात्मस्थंनिन्हुतेमांचधर्महा॥अविपक्वकषायोस्मादमुष्माच्चविहीयते॥४१॥भिक्षोर्धर्मःशमोऽहिंसा
तपईक्षावनौकसः॥गृहिणोभूतरक्षेज्याद्विजस्याचार्यसेवनं॥४२॥ब्रह्मचर्यंतपःशौचंसंतोषोभूतसौहृदं॥गृ
हस्थस्याप्यृतौगंतुःसर्वेषांमदुपासनं॥४३॥इतिमांयःस्वधर्मेणभजन्नित्यमनन्यभाक्॥सर्वभूतेषुमद्भावोम
द्भक्तिंविंदतेदृढां॥४४॥भक्त्योद्धवाऽनपायिन्यासर्वलोकमहेश्वरं॥सर्वोत्पत्त्यप्ययंब्रह्मकारणंमोपयातिसः॥४५॥
इतिस्वधर्मनिर्णिक्तसत्वोनिर्ज्ञातमद्गतिः॥ज्ञानविज्ञानसंपन्नोनचिरात्समुपैतिमां॥४६॥वर्णाश्रमवतांधर्मएषआ
चारलक्षणः॥सएवमद्भक्तियुतोनिःश्रेयसकरःपरः॥४७॥एतत्तेऽभिहितंसाधोभवान्पृच्छतियच्चमां॥यथास्वध
र्मसंयुक्तोभक्तोमांसमियात्परं॥४८॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेअष्टादशोध्यायः॥१८॥छ॥छ॥

रणंमामुपयातिसामीप्येनप्राप्नोति॥४५॥ततश्चासौमुक्तएवेत्याह॥इतिएवंभूतेनस्वधर्मेणनिर्णिक्तंशुद्धंसत्वंयस्यसः॥
अतएवनिर्ज्ञातामम गतिरैश्वर्यंयेन॥४६॥उक्तमर्थंसंक्षिप्याह॥यएषआचारलक्षणःपितृलोकप्राप्तिफलःमद्भक्तियुतःस
मर्पणेनकृतः॥४७॥प्रकरणार्थमुपसंहरति॥एतदिति॥एतत्ततेऽभिहितंयथाभक्तोभूत्वामांपरंसंप्राप्नुयादिति॥४८॥इतिए
कादशेअष्टादशः॥१८॥छ॥

ज्ञानादेर्निर्णयः पूर्वंकृतोयाश्रमभेदतः॥ एकोनविंशतितमेज्ञानादेस्त्यागउच्यते॥१॥ तदेवंतर्केणतोबाधितोऽपिदेहादि
प्रपंचोयावदपरोक्षानुभवेनदग्धोहादि:: विनलीयते॥ तावज्ज्ञानाभ्यासस्ततोमुक्तिरित्युक्तं॥ अथदेहांताकिंचितव्या
तिस्ततःसंपद्यतेमयेसाहदिना॥ यस्यत्वपरोक्षानुभवेनप्रपंचोलीनप्रायस्तस्यनकिंचित्कृत्यमस्तीत्याह॥ यइति॥
विद्याअनुभवःतत्समर्थेतेनकृतेसंपन्नः अतएवात्मवान्प्राप्तात्मतत्वः॥ नानुमानिकःकेवलपरोक्षज्ञानवान्भव
ति॥ अनकारपाठेप्राकृत्कसनुकूलनकेतानिर्णितार्थइत्यर्थः॥ स इदंद्वैतंतन्निवृत्तिसाधनंचमयिमायामात्रमितिज्ञात्वा
ज्ञानंचतत्साधनंचसंन्यसेत॥ अयमेवविद्वत्संन्यासोनाम॥१॥ अत्रहेतुमाह॥ ज्ञानिनस्त्विति॥ यस्मादहमेवतस्ये
॥श्रीभगवानुवाच॥ योविद्याश्रुतसंपन्नोआत्मवान्नानुमानिकः॥ मायामात्रमिदंज्ञात्वाज्ञानंचमयिसंन्यसेत॥१॥
ज्ञानिनस्त्वहमेवेष्टःस्वार्थोहेतुश्चसंमतः॥ स्वर्गश्चैवापवर्गश्चनान्योऽर्थोमदृतेप्रियः॥२॥ ज्ञानविज्ञानसंसिद्धाःप
दंश्रेष्ठंविदुर्मम॥ ज्ञानीप्रियतमोऽतोमेज्ञानेनासौबिभर्तिमां॥३॥ तपस्तीर्थंजपोदानंपवित्राणीतराणिच॥ नालं
कुर्वंतितांसिद्धिंयाज्ञानकलयाकृता॥४॥ तस्माज्ज्ञानेनसहितंज्ञात्वास्वात्मानमुद्धव॥ ज्ञानविज्ञानसंपन्नोभज
मांभक्तिभावतः॥५॥ ज्ञानविज्ञानयज्ञेनमामिष्ट्वात्मानमात्मनि॥ सर्वयज्ञपतिंमांवैसंसिद्धिंमुनयोऽगमन्॥६॥
ष्टः॥ अपेक्षितःस्वार्थःफलहेतुः॥ तत्साधनंचसंमतःस्वर्गोभ्युदयश्च॥ अपवर्गःसंसारनिवृत्तिः॥ अतस्तस्यनप्राप्यं
कृत्यंवाकिंचिदस्तीत्यर्थः॥२॥ अत्रविद्वदनुभवंप्रमाणयति॥ ज्ञानेति॥ यथोक्तंज्ञानिनमभिनिंदति॥ ज्ञानीति॥ यतोऽ
सौज्ञानेनमांधारयति॥३॥ तस्यज्ञानस्तौति॥ तपइति॥ अलमसमर्थंज्ञानस्यकलयालेशेन॥४॥ ज्ञानेनसहितंतत्पूर्णंतं
यथाभवतितथाज्ञात्वाततःसंपन्नःसन्मामेवभजअन्यत्सर्वंसजेत्यर्थः॥५॥ तस्यप्रसयार्थंपूर्वेषांवृत्तमाह॥ ज्ञानेति॥ मामे

तदेव ज्ञानं संक्षेपत उपदिशति॥ त्रयीति॥ त्रिविधोऽध्यात्मकादिर्विकारः देहादिः स मायानतु परमार्थः॥ यत् यस्मात् अंतरा म
ध्य एवापतति॥ रज्जौ सर्पमालादिवत्॥ नाद्यपवर्गयोः न तादृशं तु चास्ति॥ अतः यत् यदा अस्य विकारस्यामी जन्मादयः स्युः॥
तदा तस्य तत्त्वाधिष्ठानभूतस्य किं न किंचिदित्यर्थः॥ तस्यापि वस्तुतो न संति तस्यासत्वादित्याह॥ आद्यंतयोरिति॥ असतः सर्पा
देः आद्यंतयोर्यदस्ति रज्ज्वादि तदेव मध्येपि॥ न तु सर्पादि॥ तद्वदयं विकारो नास्तीत्यर्थः॥ यद्वा आद्यंतयोर्यदस्ति तन्मध्येप्यस्ये
वेन तस्य जन्मादयः संति॥ अतस्त्वनिर्विकारं ब्रह्मेति॥ ७॥ ज्ञानादेर्विशेषं जिज्ञासुः पृच्छति॥ ज्ञानमिति॥ विशुद्धमेतत् ज्ञा

त

त्वा शुद्धं वा आश्रयति यस्त्रिविधो विकारो मायांतरापतिनाद्यपवर्गयोर्यत्॥ जन्मादयोऽस्य यदमी तव तस्य किं स्युराद्यंतयो
र्यदसतोऽस्ति तदेव मध्ये॥ ७॥ उद्धव उवाच॥ ज्ञानं विशुद्धं विपुलं यथैतद्वैराग्यविज्ञानयुतं पुराणं॥ आख्याहि वि
श्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं॥ ८॥ तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश॥ प
श्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात्॥ ९॥ दष्टं जनं संपतितं बिलेऽस्मिन्कालाहिना क्षुद्रसु
खोरुतर्षं॥ समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंच महानुभाव॥ १०॥ श्रीदत्तात्रयाय नमः॥ श्रीराम०
नं विपुलं निश्चितं यथा भवति तथा कथयेति॥ महद्भिर्ब्रह्मादिभिर्विमृग्यं॥ ८॥ महद्विमृग्यत्वमभिनयेनाह॥ तापत्रये
णाभिहतस्य अतः संतप्यमानस्य॥ अंघ्रिद्वंद्वमेवातपत्रं तस्मान्न केवलमातपात्त्रातु किंतु अमृतप्येमभितो वर्षति यत्
तस्मात्॥ ९॥ अतिरूपामुत्पादयन्नाह॥ दष्टमिति॥ अस्मिन् बिले संसारकूपे पतितं तत्र च कालाहिना दष्टं॥ एवमपि क्षुद्र
सुखेष्वेव तर्षस्तृष्णा यस्य तं॥ दह्यमानः कथं समुद्धरणीय इति चेत्तत्राह॥ आपवर्ग्यैः अपवर्गबोधकैर्वाग्मृतैरासिंचे
ति॥ १०॥

तद्धिस्वासार्थं विश्लेषभायां निर्णीतमहं वक्ष्यामीत्याह ॥ स्थानमिति ॥ २१ ॥ २२ ॥ ज्ञानादिभिरुपबृंहितान् तत्सहितानित्यर्थः ॥ २३ ॥ त
त्रज्ञानं कथयति ॥ नवेति ॥ प्रकृतिपुरुषमहदहंकाराः पंच तन्मात्राणि एकादशेंद्रियाणि पंच महाभूतानि त्रयो गुणाः एतान्
भावान् अष्टाविंशतितत्त्वानि भूतेषु ब्रह्मादिस्थावरांतेषु कार्येषु अनुगतानि येन ज्ञानेन ईक्षेत ॥ अथ एष्वपि भावेषु एकं
परमात्मतत्त्वं अनुगतं येन ईक्षेत कार्यकारणात्मकं जगत् पश्यन् परमकारणात्मकमेव तत् ॥ न तु वस्तुतः पृथगिति येन प
श्येत् तज्ज्ञानमित्यर्थः ॥ २४ ॥ विज्ञानमाह ॥ एतदेवेति सार्द्धेन ॥ यत् यदा येकेनानुगतान् एकात्मकान् भावान् पूर्वमीक्षत तदा
न तथा पूर्ववदीक्षेत ॥ किंतु तदेव परमकारणं ब्रह्मैव तदा एतदेव विज्ञानमुच्यते ॥ तदुक्तं भवति ॥ परोक्षज्ञानेनापरोक्ष

॥ श्रीभगवानुवाच ॥ स्थमेतत्सुरराजाभीष्मं धर्मभृतां वरं ॥ अजातशत्रुः पप्रच्छ सर्वेषां नोनुशृण्वतां ॥ २१ ॥
निवृत्ते भारते युद्धे सुहृन्निधनविह्वलः ॥ श्रुत्वा धर्मान् बहून् पश्चान्मोक्षधर्मान् अपृच्छत ॥ २२ ॥ तानहं तेऽभिधा
स्यामि देवव्रतमुखाच्छ्रुतान् ॥ ज्ञानवैराग्यविज्ञानश्रद्धाभक्त्युपबृंहितान् ॥ २३ ॥ नवैकादश पंच त्रीन् भावान्भूते
षु येन वै ॥ ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितं ॥ २४ ॥ एतदेव हि विज्ञानं न तथैकेन येन यत् ॥ स्थित्युत्पत्त्यप्यया

भ्रमस्य दृष्टो हादिष्विव न निवृत्तिस्तदा जगत्प्रपंचपश्यन् आत्मनः पृथक् सदिति मन्यते ॥ अपरोक्षज्ञाने तु बाधितमेव जी
वन्मुक्तः संसारं शेषं पश्यति ततः परं न पश्यति च ॥ अतः परोक्षापरोक्षज्ञाने ज्ञानविज्ञानशब्दाभ्यामुच्येते इति ॥
एकेन सर्वकार्याणामनुगतिं कार्याणां कारणात्प्रत्यगत्वं चोपपादयति सार्द्धेन ॥ तत्र यदि न कदाचिदपीदं जगदिस्या
दिमतं न तेषां भावानामुत्पत्त्यादयो न स्युः ॥ तर्हि कारणस्य कस्याभावादेकात्मता मिथ्यात्वं च न स्यात् ॥ अतः तेषामुत्पत्त्या
दीन्साधयति ॥ स्थितीति ॥ त्रिगुणात्मनां सावयवानामित्यर्थः ॥ विमता भावा उत्पत्त्यादिमंतः सावयवत्वात् घटादिवदिति प

नोत्रिगुणात्मनां ॥ २५ ॥

श्येत ॥ २५ ॥

ततश्चाद्यवुत्पत्तौ अंते परिणामांतरापत्तौ च कारणत्वेन मध्ये च आश्रयत्वेन सृज्यात् सृज्यकार्यात् कार्यांतरं प्रति यदन्वियादनुगच्छेत् ॥ तत्प्रतिसंक्रामे तेषां प्रलये च यदवशिष्येत तदेव सदिति पद्यत्रयस्यार्थः ॥१६॥ वैराग्यमाह ॥ श्रुतिरिति द्वाभ्यां ॥ श्रुतिः नेह नानास्ति किंचनेत्यादि ॥ प्रत्यक्षं पटादिकार्यं तत्त्वादिव्यतिरेकेण न दृश्यते ॥ चैतन्यव्यतिरेकेण च न किंचित् ॥ दृश्यते इति ॥ ऐतिह्यं महाजनप्रसिद्धिः ॥ अनुमानं विमतं मिथ्या दृश्यत्वात् शुक्तिरजतवदित्यादि ॥ ए-

आद्यवंते च मध्ये च सृज्यात् सृज्यं यदन्वियात् ॥ पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् ॥१६॥ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं ॥ प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते ॥१७॥ कर्मणां परिणामित्वादाविरिंच्यादमंगलं ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥१८॥ भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघ ॥ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं ॥१९॥ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्त्तनं ॥ परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥२०॥ आदरः परिचर्यायां सर्वांगैरभिवंदनं ॥ मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥२१॥ ७

१९

वं प्रमाणचतुष्टयं ॥ एतेष्वनवस्थानात् ॥ एतैर्बाधितत्वात् स एवं सर्वानुगतं सत्यमात्मतत्त्वं पश्यन् विकल्पस्य मिथ्यात्वात्ततो विरज्यते विरक्तो भवतीत्यर्थः ॥१७॥ ननु वेदोक्तस्वर्गादिसुखाश्रयान विरज्यते तत्राह ॥ कर्मणामिति ॥ आविरिंच्यात् ब्रह्मलोकपर्यंतं अदृष्टमपि सुखं ॥ अमंगलं दुःखरूपं नश्वरं च पश्येत् ॥१८॥ भक्तियोगं सकारणमाह ॥ भक्तियोगः पूर्वमुक्त एव तथा तस्मिन् प्रीतिं प्राप्नुवते तुभ्यं पुनश्च कथयिष्यामि ॥१९॥ श्रद्धा श्रवणादरः शश्वदिति सर्वत्रानुषज्यते ॥ मदनुकीर्त्तनं श्रवणानंतरं मत्कथाख्यानमित्यर्थः ॥२०॥२१॥

ऽंगचेष्टा लौकिकी क्रिया॥ वचसा लौकिकेनापि मद्गुणनामीरणं कथनं॥२२॥ मदर्थे मद्भजनार्थं तद्विरोधिनोऽर्थस्य परित्याग॥ भोगस्य तत्साधनस्य चंदनादेः॥ सुखस्य पुत्रोपलालनादेः॥ इष्टादिकं यत्कर्म तदपि मदर्थं कृतं भक्तेः कारणमित्यर्थः॥२३॥ भक्तिः प्रेमलक्षणा संजायते॥ अस्य भक्तस्य अन्यः कोऽर्थः साधनरूपः साध्यरूपो वावशिष्यते सर्वोपि स्वत

मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं॥ मय्यर्पणं च मनसः सर्वकामविवर्जनं॥२२॥ मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च॥ इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः॥२३॥ एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां॥ मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते॥२४॥ यदात्मन्यर्पितं चित्तं शांतं सत्त्वोपबृंहितं॥ धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते॥२५॥ यदर्पितं तद्विकल्पे इंद्रियैः परिधावति॥ रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययं॥२६॥ धर्मो मद्भक्तिकृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनं॥ गुणेष्वसंगो वैराग्यमैश्वर्यं चाणिमादयः॥२७॥ उद्धव उवाच॥ यमः कतिविधः प्रोक्तो नियमो वारिकर्शन॥ कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो॥२८॥

एवं भवतीत्यर्थः॥२४॥ तदेवाह॥ किं बहुना चित्तमेवांतर्बहिर्निष्ठमर्थानर्थयोः कारणमित्याह॥ यदात्मनीति द्वाभ्यां॥ यदात्मनि मयि ईश्वरे चित्तमर्पितं तदा पुमान् धर्मादीन्प्राप्नोत्येव॥२५॥ तदेव व्यतिरेकेण द्रढयति॥ यत्तु यदा चित्तं विकल्पे देहगृहादावर्पितं सत्परिधावति॥ तदाधिकं रजस्वलमसन्निष्ठं च भवति ततश्च विपर्ययमधर्माधिकं विद्धि॥२६॥ स्वाभिप्रेतान् धर्मादीन्व्याचष्टे॥ धर्मो मद्भक्तिकृत्तत्तत्स एव प्रोक्तः प्रकृष्टः उक्तः शास्त्रेषु॥२७॥ धर्मादीनां महाजनप्रसिद्धानामन्यथा

व्याख्यातत्वाद्यमादिष्वपि संख्यातः स्वरूपतो वा किंचिल्लक्षणं स्यादिति संभावनायां तद्विशेषं जिज्ञासुः पृच्छति॥ यम इति पंचभिः॥२८॥

इष्टंअभ्यर्हितंधनंचकिं॥२९॥परेतिविद्यादीनांविशेषणं॥श्रीमंडनं॥३०॥३१॥प्रश्नान्एतान्अर्थान्विपरितान्अशमादीन्॥
३२॥यमनियमानाह॥अहिंसेतित्रिभिः॥अस्तेयंमनसापिपरस्वाग्रहणं॥आस्तिक्यंधर्मेविश्वासः॥३३॥शौचंबाह्याभ्यंतरं
चेतिद्वयं॥अतोद्वादशनियमाः॥श्रद्धाधर्मादरः॥३४॥उभयोःश्लोकयोर्यस्मताःतेयमनियमाश्च॥यद्वाप्रवृत्तनिवृत्तयोः

किंदानंकिंतपःशौर्यंकिंसत्यमृतमुच्यते॥कस्त्यागःकिंधनंचेष्टंकोयज्ञःकाचदक्षिणा॥२९॥पुंसःकिंस्विद्बलं
श्रीमन्भगोलाभश्चकेशव॥काविद्याह्रीःपराकाश्रीःकिंसुखंदुःखमेवच॥३०॥कःपंडितःकश्चमूर्खःकःपंथाउ
त्पथश्चकः॥कःस्वर्गोनरकःकःस्वित्कोबंधुरुतकिंगृहं॥३१॥कआढ्यःकोदरिद्रोवाकृपणःकःकईश्वरः॥एता
न्प्रश्नान्ममब्रूहिविपरीतांश्चसत्तम॥३२॥श्रीभगवानुवाच॥अहिंसासत्यमस्तेयमसंगोह्रीरसंचयः॥आस्ति
क्यंब्रह्मचर्यंचमौनंस्थैर्यंक्षमाऽभयं॥३३॥शौचंजपस्तपोहोमःश्रद्धातिथ्यंमदर्चनं॥तीर्थाटनंपरार्थेहातुष्टि
राचार्यसेवनं॥३४॥एतेयमाःसनियमाःउभयोर्द्वादशस्मृताः॥पुंसामुपासितास्तातयथाकामंदुहंतिहि॥३५॥शमो
मन्निष्ठताबुद्धेर्दमइंद्रियसंयमः॥तितिक्षादुःखसंमर्षोजिह्वोपस्थजयोधृतिः॥३६॥७
मुमुक्षोर्यमाःमुख्याःसकामस्यनियमाःमुख्याःस्मृताः॥हेतुमाह॥हियस्मादुपासिताःसेविताःसंतःपुंसांप्रवृत्तानांनिवृत्ता
नांचयथाकामंकामानुसारेणमोक्षमभ्युदयंचदुहंतीति॥३५॥मुमुक्षोरुपादेयान्शमादीन्हेयांश्चदुःखादीन्महाजन
प्रसिद्धेभ्योविलक्षणान्याह॥शमइत्यादिनायावत्समाप्ति॥एतेनैवतद्विपरीताअशमादयोप्युन्नेयाः॥शमोमन्निष्ठताबुद्धेःन
तुशांतिमात्रं॥दमइंद्रियसंयमःनचौरादिदमनं॥तितिक्षाविहितदुःखस्यसंमर्षःसहनं॥नभारादेः॥जिह्वोपस्थजयोवेग

दंडोभिद्रोहस्तस्यत्यागोदानं॥नधनार्पणं॥कामत्यागोभोगोपेक्षातपःनकृच्छ्रादि॥स्वभावोवासनातस्यजयःप्रतिबंधःशौर्यं॥
नविक्रांतिः॥समंब्रह्मतस्यदर्शनं॥आलोचनंसत्यविषयत्वात्सत्यं॥नयथार्थभाषणमात्रं॥३७॥अन्यच्चऋतंसूनृतास
त्याप्रियाचवाक्॥एवंचऋतसत्ययोःस्फुटएवविवेकःक्रमप्राप्तत्यागंव्याख्यातुमादौततोभेदेनशौचंव्याचष्टे॥तस्या
पिमलत्यागरूपत्वेनत्यागादभेदप्रतीतेःकर्मस्वसंगमःअनासक्तिःशौचं॥त्यागस्तुसन्यासइतितुतयोर्भेदइत्यर्थः॥३८॥
नृणामिष्टंधनंधर्मःनपश्वादिसाधारणं॥भगवत्तमःपरमेश्वरोहमेवयज्ञःमद्बुद्ध्यायज्ञोनुष्ठेयःनक्रियाबुद्ध्येत्यर्थः॥

दंडन्यासःपरंदानंकामत्यागस्तपःस्मृतं॥स्वभावविजयःशौर्यंसत्यंचसमदर्शनं॥३७॥ऋतंचसूनृतावाणी
कविभिःपरिकीर्तिता॥कर्मस्वसंगमःशौचंत्यागःसन्यासउच्यते॥३८॥धर्मइष्टंधनंनृणांयज्ञोहंभगवत्त
मः॥दक्षिणाज्ञानसंदेशःप्राणायामःपरंबलं॥३९॥भगोमऐश्वरोभावोलाभोमद्भक्तिरुत्तमः॥विद्यात्मनिभि
दाबाधोजुगुप्साह्रीरकर्मसु॥४०॥श्रीर्गुणानैरपेक्ष्याद्याःसुखंदुःखसुखात्ययः॥दुःखंकामसुखापेक्षापंडितोबं
धमोक्षवित्॥४१॥

यज्ञार्थंदानंदक्षिणा॥साचज्ञानोपदेशः॥नहिरण्यादिदानं॥तेनहियज्ञरूपोविष्णुःप्राप्यते॥दुर्दमनंबलंतच्चमनोदमनहे
तुत्वात्प्राणायामइति॥३९॥द्यालोकप्रसिद्धैवाभिमता॥लाभंव्याचिख्यासुःप्रथमंभगंततोभेदेनव्याचष्टेलोकेतयोर्भे
दप्रसिद्धेः॥भगोभाग्यंतच्चमेऐश्वरोभावोमदीयमैश्वर्यादिषाड्गुण्यमित्यर्थः॥उत्तमोलाभस्तुभक्तिःनपुत्रादिः॥विद्याचात्मनि
प्रतीतस्यभेदस्यबाधःनज्ञानमात्रं॥अकर्मसुजुगुप्साहेयत्वदर्शनंह्रीःनलज्जामात्रं॥४०॥गुणाएवश्रीःमंडनंनकिरीटादि॥सु

अहंबुद्धिरिक्तपलक्षणंदेहगेहादिष्वहंममेत्यभिमानवान्मूर्खइत्यर्थः॥मन्निगमःमांनितरांगमयतिज्ञापयतियोनिवृ
त्तिमार्गःसतुपंथाःसन्मार्गःनकंटकादिमत्त्यःचित्तविक्षेपःप्रवृत्तिमार्गःसउत्पथः॥कुमार्गःनतुचौराद्याकुलःसत्व
गुणस्योदयःउद्रेकःस्वर्गःनेंद्रादिलोकः॥४२॥तमसउन्नाहउद्रेकःसनरकःनतामिस्रादिः॥गुरूरेवबंधुःनभ्राता
दिः॥सचाहमेव॥यथाऽहंजगद्गुरुःएकएवपरोबंधुर्विषमेसमुपस्थिते॥गुरुःसकलधर्मात्मायत्राकिंचनगोहरिरि
ति॥ससाधनभोगायतनंगेहंतच्चमानुष्यंमानुषरूपंशरीरमेवनहर्म्यादि॥गुणैःसंपन्नःआढ्यःउच्यतेनधनी॥४३॥

मूर्खोदेहाद्यहंबुद्धिःपंथामन्नियमःस्मृतः॥उत्पथश्चित्तविक्षेपःस्वर्गःसत्वगुणोदयः॥४२॥नरकस्तमउन्ना
होबंधुर्गुरुरहंसखे॥गृहंशरीरंमानुष्यंगुणाढ्योह्याढ्यउच्यते॥४३॥दरिद्रोयस्त्वसंतुष्टःकृपणोयोऽजितेंद्रि
यः॥गुणेष्वसक्तधीरीशोगुणसंगोविपर्ययः॥४४॥एतउद्धवतेप्रश्नाःसर्वेसाधुनिरूपिताः॥किंवर्णितेनबहु
नालक्षणंगुणदोषयोः॥गुणदोषदृशिर्दोषोगुणस्तूभयवर्जितः॥४५॥इतिश्रीभा॰ महा॰ एकादशस्कंधेएकोनविं
शोऽध्यायः॥१९॥छ

असंतुष्टोयःसदरिद्रःननिस्वःयोऽजितेंद्रियःसकृपणःशोच्यःनदीनः॥विषयेष्वनासक्तधीर्यःसईशःस्वतंत्रःन
राजादिः॥गुणसंगःगुणेषुसंगोयस्यसःविपर्ययःअनीशः॥एवंचशमादिविपर्ययोपलक्षणार्थं॥४४॥उपसंहरति
साधुमोक्षोपयोगितयाएतत्सर्वंगुणदोषयोर्विवेकायोद्धवेनपृष्टमितितयोःसंक्षेपतोलक्षणमाह॥किंबहुनावर्णितेन
गुणदोषयोर्लक्षणमेतावदेवतदाह॥गुणदोषयोर्दृशिर्दर्शनंदोषःगुणस्तुतदुभयवर्जितःस्वभावइतिभावः॥४५॥उद्धवे
काऽध्याएकोनविंशः॥१९॥छ॥

विज्ञेयो योगत्रयं प्रोक्तं भक्तिज्ञानक्रियात्मकं ॥ गुणदोषव्यवस्थार्थमधिकारि विभागतः ॥१॥ गुणदोषदृष्टिर्दोषो गुणस्तूभयव
र्जित इत्युक्तं तदाक्षिपति ॥ विधिश्चेति पंचभिः ॥ विधिश्च प्रतिषेधश्चेश्वरस्य तव निगमः आज्ञारूपो वेदः स च विधेयानां प्र
तिषेध्यानां च कर्मणां गुणं दोषं च पुण्यपापफलरूपमवेक्षते ॥१॥ उत्तमाधमभावेन तदधिकारिणां वर्णानामाश्रमाणां वि
कल्पं भेदं च गुणदोषरूपमवेक्षते ॥ प्रतिलोमानुलोमजं च गुणदोषं तथैवावेक्षते ॥ प्रतिलोमजाः उत्तमवर्णास्त्रीषु हीन
वर्णेभ्यः पुरुषेभ्यो जाताः सूतवैदेहिकादयः ॥ अनुलोमजास्तु उत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णास्त्रीषु जाताः मूर्द्धावसि
क्ताम्बष्ठादयः तेषां च ॥ असत्संतस्ते विज्ञेयाः प्रतिलोमानुलोमजा इति ॥ गुणदोषौ द्रव्यादीनां कर्मार्हतानर्हताभ्यां स्वर्गं नर

॥ उद्धव उवाच ॥ विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते ॥ अवेक्षतेऽरविंदाक्ष गुणं दोषं च कर्मणां ॥१॥
वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजं ॥ द्रव्यदेशवयःकालान्स्वर्गं नरकमेव च ॥२॥ गुणदोषभिदा
दृष्टिमंतरेण वचस्तव ॥ निःश्रेयसं कथं नृणां निषेधविधिलक्षणं ॥३॥ श्रीदत्तात्रयाय नमः ॥ छ ॥

कं च तत्फलतया गुणदोषरूपमेवावेक्षते ॥ एतच्चोत्तराध्याये प्रपंचयिष्यते ॥२॥ तथापि प्रस्तुते किमायातं तत्र
तत्राह ॥ गुणदोषेति ॥ गुणदोषदृष्टिर्दोष इति निराकृतत्वात् ॥ गुणदोषभिदादृष्टिमंतरेण तां विना निषेधविधि
लक्षणं कर्मकांडं तव वचः कथं ॥ तच्च वचोऽन्तरेण नृणां निःश्रेयसं कथं स्यात् ॥ तत्रापि श्रोतव्यो मंतव्य इत्यादि सा
धनविधेः ॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तदिति निषेधस्य चावश्यकत्वादिति भावः ॥ यद्वा गुणदो
षभिदादृष्टिमंतरेण विधिनिषेधलक्षणं तव वचो विनेति सामानाधिकरण्यमेवास्तु ॥ यद्वा ॥ गुणदोषाभिदादृष्टिमंत
रेण निषेधविधिलक्षणमपि वचः कथं तु तत्त्वमस्यादिवाक्यवत् निःश्रेयसपरं स्यात् ॥ सर्ववेदस्य तत्परत्वांगिकारादिति

ननु पितरो देवाश्च सर्वज्ञाः प्रसक्ष्यतो दृष्ट्वा मनुष्येभ्यः कथयिष्यंतीति नेत्याह॥ पित्रादीनां सर्वेषां तव वाक्यरूपो वेद एव तु श्रेयः श्रेष्ठं चक्षुः प्रमापकं॥ क॥ अनुपलब्धेऽर्थे मोक्षे स्वर्गादौ च॥ तथा साध्यसाधनयोः इदमस्य साध्यं इदमस्य साधनमि त्यत्रापि तद्वद्गुणदोषदृष्ट्यभावेनैः श्रेयसं न घटते॥४॥ किंच शास्त्रेण विहितो भेददृष्टिं तस्मिन्नविषये शास्त्रं कथं निवर्त्तयेदित्याह॥ गुणेति॥ ते निगमात् त्वदाज्ञारूपाद्धेतो देव न हि स्वतः॥ यस्मादर्थप्राप्तत्वेनानिवर्त्तेत॥ इस्फुट भ्रमो भवति तं निवर्त्तयति त्राष॥५॥ विषयाभेदेप्यधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह॥ योगा इति॥ यो

पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर॥ श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि॥४॥ गुणदोषभिदादृष्टिर्निगमात्ते न हि स्वतः॥ निगमेनापवादश्च भिदाया इति ह भ्रमः॥५॥ श्रीभगवानुवाच॥ योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया॥ ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्॥६॥ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु॥ तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनां॥७॥ छ

गाः उपायाः ब्रह्मकर्मदेवताकांडैः प्रोक्ताः कर्म च निष्कामं श्रेयो विधित्सया मे साधने च्छया॥ अन्य उपायो नास्तीति का म्यकर्मादिकं व्यावर्त्तयति॥ तच्चोत्तराध्याये स्फुटं करिष्यति॥ य एतानीत्यादिना॥६॥ तेष्वधिकारिभेदमाह॥ निर्वि ण्णानामिति द्वाभ्यां॥ इह एषां मध्ये कर्मसु निर्विण्णानां दुःखबुद्ध्या तत्फलेषु विरक्तानां अत एव तत्साधनभूतकर्मन्यासि नां ज्ञानयोगः सिद्धिद इत्युत्तरेणान्वयः॥ अनिर्विण्णचित्तानां दुःखबुद्धिशून्यानां अतः कामिनां तत्फलेषु अविरक्ताना मित्यर्थः॥७॥ छ॥

यदृच्छयाकेनापिभाग्योदयेनतत्रकाम्यकर्मसुप्रवर्त्तमानस्यसर्वात्मनाविधिप्रतिषेधाधिकारउक्तउत्तराध्यायेवक्ष्यति॥नि
ष्कामकर्मयोगाधिकारिणस्तुयथाशक्ति॥सच्चज्ञानयोगाधिकारात्प्रागेवतदधिकृतयोस्तुस्वतःताभ्यांसिद्धानांतुन
किंचिदस्ति॥६॥सावधिकंकर्मयोगमाह॥तावदितिनवभिः॥कर्माणिनित्यनैमित्तिकानियावतायावत्॥९॥कर्मयोगि
नोज्ञानभक्त्यधिकारोहप्रकारमाह॥स्वधर्मस्थइति॥अनाशीःकामःअफलकामःअन्यन्निषिद्धं॥नरकयानं

यदृच्छयामत्कथादौजातश्रद्धस्तुयःपुमान्॥ननिर्विण्णोनातिसक्तोभक्तियोगोस्यसिद्धिदः॥८॥तावत्कर्मा
णिकुर्वीतननिर्विद्येतयावता॥मत्कथाश्रवणादौवाश्रद्धायावन्नजायते॥९॥स्वधर्मस्थोयजन्यज्ञैरनाशी
ष्कामउद्धव॥नयातिस्वर्गनरकौयद्यन्यन्नसमाचरेत्॥१०॥अस्मिंल्लोकेवर्त्तमानःस्वधर्मस्थोऽनघः
शुचिः॥ज्ञानंविशुद्धमाप्नोतिमद्भक्तिंवायदृच्छया॥११॥स्वर्गिणोप्येतमिच्छंतिलोकंनिरयिणस्तथा॥साध
कंज्ञानभक्तिभ्यामुभयंतदसाधकं॥१२॥ननरःस्वर्गतिंकांक्षेन्नारकींवाविचक्षणः॥नेमंलोकंचकांक्षेतदेहा
वेशात्प्रमाद्यति॥१३॥७

हिंसयैवा॥विहितातिक्रमाद्वानिषिद्धाचरणाद्वा॥अतःस्वधर्मस्थत्वात्निषिद्धवर्जनाच्चनरकंनयाति॥अफलकामत्वान्न
स्वर्गमपीत्यर्थः॥१०॥किंतुअस्मिन्लोकेअस्मिन्नेवदेहेअनघःनिषिद्धत्यागी॥अतःशुचिर्निवृत्तरागादिमलःयदृच्छयेति
केवलज्ञानादपिभक्तेर्दुर्लभतांद्योतयति॥११॥अनेनप्रकारेणज्ञानभक्तिसाधनत्वान्नरदेहंस्तौति॥स्वर्गिणोपीति॥निरयि
णइतिदृष्टांतत्वेनोक्तं॥ज्ञानभक्तिभ्यांज्ञानभक्त्योःतदुभयंस्वर्गिनारकिशरीरं॥१२॥अतोनरःस्वर्गतिंनकांक्षेत्ननारकीं

मितिदृष्टांतः॥यद्वा॥स्वर्गनरकसाधनकर्माणिनकुर्या
दित्यर्थः॥अस्यातिश्रेष्ठत्वात्पुनरपिमनुष्योभवेय
मित्यपिनकांक्षेत॥यतोदेहावेशात्देहासक्त्यास्वा
र्थेप्रमाद्यति॥अवधानशून्योभवति॥१३॥

अपितुएतद्देहंसाधकमितिविद्वान् ॥ तत्रार्थसिद्धिदमपिमर्त्यंज्ञात्वाअप्रमत्तःअनलसःसन्मृत्योःपूर्वमेवमोक्षायघटेत यत्नंकुर्यात् ॥२४॥ छिद्यमानं अप्रमत्तोमुक्तसंगःसुखंप्राप्नोतीत्यत्रदृष्टांतः ॥ छिद्यमानमिति ॥ यमैर्यमवन्निर्दयैःपुरुषैः कृतंनीडंयस्मिन्तं ॥ स्वकेतंस्वस्याश्रयंअलंपटःअनासक्तः ॥२५॥ दार्ष्टांतिकमाह ॥ अहोरात्रैश्छिद्यमानमायुर्बुद्ध्वाभयेन वेपथुःकंपोयस्यसः ॥२६॥ एवमप्रयतमानंप्रमत्तंनिंदति ॥ नृदेहंप्लवंनावंप्राप्यसंध्याहारः योभवाब्धिंनतरेत्सआत्म

एतद्विद्वान्पुरामृत्योरभवायघटेतसः ॥ अप्रमत्तइदंज्ञात्वामर्त्यमप्यर्थसिद्धिदं ॥२४॥ छिद्यमानंयमैरेतैःकृत नीडंवनस्पतिं ॥ खगःस्वकेतमुत्सृज्यक्षेमंयातिह्यलंपटः ॥२५॥ अहोरात्रैश्छिद्यमानंबुद्ध्वायुर्भयवेपथुः ॥ मु क्तसंगःपरंबुद्ध्वानिरीहउपशाम्यति ॥२६॥ नृदेहमाद्यंसुलभंसुदुर्लभंप्लवंसुकल्पंगुरुकर्णधारं ॥ मयानु कूलेननभस्वतेरितंपुमान्भवाब्धिंनतरेत्सआत्महा ॥२७॥ यदारंभेषुनिर्विण्णोविरक्तःसंयतेंद्रियः ॥ अभ्यासे नात्मनोयोगीधारयेदचलंमनः ॥२८॥ छ

हा ॥ तत्रहेतवः ॥ आद्यंसर्वफलानांमूलं ॥ एतदुपार्जितकर्मभिःसर्वंप्राप्ते ॥ किंच ॥ सुदुर्लभंउद्यमकोटिभिरपिप्राप्तुमशक्यं ॥ तथापिसुलभंयदृच्छयालब्धत्वात् ॥ तंचसुकल्पंपटुतरं ॥ किंचगुरुःसंश्रितमात्रएवकर्णधारोनेतायस्यतं ॥ मयाच स्मृतमात्रेणानुकूलमारुतेनप्रेरितं ॥२७॥ एवंतावद्विरक्तस्यवैराग्यद्वाराज्ञानभक्तिसाधकंकर्मयोगमुक्त्वाइदानीं सम्यग्विरक्तस्यज्ञानयोगंतस्यचज्ञानप्राप्तेःपूर्वंकिंचित्कृत्यमवर्जनीयंचाहसार्धैर्नवभिः ॥ यदातुआरंभेषुकर्मसुनि र्विण्णःदुःखदर्शनेनोद्विग्नःतत्फलेषुविरक्तश्चतदासंयतेंद्रियःसन्आत्मनोऽभ्यासेनआत्मविषयवृत्तिसंतत्याअ चलंयथाभवतितथामनोधारयेत् ॥२८॥ छ ॥

तत्रप्रथममेवासंतधारणासंभवात्तत्स्वभावानुसारेणवशीकरणमाह॥यर्हिभ्राम्युभ्राम्यत्यस्मिन्मदनवस्थितंभवतितदा
अनुरोधेनकिंचिदुपेक्षापूरणद्वारेण॥१९॥ननुतर्हियथापूर्वमेवस्यात्तत्राह॥मनोगतिंतुनविसृजेत्नोपेक्षेत॥किंतुअ
प्रमत्तःसन्आत्मवशंनयेत्॥आत्मानंलक्षयेदित्यर्थः॥२०॥अनुरोधमार्गंसदृष्टांतंस्तौति॥एषःअनुवृत्तिमार्गेणमन
संग्रहःपरमोयोगः॥तत्साधनत्वात्उपचारेणोक्तिः॥यथाअदांतस्यदमनीयस्यअर्वतःअश्वस्यहृदयज्ञत्वंस्वाभि
प्रायेणगतिमन्विछन्अनपेक्षमाणःअश्वधारकःप्रथमंकिंचित्ततिमनुवर्त्ततेतराचरत्रिमनातंधृत्वैवगछतिनतूपे
क्षतेतद्वदित्यर्थः॥२१॥एवमीषद्वशीकृतस्यमनसोऽसनेअस्योपायानाह॥सांख्येनतत्त्वविवेकेनसर्वभावानांमहदादि

धार्यमाणंमनोयर्हिभ्राम्यदाश्वनवस्थितं॥अतंद्रितोनुरोधेनमार्गेणात्मवशंनयेत्॥१९॥मनोगतिंनविसृजेज्जि
तप्राणोजितेंद्रियः॥सत्वसंपन्नयाबुद्ध्यामनआत्मवशंनयेत्॥२०॥एषवैपरमोयोगोमनसःसंग्रहःस्मृतः॥हृदय
ज्ञत्वमन्विछन्दम्यस्येवार्वतोमुहुः॥२१॥सांख्येनसर्वभावानांप्रतिलोमानुलोमतः॥भवाप्ययावनुध्यायेन्मनोया
वत्प्रसीदति॥२२॥निर्विण्णस्यविरक्तस्यपुरुषस्योक्तवेदिनः॥मनस्त्यजतिदौरात्म्यंचिंतितस्यानुचिंतया॥२३॥

देहांतानांअनुलोमतःप्रकृत्यादिक्रमेणभवंप्रतिलोमतःपृथिव्यादिक्रमेणाप्ययंचअन्वनुध्यायेत्॥प्रसीदतिनिश्च
लंभवति॥२२॥ननुपायसहस्रेणापिमनोविषयाकारतांनत्यजति॥किंभूयोभूयोपदेशेनेतिचेत्तत्राह॥निर्वि
ण्णस्येति॥ततश्चागमापायित्वेषुबाधितेषुतापदर्शनात्तद्विवेकापन्नसंसारेनिर्विण्णस्यअतोविरक्तस्यततश्च
उक्तवेदिनःगुरूपदिष्टार्थालोचकस्यततोगुरूपदिष्टस्यैवचिंतितस्यपुनःपुनरनुचिंतयादौरात्म्यंदेहाद्यभिमा
नंत्यजति॥२३॥श्रीदत्तदिगंबरायनमः॥श्रीदत्तात्रेयायनमः॥श्रीकृष्णायपरमात्मनेनमः॥श्री॥७०॥७॥

किंच॥यमादियोगमार्गैः आन्वीक्षिक्या परार्थहृच्छोधनेन॥ममार्चनध्यानादिभिर्वा॥वाशब्दो नास्य पक्षस्य स्वातंत्र्यं दर्शयति॥एतैरुपायैर्योग्यं परमात्मानं मनः स्मरेत्॥नान्यैः अतोऽन्यं न कुर्यात्॥२४॥ननु पापापत्तौ प्रायश्चित्तकार्यमेव तत्राह॥यदीति॥योगेन ज्ञानाभ्यासेनैव॥एतच्च भक्तस्यापि नामकीर्त्तनाद्युपलक्षणार्थं॥नान्यत्कृच्छ्रादि॥२५॥ननु नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वाद्गुणः हिंसादिकं त्वशुद्धिहेतुत्वाद्दोषः॥तत्र च तन्निवर्त्तकत्वात्कृच्छ्रादिप्रायश्चित्तं गुण इति विधिप्रतिषेधाभ्यामुक्तत्वात्॥प्रायश्चित्तं विना योगेनैव कथं पापं दहेत् तत्राह॥स्वे स्व इति सार्द्धेन॥स एव गु

यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया॥ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः॥२४॥यदि कुर्यात् प्रमादेन योगी कर्म विगर्हितं॥योगेनैव दहेदंहो नान्यत्तत्र कदाचन॥२५॥स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्त्तितः॥कर्मणां जात्यशुद्धानामनेन नियमः कृतः॥गुणदोषविधानेन संगानां त्याजनेच्छया॥२६॥

णः नेतरः तदुपपादयति॥यस्माद्विधिप्रतिषेधाभ्यामनेन गुणदोषविधानेन कर्मणां नियमः संकोचः कृतः कुत इत्यत आह॥जात्या उत्पत्त्यैवाशुद्धानां कर्मणां संगं च प्राप्तानां त्याजनेच्छया॥अयं भावः॥पुरुषस्य अशुद्धिर्नाम मनः प्रवृत्तेरन्या नास्ति॥स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात्॥न च सहसा सर्वतो निवृत्तिः कर्तुं शक्यते॥अत इदं कर्त्तव्यमिदमेव कर्त्तव्यमित्येवं स्वाभाविकसंकोचद्वारेण निवृत्तिरेव क्रियते यथा च न प्रवृत्तिपरो वेदः तथोत्तराध्याये वक्ष्यामः॥उत्पत्त्यैव हि कामेष्वित्यादिना॥अतो योगिनः स्वाभाविकप्रवृत्त्यभावान्न प्रायश्चित्तादिविधिगोचरतेति भावः॥२६॥७०॥

भक्त्यधिकारिणो भक्तियोगमाह॥ जातश्रद्ध इति नवभिः॥ मत्कथासु जातश्रद्धः अत एवान्येषु कर्मसु उद्विग्नः॥ ननु तत्फले
षु विरक्तः॥ तत्राह॥ वेदेति॥ यद्यपि वेद तथापि तत्परित्यागेऽनीश्वरः अशक्तः॥२७॥ एवंभूतो यः श्रद्धालुः सत्त्वैयव सर्वं भवि
ष्यतीति दृढनिश्चयः सन्॥ तदनंतरं मां प्रीत्या भजेत्॥ विषयांस्तु सेवमानोऽपि तेषु प्रीतिं न कुर्यादित्याह॥ गर्हयन्निति॥२८
कथं भजेत किं वा ततो भवति तदाह॥ नेति द्वाभ्यां॥ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्त्तनमित्यादिना तत्र तत्रोक्तेन मामां

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु॥ वेद दुःखात्मकान्कामान्परित्यागेऽप्यनीश्वरः॥२७॥ ततो भजेत मां प्री
तः श्रद्धालुर्दृढनिश्चयः॥ जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन्॥२८॥ प्रोक्तेन भक्तियोगेन भजतो मासकृ
न्मुनेः॥ कामा हृदय्या नश्यंति सर्वे मयि हृदि स्थिते॥२९॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य
कर्माणि तस्मिन्दृष्टेऽखिलात्मनि॥३०॥ तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः॥ न ज्ञानं न च वैराग्यं प्रायः श्रे
यो भवेदिह॥३१॥ यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्॥ योगेन दानधर्मेण श्रेयोभिरितरैरपि॥३२॥ छ॰

असकृन्नित्यं भजतः हृदय्याः हृद्गताः कामा नश्यंति॥२९॥ हृदयमेव ग्रंथिरहंकारः तत्सर्वकाश्च सर्वे संशयाः असंभावना
द्यः॥ कर्माण्यनारब्धफलानि संसारहेतुभूतानि॥३०॥ तदेवं व्यवस्थयाधिकारत्रयमुक्तं॥ तत्र च भक्तेरन्यनिरपेक्षत्वा
त्तु अन्यस्य च तत्सापेक्षत्वाद्भक्तियोग एव श्रेष्ठ इति उपसंहरति॥ तस्मादिति त्रिभिः॥ मदात्मनः मयि आत्मा चित्तं यस्य त
स्य श्रेयःसाधनं॥३१॥ तत्र हेतुः॥ यत्कर्मभिरित्यादि इतरैरपि तीर्थयात्राव्रतादिभिः श्रेयःसाधनैर्यद्भाव्यं सत्लभुग्प्राप्तितत्स
वे॥३२॥

अञ्जसा आम्नायासेन स्वर्गमपवर्गं मद्धाम वैकुण्ठं च लभत एव। वाञ्छा तु नास्तीत्युक्तं॥ यदि वाञ्छतीति॥३३॥ तत्र हेतुमाह॥ न किञ्चि
दिति॥ धीराः धीमन्तः यतो मम एकान्तिनः॥ मय्येव प्रीतियुक्ताः अतो मया दत्तमपि न गृह्णन्तीति किं वक्तव्यं न वाञ्छन्तीत्यर्थः॥ अपुन
र्भवं आत्यन्तिकमपि कैवल्यं॥३४॥ तदुपपादयति॥ नैरपेक्ष्यमेव परं उत्कृष्टं अनल्पकं महत्॥ निःश्रेयसं फलं तत्साधनं च प्रा
हुः॥ मे भक्तिः निराशिषः प्रार्थनाशून्यस्य निरपेक्षस्य प्रार्थनाकारणभूतापेक्षारहितस्य पुंसो भवेत्॥ यद्वा मे निरपेक्षस्य

सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा॥ स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छति॥३३॥ न किञ्चित्साधवो धीरा भ
क्ता ह्येकान्तिनो मम॥ वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवं॥३४॥ नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकं॥ त
स्मान्निराशिषो भक्तिर्निरपेक्षस्य जायते॥३५॥ न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः॥ साधूनां सम
चित्तानां बुद्धेः परमुपेयुषां॥३६॥ एवमेतान्मयादिष्टाननुतिष्ठन्ति मे पथः॥ क्षेमं विन्दन्ति मत्स्थानं यद्ब्रह्म पर
मं विदुः॥३७॥ इति श्रीभागवते महापुराणे एकादशस्कन्धे भगवदुद्धवसंवादे विंशतितमोऽध्यायः॥२०॥

या भक्तिः सा निराशिषो भवेदित्यर्थः॥३५॥ अनेन च प्रकारेण सिद्धानां न गुणदोषा इति विरोधपरिहारमुपसंहरति॥
न मयीति॥ गुणदोषैर्विहितप्रतिषिद्धैरुद्भवो येषां ते गुणाः पुण्यपापादयः साधूनां निरस्तरागादीनां॥ अतः समचित्ता
नां॥ अत एव बुद्धेः परमीश्वरं प्राप्तानां॥३६॥ काम्यकर्मनिष्ठान्निन्दित्वान्ते तान्मुक्तिमार्गानुपसंहरति॥ एवमिति॥ मे पथः
मत्प्राप्त्युपायान् ये अनुतिष्ठन्ति क्षेमं कालमायादिरहितं मम लोकं विन्दन्ति॥ यत्परं ब्रह्म तच्च विदुः॥३७॥ इत्येकादशे विंशः॥

जयति स्वपरानंदः परानंदरत्नकेशरी ॥ यत्कृपालवलेशेन श्रीधरः सत्कृतिः कृती ॥ १ ॥ ईक्षिता मिष्ठया संततः क्षमतां मम साहसं मया हि स्वीयबोधाय कृतमेतन्न सर्वतः ॥ २ ॥ एकविंशे क्रियाज्ञानभक्तिष्वनधिकारिणां ॥ कामिनां द्रव्यदेशादिगुणदोषाः प्रपंचिताः ॥ ३ ॥ तदेवं गुणदोषव्यवस्थार्थं योगत्रयमुक्तं ॥ तत्र च ज्ञानभक्तिसिद्धानां न किंचिद्गुणदोषौ ॥ साधकानां तु प्रथमतो निवृत्तकर्मनिष्ठानां यथाशक्ति नित्यनैमित्तिकं कर्म सत्वशोधकं स्यात् गुणः तदकरणं निषिद्धकरणं च तन्मलीमसकरणत्वात् दोषः ॥ तन्निवर्तकत्वाच्च प्रायश्चित्तं गुणः विशुद्धसत्वानां तु ज्ञाननिष्ठानां ज्ञानाभ्यास एव शुद्धिहेतुत्वात् गुणः भक्तिनिष्ठानां तु पुनः श्रवणकीर्तनादिभक्तिरेव गुणः ॥ तद्विरुद्धं सर्वमुभयेषां दोष इत्युक्तं ॥ इदानीं तु न सिद्धा नापि साधकाः किंतु केवलं काम्यकर्मप्रधानास्तेषां सकलगुणदोषान्प्रपंचयिष्यन्नादौ तान्नितिबहिर्मुखान्निंदति ॥ य एतानि

॥ श्रीभगवानुवाच ॥ य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् ॥ क्षुद्रान्कामांश्चलैः प्राणैर्जुषंतः संसरंति ते ॥ १ ॥ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ॥ विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः ॥ २ ॥ शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु ॥ द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ॥ ३ ॥ ७

ति ॥ मत्पथः मदुक्तमार्गान् क्षुद्रान् तुच्छान् ॥ चलैः अस्थिरैः प्राणैः देहवायुभिरिंद्रियैर्वा जुषंतः सेवमाना भवंति ते संसरंति ॥ निखिलगुणदोषभाक्त्वेन नानायोनीः प्राप्नुवंतीत्यर्थः ॥ १ ॥ ननु त एव कर्मभिः केचिद्गुणदोषभाजः केचिन्नेति कुतो वैषम्यं ॥ न ह्यग्निना केचित्तप्यंते केचिन्नेति संभवंति तत्राह ॥ स्वे स्व इति ॥ अधिकारिभेदेन कल्पितौ गुणदोषौ ॥ न वस्तुनिष्ठाविति भावः ॥ २ ॥ तदाह ॥ शुद्ध्यशुद्धी इति ॥ विचिकित्सार्थं योग्यमयोग्यं चेति संदेहद्वारा स्वाभाविकप्रवृत्तिप्रतिबंधार्थमर्थः ॥ तत्र शुद्ध्यशुद्धी योग्यत्वायोग्यत्वे गुणदोषौ निमित्तौ पादेयत्वानुपादेयत्वे ॥ शुभाशुभौ तन्निमित्तावर्थानर्थौ ॥ ३ ॥ ७

तत्र शुध्यशुद्धी धर्मार्थं शुद्धेन धर्मः अशुद्धेनाधर्म इति गुणदोषौ व्यवहारार्थं ॥ अशुद्धावपि राजादीनां व्यवहारदर्शनात् धर्मपादेयं ॥ नान्यदिति ॥ शुभाशुभौ यात्रार्थं प्राणादिरक्षार्थं ॥ दोषत्वेप्यापत्सु शरीरमात्रोपादानेन न पापं ॥ अधिकोपादानेतु पापमिति ॥ मया मन्वादिरूपेण धर्मरूपा धुरं भारं कर्म जडानामियर्थः ॥ ४ ॥ शुध्यशुद्धी प्रपंचयिष्यन् ॥ वेदोक्तत्वेन तदभिनिवेशो माभूदिति समानेष्वपि वस्तुष्वितियदुक्तं तत्प्रपंचयति ॥ भूमीति त्रिभिः ॥ भूतानां प्राणिनां धारयंतीति धातवः कारणानि शरीराः शरीरारंभकाः देहतः साम्यमुक्तं ॥ जीवतोप्याह ॥ आत्मसंयुता इति ॥ ५ ॥ धातुषु देहेषु नाम

धर्मार्थं व्यवहारार्थं यात्रार्थमिति चाऽनघ ॥ दर्शितोयं मयाचारो धर्ममुद्वहतां धुरं ॥ ४ ॥ भूम्यंबग्न्यनिलाकाशा भूतानां पंचधातवः ॥ आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ॥ ५ ॥ वेदेन नामरूपाणि विषमाणि समेष्वपि ॥ धातुषूद्धव कल्प्यंत एतेषां स्वार्थसिद्धये ॥ ६ ॥ देशकालादिभावानां वस्तूनां मम सत्तम ॥ गुणदोषौ विधीयेते नियमार्थं हि कर्मणां ॥ ७ ॥ अकृष्णसारो देशानामब्रह्मण्योऽशुचिर्भवेत् ॥ कृष्णसारोप्यसौवीरकीकटासंस्कृतेरिणं ॥ ८ ॥

रूपाणि वर्णाश्रमादीनि ॥ कल्पनायाः प्रयोजनमाह ॥ एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियमद्वारा धर्मादिपुरुषार्थसिद्धये ॥ ६ ॥ न केवलं देहेष्वेव अपि तु देशकालादिभावानामपि शुद्ध्यादिशब्देनानुपादेयानां फलनिमित्ताधिकारिणां ग्रहणं वस्तूनामुपादेयानां व्रीह्यादीनामपि मम मया नियमार्थं संकोचार्थमित्यर्थः ॥ ७ ॥ एवं गुणदोषविषयं परिशोध्य तयोः शुध्यशुद्धी मूलत्वात् शुध्यशुद्धी प्रपंचयति ॥ अकृष्णसार इति अष्टभिः ॥ देशानां मध्ये कृष्णहरिणरहितो देशोऽशुचिः ॥ तत्रापि अब्रह्मण्यः ब्राह्मणभक्तिशून्योऽसन्नशुचिः ॥ कृष्णसारोपि कृष्णेन मृगेण सारः श्रेष्ठः सोपि असौवीरकीकटः ॥ सुवीराः सत्पुरुषास्तद्धीनः असौवीरः कीकटोपि शुचिः ॥ तदुक्तं ॥ सर्वपुण्यतमो देशः सत्पात्रं यत्र लभ्यत इति ॥ तद्वर्जितोयः कीकट अंगवंगकलिंगादिः असंस्कृतः संमार्जनादिभिः ॥

स्कृतः संमार्जनादिभिर्मृत्स्नः म्लेंछबहुलो वा ईरणं ऊषरमेकवद्भावः ॥ अत्र तु अशुचिः तदन्यः शुचिरिति यथा उक्तं भवति ॥ ८ ॥

कालस्य शुद्ध्यशुद्धी दर्शयति ॥ कर्मण्य इति ॥ द्रव्यतः द्रव्यसंपत्त्या स्वतो वा पूर्वाह्णादिरित्यर्थः ॥ कर्मण्यः कर्मार्हः स कालः तस्मिन्कर्म
निर्गुणवान् । यतः यस्मिन् द्रव्यालाभेन वा राष्ट्रविप्लवादिना वा कर्म निवर्त्तते । यश्च सूतकादौ दशाहादिलक्षणोऽकर्मकः कर्मा
नर्हः स्मृतः स कालो दोषः अशुद्ध इत्यर्थः ॥१९॥ वस्तुतः शब्दोपात्तानां द्रव्याणां शुद्ध्यशुद्धी दर्शयति । द्रव्यस्येति चतुर्भिः ॥ द्रव्येण
तोयादिना शुद्धिः मन्त्रादिना च शुद्धिः ॥ वचनेन शुद्धमशुद्धं चेति संदेहे शुद्धमिदमेवंरूपेण ब्राह्मणवचनेन शुद्धिः ॥ विपरीते
नाशुद्धिः ॥ संस्कारेण प्रोक्षणादिना पुष्पादिः शुचिः अवघ्राणादिनाशुद्धिः ॥ कालेन दशाहादिना नवोदकादेः शुचिः ॥ का
ले मेघोदकं प्रायश्च वर्ज्यं तु अहमेव हि ॥ अकाले दशरात्रं स्यात्ततः शुद्धिर्विधीयते । पर्युषितान्नादेरशुचिः ॥ अंसजाघ्रपह

कर्मण्यो गुणवान्कालो द्रव्यतः स्वत एव वा ॥ यतो निवर्त्तते कर्म सदोषोऽकर्मकः स्मृतः ॥१९ द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येण
वचनेन च ॥ संस्कारेणाथ कालेन महत्त्वाल्पतया तथा ॥२० शक्त्याऽशक्त्याथवा बुद्ध्या समृद्ध्या च यदात्मने ॥ अघं कु
र्वन्ति हि यथा देशावस्थानुसारतः ॥२१॥ छ

तानां तडागादीनां महत्त्वाल्पत्वाभ्यां शुद्ध्यशुद्धी ॥२०॥ शक्त्याशक्त्या सूर्योपरागादिसूतकान्नादेः शक्तानामशुद्धिः ॥ अश
क्तानां तु शुद्धिः बालकवृद्धातुराणां बुद्ध्या पुत्रजन्मादौ दशाहादि ज्ञानेन शुद्धिः अंतर्ज्ञानेन तु अशुद्धिः ॥ समृद्ध्या जीर्णवस्त्रा
देः समृद्धं प्रत्यशुद्धिः दरिद्रं प्रति शुद्धिः ॥ तत्रापि विशेषमाह । यदिति । एते च द्रव्यवचनादयो द्रव्याशुद्धिद्वारा आत्मने यदघं
कुर्वन्ति तद्देशावस्थानुसारत एव यथा यथावत् कुर्वन्ति न सर्वतः ॥ तथा हि निर्भय एव देशे स्नानादिनाशुद्धिं कुर्वन्तु । न तु चौरा
द्याकुले । तथा रोगादिव्यतिरिक्त युवाद्यवस्थायामेव कुर्वन्ति । न सर्वदा बाल्यरोगाद्यवस्थायामिति । तथा च स्मृतिः ॥ देशका
लं तथात्मानं द्रव्यं द्रव्यप्रयोजनं । उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति ॥२१॥ छ ॥

द्रव्यादिभिर्द्रव्यस्यशुद्धिरित्युक्तंतत्रवचनादिशुद्धिरेकरूपैव॥द्रव्यतस्तुशुद्धिबहुरूपेतितांप्रपंचयति॥धान्येति॥दारुलौकिकंग्र हचमसादि॥अस्थिगजदंतादि॥रसास्तैलघृतादयःतैजसाःसुवर्णादयःतेषांपार्थिवानांचरथ्याकर्दमघटेष्टकादीनांय थायथंकालादिभिःशुद्धिःतत्रापिकांस्यजाघ्रूपघाततारतम्येनदेशकालावस्थाद्यनुसारेणैव॥एतैरन्यैश्चयुतायुतैर्मिलि तैःकेवलैश्च॥कालस्यपुनर्ग्रहणंयुतत्वप्रदर्शनार्थं॥२२॥अस्पृश्यस्पर्शेशुद्धिमुक्त्वालेपवित्रोषेप्याह॥अमेध्येति॥यत्पीठपा त्रवस्त्रादियेनतत्क्षणक्षालनक्षाराम्लोदकादिनागंधंचलेपंचव्यपोहतितिसजति॥स्वगतंचमलंयत्काप्रकृतिंस्वरूपंभजते॥

धान्यदार्वस्थितंतूनांरसतैजसचर्मणां॥कालवाय्वग्निमृत्तोयैःपार्थिवानांयुतायुतैः॥२२॥अमेध्यलिप्तंयद्येनगंधलेपं व्यपोहति॥भजतेप्रकृतिंतस्यतच्छौचंतावदिष्यते॥२३॥स्नानंदानंतपोवस्थावीर्यंसंस्कारकर्मभिः॥मत्स्मृत्याचात्मनः शौचंशुद्धःकर्माचरेद्द्विजः॥२४॥मंत्रस्यचपरिज्ञानंकर्मशुद्धिमदर्पणं॥धर्मःसंपद्यतेषड्भिरधर्मस्तुविपर्ययः॥२५॥

तस्यतच्छोधकंशौचं॥यावत्तान्ततत्क्षणादिनाव्यपोहति॥भंजूतौवत्प्रमाणंस्वरूपतश्चावर्त्तितोवातत्कर्त्तव्यमिति॥२३॥एवंतावत् द्रव्यशुद्धिरुक्ताइदानीकर्तृशुद्धिमाह॥स्नानेति॥अवस्थाकौमारादिःवीर्यंशक्तिःसंस्कारःउपनयनादिःकर्मसंध्योपासना दीक्षादिलक्षणं॥आत्मनःसाहंकारस्यकर्त्तुःएतैःस्नानादिभिःयथायथं॥तत्तुकार्यानुसारिणीशुद्धिः॥इयंचशुद्धिःनव्यवहा रार्थाकिंतुविहितकर्मार्थेत्याह॥शुद्धइति॥द्विजइत्युपलक्षणं॥शूद्रादिरपि॥२४॥मंत्रशुद्धिमाह॥सद्गुरुमुखाद्यथावत्परिज्ञानं मंत्रस्यशुद्धिः॥कर्मशुद्धिमाह॥ईश्वरार्पणंकर्मणःशुद्धिः॥धर्माद्यर्थंशुद्ध्यशुद्धीप्रपंचतःप्रदर्श्योपसंहरति॥धर्मइति॥देश कालद्रव्यकर्त्तृमंत्रकर्मभिःषड्भिःधर्मःसंपद्यते॥एतेषांयोविपर्ययःसोऽधर्मः॥तद्धेतुरित्यर्थः॥२५॥७॥

अयंचगुणदोषविभागोनवास्तवइत्याह॥ क्वचिदिति॥ आपदिप्रतिग्रहोगुणोऽन्यनापदिनिषिद्धत्वाद्दोषः॥ परधर्मश्चपरस्यगुणो
पिस्वस्यदोषः दोषोपिकुटुंबत्यागादिर्विरक्तादेर्नदोषः अपितुविधिबलेनगुणः॥ एवंयोयंगुणदोषयोरेकस्मिन्नेवार्थेनियमः॥ गु
णदोषार्थंवायोनियमः नियामकंशास्त्रंसतयोर्भेदमेवबाधते॥१६॥ दोषस्यक्वचिद्दोषत्वाभावेगुणत्वेचोदाहरणंदर्शयति॥ समा
नस्यतस्यैवकर्मणः सुरापानादेराचरणंअपतितानांपतनहेतुरपिजातंस्वकर्मणावापतितानांपुनःपातकमधिकारभ्रंशाकं
नभवति॥ पूर्वमेवपतितत्वात्॥ अतोऽत्रदोषस्यापिदोषतानास्तीत्यर्थः॥ तथासंगोपियायतेदोषःसगृहस्थस्यौत्पत्तिकः॥ पूर्व

क्वचिद्गुणोपिदोषःस्याद्दोषोपिविधिनागुणः॥ गुणदोषार्थनियमस्तद्भिदामेवबाधते॥१६॥ समानकर्माचरणंपतितानां
नपातकं॥ औत्पत्तिकोगुणःसंगोनशयानःपतत्यधः॥१७॥ यतोयतोनिवर्तेतविमुच्येततततस्ततः॥ एषधर्मोनृणां
क्षेमःशोकमोहभयापहः॥१८॥ विषयेषुगुणाध्यासात्पुंसःसंगस्ततोभवेत्॥ संगात्तत्रभवेत्कामःकामादेवकलिर्नृणां
॥१९॥ कलेर्दुर्विषहःक्रोधस्तमस्तमनुवर्तते॥ तमसाग्रस्यतेपुंसश्चेतनाव्यापिनीद्रुतं॥२०॥ तयाविरहितःसाधोजंतुःशून्या
यकल्पते॥ ततोऽस्यस्वार्थविभ्रंशोमूर्छितस्यमृतस्यच॥२१॥

स्वीकृतोनदोषः॥ अपितुगुणः॥ ऋतौभार्यामुपेयादितिविधानात्॥ उभयत्रदृष्टांतः॥ पूर्वमेवाधःशयानोयथानपततीति॥१७॥ अतो
गुणदोषविधानंप्रवृत्तिसंकोचद्वारानिवृत्तावेवतात्पर्यमित्यभिप्रेत्याह॥ यतोयतइति॥१८॥ यथाकृतप्रवृत्तिपरत्वंवेदस्यनिराकर्तुं
प्रवृत्तिमार्गस्यअनर्थहेतुतांदर्शयति॥ विषयेष्वितिचतुर्भिः॥ संगःआसक्तिः तत्रतेषुविषयेषुयेनप्रतिहन्यतेकामःतेनसहका
मादेवकलिःकलहोवादः॥१९॥ दुर्विषहःतीव्रः तमःसंमोहःतंक्रोधंचेतनाकार्याकार्यस्मृतिःद्रुतंशीघ्रं॥२०॥ शून्यायकल्पतेअसत्तु

तात्पर्ये॥ स्वार्थविभ्रंशः॥ [illegible] ॥२१॥

॥भा॰ ए॰॥
॥९०॥

तत्तुल्यत्वंप्रपंचयतिविषयेति॥ यथाब्रह्मजीविकयैवयोजीवन्वर्त्ततेसमर्धितद्तुल्यः॥ अतएवयोभस्त्रेवश्वसन्वर्त्तते॥ समतत्तु
ल्यः॥ अतःस्वार्थनाशउ इत्यर्थः॥२२॥ ननुश्रुतस्यस्वर्गादिफलश्रवणात्कुतःस्वार्थभ्रंशः तत्राह॥ इयंफलश्रुतिःनश्रेयःपरम्
पुरुषार्थपरानभवतीत्यर्थः॥ किंतुबहिर्मुखानांनृणांमोक्षविवक्षयाअवांतरफलैःकर्मसुरुच्युत्पादनमात्रं॥ यथाभैषज्येऔ
षधेरोचनरुच्युत्पादनं॥ तथाहि॥ पिबनिंबंप्रदास्यामिखलुतेखंडलड्डुकान्॥ पित्रैवमुक्तःपिबतिनफलंतावदेववति
॥२३॥ ननुकर्मकांडेऽस्यमोक्षस्यनापिनश्रूयते॥ कुतएवंव्याख्यायते॥ यथाश्रुतस्यतद्घटनादित्याह॥ उत्पत्त्येति द्वा

विषयाभिनिवेशेननात्मानंवेदनापरं॥ ब्रह्मजीवकयाजीवन्स्वार्थंभस्त्रेवयःश्वसन्॥२२॥ फलश्रुतिरियंनृणां
नश्रेयोरोचनंपरं॥ श्रेयोविवक्षयाप्रोक्तंयथाभैषज्यरोचनं॥२३॥ उत्पत्त्यैवहिकामेषुप्राणेषुस्वजनेषुच॥ आसक्त
मनसोमर्त्याआत्मनोऽनर्थहेतुषु॥२४॥ नतानविदुषःस्वार्थंभ्राम्यतोवृजिनाध्वनि॥ कथंयुंज्यात्पुनस्तेषुतांस्तमोवि
शतोबुधः॥२५॥ छ

भ्यां॥ उत्पत्त्यास्वभावतएवकामेषुपश्वादिषुप्राणेषुआयुरिंद्रियबलवीर्यादिषुस्वजनेषुपुत्रादिषुअनर्थहेतुषुपरिपाकतोदुःख
हेतुषु॥२४॥ अतस्तान्स्वार्थंस्वापरमसुखमविदुषःअतोनतान्प्रकीभूतान्वेदोयदाचापिब्यातितदेवश्रेयइतिविश्वसिता
नित्यर्थः॥ तानेवभूतान्वृजिध्वनिकामवर्त्मनिदेवादियोनिषुभ्राम्यतःततःपुनस्तमःवृक्षादियोनिंविशतःपशु
कामइतिआयुरिंद्रियादिकामइतिचपुत्रादिकामइतिच॥ कथंपुनस्तेष्वेवकामेषुस्वयंबुधोवेदोयुंज्यात्प्रव
र्त्तयेत्तथासत्यनाप्तःस्यादितिभावः॥२५॥ श्रीदत्तदिगंबरायनमः॥श्री॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॰॥

॥राम॰॥
॥९०॥

तर्हि केचित्कर्ममीमांसकाः फलपरतां वदंति तत्राह। एवमिति॥ व्यवसितं वेदस्याभिप्रायं कुसुमितां मवांतरफलैः प्ररोचनतया रम
णीयां परमफलश्रुतिं वदंति। कुतस्ते कुबुद्धयस्तदाह। हि यस्माद्वेदज्ञा व्यासादयस्तथा न वदंतीति॥२६॥ कुबुद्धितां प्रपंचयति॥
कामिन इत्यष्टभिः॥ कामित्वात्कृपणाः ततो लुब्धाः तृष्णाकुलाः अतः पुष्पेष्ववांतरफलेषु परमफलबुद्धयः अत एवाऽग्निमुग्धाः
अग्निसाध्यकर्माभिनिवेशेन लुप्तविवेकाः ततश्च धूमतांताः धूममार्गोऽतेयेषां ते स्वलोकमात्मतत्वं तथा च श्रुतिः॥ कश्चि
द्वावुत्सस्माल्लोकात्प्रेत्यात्मानं वेद अयमहमस्मीति कश्चित्स्वलोकं न प्रतिजानाति अग्निमुग्धो हैव धूमतांत इति॥२७॥
कोसौ स्वलोकस्तमाह। हृदिस्थमात्मानं मां स्वलोकं॥ ननु हृदिस्थमहंकारास्पदं जानंत्येव सत्यं परमात्मानं तु न जानंतीत्या
ह। य इदं यद्व्यतिरिक्तं जगन्नास्ति॥ कुतः यतश्चोत्पद्यते यतः इदं जगज्जातं तं। कुतो न जानंति। हि यस्मात् उक्थं कर्मैव शस्त्रा

एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः॥ फलश्रुतिं कुसुमितां न वेदज्ञा वदंति हि॥२६॥ कामिनः कृपणा लुब्धाः पुष्पेषु
फलबुद्धयः॥ अग्निमुग्धा धूमतांताः स्वं लोकं न विंदंति ते॥२७॥ न ते मामंग जानंति हृदिस्थं य इदं यतः॥ उक्थशस्त्रा ह्य
सुतृपो यथा नीहारचक्षुषः॥२८॥ ते मे मतमविज्ञाय परोक्षं विषयात्मकाः॥ हिंसायां यदि रागः स्याद्यज्ञ एव न चोदना॥२९॥

शस्त्रं शंसनीयं येषां पशुहिंसासाधनं वा येषां ते॥ अतः केवलं असुतृपः प्राणतर्पणपराः नीहारं तमः तेन व्याप्तानि चक्षूंषि येषां
ते। यथा संनिहितमपि न जानंति तद्वत्। तथा च श्रुतिः॥ न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव। नीहारेण प्रावृता ज
ल्प्या चासुतृप उक्थशासश्चरंतीति॥२८॥ वेदतात्पर्याज्ञानाद्ध्यान्यज्जंतीत्याह। ते मेति। ते परोक्षमस्फुटं मे मतमविज्ञाय
देवान्यजंते इत्युत्तरेणान्वयः॥ स्वमतमेवाह। हिंसायां मांसभक्षणार्थं न तत्फलार्थं च यदि रागः स्यात्तर्हि यज्ञ एव सन्न्यनुज्ञात
तद्वारा परिसंख्येयं न त्वावश्यकत्वेन चोदनेत्येवंरूपं। यद्यपि नित्यनैमित्तिकयोः कामविशेषानुबंधो नास्ति। तथापि कर्मणा पि
तृलोक इति श्रुतेः॥ सामान्यतः पितृलोककामनाऽस्त्येव अंतःकरणशुद्धिकामना चेति भावः॥ तदुक्तं॥ न कामस्य क्रिया काचि

तद्व्यतेन केचिद्विमत्ता। यथा कुसुमितं ग्रंथकुसुमिता
कामस्य चलितामिति॥२४॥

अत्रत्यादेवहिंसयाविहारः क्रीयाएषांते ॥ ३० ॥ किंच ॥ तेइतिमंदबुद्धयइत्याह ॥ स्वप्नोपममिति ॥ अमुंपरलोकंआशिषस्वाश्मि
न्लोकेसंकल्प्यनबुनिश्चित्यविघ्नबाहुल्यात् ॥ सजंतिकर्मसुविनियोजयंति ॥ यथाकश्चिद्वणिकुदुस्तरसमुद्रादिलंघनेनव
हुधनार्जनेछयास्तिद्धनेसजनदुभयभ्रष्टोभवतितद्वदित्यर्थः ॥ ३१ ॥ अतोरजःसत्वतमोनिष्ठास्तेरजःसत्वतमोजुषःस्वानु
रूपानिंद्रादीनेवोपासते ॥ नतुमां ॥ यद्यपींद्रादिनामहंत्रादान्मदुपासनमेवतत् ॥ तथापियथावन्नोपासते ॥ भेददर्शित्वा
दित्यर्थः ॥ ३२ ॥ हृदिसंकल्प्येसुकृतमेवसंकल्पंदर्शयति ॥ इष्ट्वेति ॥ तस्यभोगस्यांतेमहाशालाःमहागृहस्थाः ॥ ३३ ॥ ततःकि
मित्यतआह ॥ एवमिति ॥ अतोमत्प्रवणत्वाभावान्निसंसारिणोभवंतीतिभावः ॥ ३४ ॥ तदेवंदेवानांप्रवृत्तिपरत्वंनिरा

हिंसाविहारात्वालब्धैःपशुभिःस्वसुखेछया ॥ यजंतेदेवतायज्ञैःपितृभूतपतीन्खलाः ॥ ३० ॥ स्वप्नोपमममुंलोकम
सतंश्रवणप्रियं ॥ आशिषोहृदिसंकल्प्यसजंत्यर्थान्यथावणिक् ॥ ३१ ॥ रजःसत्वतमोनिष्ठारजःसत्वतमोजुषः
उपासतइंद्रमुख्यान्देवादीन्नतथैवमां ॥ ३२ ॥ इष्ट्वेहदेवतायज्ञैर्गत्वारंस्यामहेदिवि ॥ तस्यांतइहभूयास्ममहाशा
लामहाकुलाः ॥ ३३ ॥ एवंपुष्पितयावाचाव्याक्षिप्तमनसान्नृणां ॥ मानिनांचातिस्तब्धानांमद्वार्त्तापिनरोचते ॥ ३४ ॥ वेदा
ब्रह्मात्मविषयास्त्रिकांडविषयाइमे ॥ परोक्षवादाऋषयःपरोक्षंममचप्रियं ॥ ३५ ॥

कृत्यप्रकृतंनिवृत्तिपरत्वमेवोपसंहरति ॥ वेदाइतिकर्मब्रह्मदेवताकांडविषयाइमेवेदाः ब्रह्मात्मविषयाः ब्रह्मैवात्मानसं
सारीत्येतत्पराः ॥ तत्परत्वाप्रतीतौचफलश्रुतिरियंनृणांनश्रेयोरोचनंपरं ॥ श्रेयोविवक्षयाप्रोक्तंयथाभैषज्यरोचनमि
त्युक्तमेव ॥ कारणमनुस्मारयति ॥ परोक्षेति ॥ परोक्षवादाः अतींद्रियार्थप्रतिपादनपराः ऋषयोमंत्राःतत्द्रष्टारोवा ॥
ततःकिमिति ॥ यतःपरोक्षंममचप्रियं ॥ अयंभावः ॥ शुद्धांतःकरणैरेवैतद्बोद्धव्यंनान्यैरनधिकारिभिः ॥ इत्याकर्मत्यागेन
मंत्राप्रसंगादिति ॥ ३५ ॥

ननुवेदज्ञाअपिजैमिन्यादयःकिमितित्वांनवर्णयंति॥मांविनातत्वतोवेदंवेदतात्पर्यंवानकोपिवेदेत्याशयेनाह॥शब्दब्रह्मेति
यावत्समाप्ति॥स्वरूपतोऽर्थतश्चदुर्विज्ञेयं॥तच्चसूक्ष्मंस्थूलंचेतिद्विविधं॥तत्रसूक्ष्मंतावत्स्वरूपतोपिदुर्ज्ञेयमित्याह॥
प्राणेंद्रियमनोमयं॥प्रथमंप्राणमयंपराख्यं॥ततोमनोमयंपश्यंत्याख्यं॥ततइंद्रियमयंमध्यमाख्यंतस्यवाग्
व्यंजकत्वेनवागिंद्रियप्रधानत्वात्॥किंचअनंतपारं॥समष्टिप्राणादिमयस्यनिर्विशेषस्यचतस्यकालतोदे
शतश्चापरिच्छेदात्॥अर्थतोपिदुर्ज्ञेयत्वमाह॥गंभीरंनिगूढार्थंअतोदुर्विगाह्यंमतिप्रवेशानर्हं॥तथाचश्रुतिः॥
चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः॥गुहात्रीणिनिहितानिनेंगयंतितुरीयंवाचोमनुष्या

शब्दब्रह्मसुदुर्बोधंप्राणेंद्रियमनोमयं॥अनंतपारंगंभीरंदुर्विगाह्यंसमुद्रवत्॥२६॥छ॥
मयोपबृंहितंभूम्नाब्रह्मणानंतशक्तिना॥भूतेषुघोषरूपेणबिसेषूर्णेवलक्ष्यते॥२७॥छ॥

वदंतीति॥अयमर्थः॥वाचःशब्दब्रह्मणःपरिमितानिगणितानिपद्यंतेज्ञायंतेपरंतत्वंयैस्तानिपदानिरूपाणिचत्वा
रि॥तानिचार्यपियेमनीषिणोऽतद्रहस्यःतेविदुःनान्ये॥यतोगुहायांदेहमध्येत्रीणिनिहितानिनेंगयंतिस्वरूपंनप्रका
शयंति॥यतःकेवलंवाचःतुरीयंचचतुर्थंभागंवैखरीरूपंमनुष्याःप्राणिनोवदंति॥तमपिवदंत्येवनतुतत्वतोजानंति॥ ३
तत्रमनीषिभिरेवज्ञेयंसूक्ष्मंरूपंदर्शयति॥मयेति॥मयांतर्यामिणापबृंहितंअधिष्ठितं॥अंतस्यत्वेपिअपरिच्छेदमा
ह॥भूम्नेति॥भूम्नाअद्वितीयेन॥अधिष्ठातृत्वेप्यविकारित्वमाह॥ब्रह्मणेति॥अविकृतस्यापिनियंतृत्वंघटयति॥अ
नंतशक्तिनेति॥भूतेषुसर्वप्राणिषुघोषरूपेणलक्ष्यतेमनीषिभिः॥अंतःसूक्ष्मत्वेनदर्शनेदृष्टांतः॥बिसेषूर्णांतंतु

भा०टी०॥११॥

तयोवैखर्याख्यब्रह्मणः वाच उत्पत्तिप्रकारं सदृष्टांतमाह॥ यथेति त्रिभिः॥ हृदयात्स्वकाशात् मुखात्छिद्रात् उद्वमते बहिः प्रक
टयति॥ दार्ष्टांतिके दर्शयति॥ आकाशादिति॥ प्राणः तदुपाधिर्हिरण्यगर्भरूपः प्रभुः भगवान् तेन रूपेण॥ ३८॥ छंदो
मयो वेदमूर्तिः॥ स्वतस्त्वमृतमयः॥ घोषवान् नादोपादानवान्॥ मनसा निमित्तभूतेन॥ निमित्ततां दर्शयति॥ स्पर्शादि
वर्गान् रूपयति संकल्पयतीति स्पर्शरूपि तेन॥ स्पर्शग्रहणमुपलक्षणं॥ हृदयाकाशात् बृहतीं सृजतीति तृतीयश्लोकेना
न्वयः॥ बृहतीशब्दार्थव्याख्यानाय विशेषणानि॥ सहस्रपदवीं बहुमार्गां अनेकपुरुषार्थसाधनवतीं॥ तदेवाह॥ ओं

यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात्॥ आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा॥ ३८॥
छंदोमयोऽमृतमयः सहस्रपदवीं प्रभुः॥ ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषितां॥ ३९॥
विचित्रभाषाविततां छंदोभिश्चतुरुत्तरैः॥ अनंतपारां बृहतीं सृजत्याक्षिपते स्वयं॥ ४०॥ छ

काराद्व्यंजितस्पर्शस्वरोष्मांतःस्थैः उरकंठादिसंगेन व्यंजितैः स्पर्शादिभिर्भूषितां छंदोभिः ओंकारश्चात्र हृदृतः सूक्ष्मो
ऽभिप्रेतः॥ नत्वकारादिरोवर्णरूपः तस्य व्यंगकोटित्वात्॥ तत्र स्पर्शाः कादिपंचवर्गाः स्वराः अकारादयः षोडश॥ ऊ
ष्माणः शषसहाः अंतस्था यरलवाः॥ ३९॥ विचित्राभिर्वैदिकलौकिकभाषाभिर्विततां॥ यथोत्तरं चत्वारि चत्वार्यक्ष
राणि उत्तराणि अधिकानि येषां तैः छंदोभिरुपलक्षितां॥ एवमनंतपारां सृजति॥ स्वयमेवाक्षिपते उपसंहरति॥
४०॥ श्रीदत्तात्रेयायनमः॥ श्रीदिगंबरायनमः॥ श्रीरामकृष्णायपरमात्मनेनमः॥ श्री०॥ छ॥ छ॥ छ॥ छ॥ छ॥

तेषुकतिचित्छंदांसिदर्शयति॥गायत्रीति॥तत्रचतुर्विंशत्यक्षरागायत्री॥ततश्चतुरक्षरवृद्ध्योष्णिगादिछंदांसि॥अत्यष्टिश्च
तिजगती॥अतिविराट्चेत्यर्थः॥एतैश्छंदोभिरुपलक्षितामितिपूर्वेणैवान्वयः॥अतीवदुरूपस्यापिसाकल्येनस्वरूपतोदुर्ज्ञेयत्वमु
क्तं॥४१॥अर्थतोपिदुर्ज्ञेयत्वमाह॥किमिति॥कर्मकांडेविधिवाक्यैःकिंविधत्ते॥देवताकांडेमंत्रवाक्यैःकिमाचष्टेप्रकाश
यति॥ज्ञानकांडेकिमनूद्यविकल्पयेत्॥निषेधार्थमितियेवमस्याहृदयंतात्पर्यं॥मत्तःअन्योऽन्यःकश्चिदपिनवेद॥ननुतर्हि
त्वमत्स्वरूपयाकथय॥ओमितिकथयति॥मामेवयज्ञरूपंविधत्ते॥मामेवतत्तद्देवतारूपमभिधत्ते॥नमत्तःपृथक्॥यच्चा

गायत्र्युष्णिगनुष्टुप्चबृहतीपंक्तिरेवच॥त्रिष्टुब्जगत्यतिछंदोह्यत्यष्ट्यतिजगद्विराट्॥४१॥ किंविधत्तेकिमाच
चष्टेकिमनूद्यविकल्पयेत्॥इत्यस्याहृदयंलोकेनान्योमद्वेदकश्चन॥४२॥मांविधत्तेऽभिधत्तेमांविकल्प्यापोह्यते
ह्यहं॥४३॥एतावान्सर्ववेदार्थःशब्दआस्थायमांभिदां॥मायामात्रमनूद्यांतेप्रतिषिध्यप्रसीदति॥४३॥इतिश्रीभागव
तेमहापुराणेएकादशस्कंधेएकविंशोध्यायः॥२१॥छ

काशादिप्रपंचजातं॥तस्माद्वाएतस्मादात्मनःआकाशःसंभूतःइत्यादिनाविकल्प्यापोह्यतेयत्॥तदप्यहमेव॥नमत्तः
पृथगस्ति॥४२॥कुतइत्यपेक्षायांसर्ववेदार्थंसंक्षेपतःकथयति॥एतावानेवसर्वेषांवेदानामर्थः॥तमेवाह॥शब्दोवे
दःमांपरमार्थरूपमाश्रित्यभिदांमायामात्रमित्यनूद्यनेहनानास्तिकिंचनेतिप्रतिषिध्यप्रसीदतिनिवृत्तव्यापारोभ
वति॥अयंभावः॥यथांकुरयोरस्तःसएवतद्विस्ताररूपतासुनानाकांडशाखास्वपितथैवप्रणवस्ययोऽर्थःपरमेश्वरःसएव
तद्विस्तारभूतानांसर्ववेदकांडशाखानामपिसंगच्छतेनान्यइति॥४३॥नित्यमुक्तःस्वतःसर्ववेदकृत्सर्ववेदवित्॥स्वपर

ष्टाविंशतितत्त्वसंख्यानामविरोधविधोच्यते॥ पुंप्रकृत्योर्विवेकश्च जन्मभ्रमकवधाद्यपि च॥१॥ तदेवं वेदानां प्रकृतिपरत्वं नि
राकृत्य मोक्षपरत्वं निर्णीतं॥ संति च मोक्षपरत्वेऽपि तत्त्वतारतम्याद्विवादाः॥ तथाहि॥ केचित्तु तत्त्वसंख्यासु विवदं
ते तत्रापि च बाह्यार्थसदसत्त्वे आत्मतत्त्वेऽप्येकत्वनानात्वादिषु तत्र किं सत्यमिति जिज्ञासयाऽऽपृच्छति॥ कतीति॥ ऋषि
भिरागमेषु बहुधा संख्यातानि तेषु कति युक्तानीत्यर्थः॥ भगवन्मतानुवादपूर्वकं बहुधा संख्यानं प्रपंचयति॥ नवे॰

॥उद्धव उवाच॥ कति तत्त्वानि विश्वेश संख्यातान्यृषिभिः प्रभो॥ नवैकादश पंच त्रीण्यात्थ त्वमिह शुश्रुम॥
केचित्षड्विंशतिं प्राहुरपरे पंचविंशतिं॥१॥ सप्तैके नव षट् केचिच्चत्वार्येकादशापरे॥ केचित्सप्तदश प्राहुः
षोडशैके त्रयोदश॥२॥ एतावत्त्वं हि संख्यानामृषयो यद्विवक्षया॥ गायंति पृथगायुष्मन्निदं नो वक्तुमर्हसि
॥३॥ श्रीभगवानुवाच॥ युक्तं तत्संति सर्वत्र भाषंते ब्राह्मणा यथा॥ मायां मदीयामुद्गृह्य वदतां किं नु दुर्घटं॥४॥

तिसृभिः॥ त्वं तावदष्टाविंशतितत्त्वान्यात्थ तानि च वयं शुश्रुम श्रुतवंतः॥१॥२॥ एतावतीनां भावः एतावत्त्वमित्यर्थः॥ यद्विव
क्षया यत्प्रयोजनमभिप्रेत्य गायंति॥ आयुष्मन्निति संमूर्त्तौ॥३॥ विवक्षाभेदेन सर्वं युक्तमेव॥ मायया च किं नाम न युक्त
मित्याह॥ युक्तमिति॥ यथा ब्राह्मणाः भाषंते तथोक्तं न च वस्तुतः॥ यस्मात्संति सर्वभूतांतर्भूतानि सर्वाणि तत्त्वानि॥
किंच॥ मायामिति॥ असत्त्वेऽपि मायाश्रयत्वात्तद्युक्तमिति॥ यथा ब्राह्मणाः भाषंते तथैव तद्घटत एवेत्यर्थः॥ उद्गृह्य स्वी
कृत्य न हि मरीचिजलपरिमाणादिविवादे किंचिद्घटितमिव भवति॥४॥ श्रीदत्तात्रयायनमः॥ ७॥ ७॥ ७॥

ननु यदि सर्वं युक्तं कुतो विवादः॥ यश्चिन्मायैवावलंबनं कुतो हेतुं प्रतिवादः तत्राह॥ नैतदिति॥ हेतुं प्रतिज्ञां च विवदमानानां मदीयाः दुर
तिक्रमाः शक्तयः सत्त्वाद्या अंतःकरणवृत्तिविशेषेण परिणता एव हेतुरित्यर्थः॥५॥ तासां विवादहेतुत्वमुपपादयति॥ यासा
मिति॥ यासां व्यतिकरात्क्षोभाद्वदतां परं विषयः विकल्पो भेद आसीत्॥ अंतःकरणवृत्तिविकल्पो वा तन्मूलभूतः॥ एतदेव व्य
तिरेकेण द्रढयति॥ शमदमयोरैक्यं॥ तस्मिन्प्राप्ते विकल्पोऽप्येति लीयते॥ तं च विकल्पमनुवादः शाम्यतीति॥६॥ संतीति सर्वत्र
तियदुक्तं तत्प्रपंचयति॥ परस्परेति द्वाभ्यां॥ अन्योन्यस्मिन्ननुप्रवेशाद्वक्तुर्विवक्षितं तथा पूर्वं कारणं अपरं कार्यं॥ कार्यकार

नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा॥ एवं विवदतां हेतुं शक्तयो मे दुरत्यया॥५॥ यासां व्यतिकरादासीद्विकल्पो वद
तां पदं॥ प्राप्ते शमदमेऽप्येति वादस्तमनु शाम्यति॥६॥ परस्परानुप्रवेशात्तत्त्वानां पुरुषर्षभ॥ पौर्वापर्यप्रसंख्यानं य
थावक्तुर्विवक्षितं॥७॥ एकस्मिन्नपि दृश्यंते प्रविष्टानीतराणि च॥ पूर्वस्मिन्वा परस्मिन्वा तत्त्वे तत्त्वानि सर्वशः॥८॥
पौर्वापर्यमितोऽमीषां प्रसंख्यानमभीप्सतां॥ यथा विविक्तं यद्वक्त्रं गृह्णीमो युक्तिसंभवात्॥९॥ छ

णभावेन प्रसंख्यानं भवति॥ यद्वा पूर्वा अल्पासंख्या अपरा अधिकसंख्या तयोर्भावः पौर्वापर्यं॥ तेन प्रसंख्यानं गणनमि
ति॥७॥ अनुप्रवेशं दर्शयति॥ एकस्मिन्नपीति॥ पूर्वस्मिन्कारणभूते तत्त्वे कार्यतत्त्वानि सूक्ष्मरूपेण प्रविष्टानि मृदि घट
वत्॥ अपरस्मिन्कार्यतत्त्वे कारणतत्त्वान्यनुगतत्वेन प्रविष्टानि॥ घटे मृद्वत्॥८॥ अविरोधमुपसंहरति॥ अतः अमीषां त
त्त्वानां पौर्वापर्यं तत्कारणकार्यत्वं प्रसंख्यानं च न्यूनाधिकमभीप्सतां वादिनां मध्ये यथा यथा घटेत तथा तथा विव
क्षयाय द्वक्त्रं यस्य मुखं प्रवर्त्तते तत्तत्सर्वं विविक्तं निश्चितं वयं गृह्णीमः उक्तन्यायेन सर्वत्र युक्तेः संभवात्॥९॥ छ॥ ९॥

ननुकार्यकारणतत्वानांपृथक्त्वापृथक्त्वविवक्षयाभवतुनामसंख्याभेदः।।जीवेश्वरयोस्तुकथंभेदाभेदविवक्षया।।यथाषड्विं
शतिपंचविंशतिपक्षौप्रवृत्तौअतआह।।अनादीति।।स्वतोनसंभवति।।अन्यतस्तुसंभवात्स्वतःसर्वज्ञःपरमेश्वरोन्यो
भवितव्यइतिषड्विंशतिपक्षाभिप्रायइत्यर्थः।।१०।।कथंतर्हिपंचविंशतिपक्षस्तत्राह।।पुरुषेति।।वैलक्षण्यंविसदृशत्वंना
स्ति।।द्वयोरपिचिद्रूपत्वात्।।अतस्तयोरत्यंतमन्यत्वकल्पनाअपार्था।।व्यर्थाएवंपंचविंशतिपक्षप्रवृत्तिरित्यर्थः।।नचै
वमपीश्वरप्रसादलभ्यज्ञानस्यपृथक्त्वात्पक्षद्वयमपिनघटते।।ज्ञानंचेति।।सत्वगुणवृत्तित्वात्तदंतर्भूतमित्यर्थः।।११

अनाद्यविद्यायुक्तस्यपुरुषस्यात्मवेदनं।।स्वतोनसंभवादन्यस्तत्वज्ञोज्ञानदोभवेत्।।१०।।पुरुषेश्वरयोरत्रनवै
लक्षण्यएवपि।।तदन्यकल्पनापार्थाज्ञानंचप्रकृतेर्गुणः।।११।।प्रकृतिर्गुणसाम्यंवैप्रकृतेर्नात्मनोगुणाः।।सत्वंरजस्त
मइतिस्थित्युत्पत्त्यंतहेतवः।।१२।।सत्वंज्ञानंरजःकर्मतमोज्ञानमिहोच्यते।।गुणव्यतिकरःकालःस्वभावःसूत्रमेवच।।
।।१३।।

ननुज्ञानंजीवधर्मःकथंप्रकृतेर्गुणःस्यात्तत्राह।।प्रकृतिरिति।।गुणसाम्यंहिप्रकृतिःअतस्तद्विशेषरूपाःगुणास्तस्याएव
नत्वात्मनोजीवस्य।।अकर्तृत्वात्तस्यस्थित्यादिहेतुभूतगुणाश्रयत्वानुपपत्तेः।।१२।।अतःसत्वंसत्वमयंज्ञानंचप्रकृतेर्गु
णःइतिपूर्वेणैवसंबंधः।।ननुतर्हिवर्यकर्मचाज्ञानंचतत्वांतरंस्यात्तत्ररजःकर्मरजसोवृत्तिःअज्ञानंतमसः।।अतःक
र्मज्ञानयोरजस्तमोद्वाराप्रकृतावेवांतर्भावइतिभावः।।तथापिकालस्वभावयोस्तत्वांतरतास्यात्।।नगुणानांव्यतिकरोय
स्मात्सईश्वरएवकालोनामस्वभावोनाम।।सूत्रंमहत्तत्वमेव।।तस्यसर्वशक्तिमत्वात्।।तदेवंज्ञानादीनांयथायथमंतर्भा
वानपक्षद्वयेतत्वबहुत्वएतत्रपक्षांतरेष्वपिज्ञेयं।।स्वमतेतुगुणानामागमापायित्वात्प्रकृतेर्भेदोविवक्षितः।।अतोगुणास्त्री

स्थितयात्मिकपराणिपंचविंशतितत्वानि।।६३।।

पूर्वोक्तपक्षद्वयसाधारणानि दर्शयति ॥ पुरुष इति सार्द्धाभ्यां ॥ व्यक्तं महत्तत्त्वं नभआदीनि पंचतन्मात्राणि मे मया ॥ २४ ॥ एकादशादर्शयति ॥ श्रोत्रमिति ॥ दर्शनं चक्षुः स्तानं शक्तयः ॥ ज्ञानेंद्रियाणि पंच ॥ वागादिपाय्वंतानि द्वंद्वैक्येनोक्तानि चत्वारि अंघ्रिश्चेति कर्माणि कर्मेंद्रियाणि पंच ॥ उभयं उभयात्मकं मनः ॥ अंग हे उद्धव ॥ एवमेतान्येकादश ॥ २५ ॥ पंच दर्शयति ॥ शब्द इति ॥ शब्दादीनि विषयतया परिणतानि पंच महाभूतानि ॥ ननु गत्यादिभिस्तत्त्वाधिक्यं पक्षत्रयेपि स्यात् तत्राह ॥ गतीति ॥ गतिश्च उक्तिश्च उत्सर्गोश्च शिल्पं च तानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि ॥ न तत्त्वांतराणीत्यर्थः ॥ २६ ॥ तदेवं मत

पुरुषः प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः ॥ ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव ॥ २४ ॥ श्रोत्रं त्वग्दर्शनं घ्राणो जिह्वेति ज्ञानशक्तयः ॥ वाक्पाण्युपस्थपाय्वंघ्रिः कर्माण्यंगोभयं मनः ॥ २५ ॥ शब्दः स्पर्शो रसो गंधो रूपं चेत्यर्थजातयः ॥ गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥ २६ ॥ सर्गादौ प्रकृतिर्ह्यस्य कार्यकारणरूपिणी ॥ सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते ॥ २७ ॥ व्यक्तादयो विकुर्वाणा धातवः पुरुषेक्षया ॥ लब्धवीर्याः सृजंत्यंडं संहताः प्रकृतेर्बलात् ॥ २८ ॥

त्रयेपि तत्त्वसंख्याभेदं निरूप्य यद्विवक्षया गायंतीति यत्पृष्टं तत्तन्मततात्पर्यं दर्शयति ॥ सर्गादाविति ॥ कार्याणि षोडशविकाराः कारणानि महदादीनि सप्त तद्रूपिणी सती प्रकृतिः अस्य विश्वस्य सर्गादौ गुणैः सत्त्वाद्यवस्थां धत्ते ॥ उपादानकारणरूपत्वात् ॥ पुरुषस्त्वव्यक्तः ॥ अपरिणामी निमित्तभूतः केवलमीक्षते ॥ अतः परिणामिन्याः प्रकृतेः पुरुषो भिन्न इति ॥ २७ ॥ तत्त्वैरारब्धस्य कार्यस्य तदंतर्भावमभिप्रेत्याह ॥ व्यक्तादय इति ॥ व्यक्तादयो महदादयः प्रकृतेरुत्पन्ना ये धातवस्ते विकुर्वा

णाः पुरुषेक्षया लब्धवीर्याः संहताः अंडं कार्यं सृजंतीत्यन्वयः ॥ प्रकृतेर्बलात्तामाश्रित्येत्यर्थः ॥ २८ ॥

॥भा॰ ए॰॥
॥६५॥

एवं स्वमतमुपसंहृत्य मतांतरेष्वपि सामान्यतो निरूपितां घटनां विशेषतः सतात्पर्यां दर्शयति॥ सप्तैवेति॥ ज्ञानं जानातीति ज्ञ
श्च जीवः॥ उभयोर्ज्ञज्ञेययोराधार आत्मा चेति सप्त॥ तत्र प्रकृत्यादीनां कारणत्वेन खादिष्वंतर्भावः॥ उत्तरेषामंतर्भावार्थ
माह॥ ततः तेभ्यः सप्तभ्यः देहेंद्रियासवः कार्याणि जायंते॥१९॥ षडिति मतेपि भौतिकस्य भूतांतर्भावं जीवस्य च परमात्मांत
र्भावमाह॥ तैर्युक्त इति॥२०॥ अन्नं पृथिवी॥ आत्मनो जातानि॥ आत्मना सह चत्वारि तत्वानि॥ अंतर्भावार्थमाह॥ तैरिति

सप्तैव धातव इति तत्रार्थाः पंच खादयः॥ ज्ञानमात्मोभयाधारस्ततो देहेंद्रियासवः॥१९॥ षडित्यत्रापि भूतानि पंच ष
ष्ठः परः पुमान्॥ तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत्॥२०॥ चत्वार्येवेति तत्रापि तेज आपोन्नमात्मनः॥ जा
तानि तैरिदं जातं जन्मावयविनः खलु॥२१॥ संख्याने सप्तदशके भूतमात्रेंद्रियाणि च॥ पंच पंचैकमनसा आत्मा स
प्तदशः स्मृतः॥२२॥ तद्वत्षोडशसंख्याने आत्मैव मन उच्यते॥ भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश॥२३॥ एकादशत्व
मात्मासौ महाभूतेंद्रियाणि च॥ अष्टप्रकृतयश्चैव पुरुषश्चेति नवेत्यथ॥२४॥ इति नानाप्रसंख्यानं तत्वानामृषिभिः कृ
तं॥ सर्वं न्याय्यं युक्तिमत्त्वाद्विदुषां किमशोभनं॥२५॥७

अवयविनः कार्यस्य॥२१॥ भूतानि च मात्राणि च इंद्रियाणि च पंच पंच एकेन मनसा सह आत्मा सप्तदश॥२२॥ आत्मैव सं
कल्पयन् मन उच्यते॥ त्रयोदशपक्षे भूतानि तन्मात्रैरेकीकृतानि पंचैव॥ इंद्रियाणि च तत्तत्काशकानि पंचैव मनश्चै
कमिंद्रियाधिष्ठातृ आत्मा च द्विविधः एवं त्रयोदश॥२३॥ एकादशपक्षे पंचमहाभूतानि पंचेंद्रियाणि जीवमनसोरा
त्मांतर्भावेन तान्येवैकादश॥ नवपक्षे अष्टप्रकृतयः पुरुषश्च विकाराणामंतर्भावः॥२४॥ उपसंहरति॥ इतीति॥ इति
एभिः प्रकारैः प्रकृतिपुरुषभेदज्ञापनायेत्यर्थः॥२५॥७॥

॥राम॰॥
६५

तत्प्रपंचयति।।प्रकृतिरिति।।आत्मनाजडाजडस्वभावेनविलक्षणौ।।अन्योन्यापाश्रयात्परस्परपरिहारेणाप्रतीतेरित्यर्थः।।२६
तदेवव्यनक्ति।।प्रकृतौयत्कार्यदेहप्रकृतिश्चात्मनितेनविनातस्याःअप्रतीतेः।।अहमित्यभेदप्रतीतेर्नदेहात्मनोर्भेदोलक्ष्य
तइत्यर्थः।।हृदिवर्त्तमानंसंशयंनयेनयुक्त्यानैपुण्यंप्राविण्यंयेषांते।।२७।।अर्हसीत्युक्तंतत्रहेतुमाह।।हियस्मात्त्वत्तःत्व
त्प्रसादाद्देवाज्ञानां।।प्रमोषःभ्रंशस्त्वतश्शक्तितःमायातः।।ननुत्वस्वप्रकाशस्यात्मनःकथंज्ञानप्रमोषः।।ज्ञानदानेतत्प्रमो

॥उद्धवउवाच॥प्रकृतिःपुरुषश्चोभौयद्यप्यात्मविलक्षणौ॥अन्योन्यापाश्रयात्कृष्ण दृश्यतेनतयोर्भिदा॥२६॥प्र
कृतौलक्ष्यतेह्यात्माप्रकृतिश्चतथात्मनि॥एवंमेपुंडरीकाक्षमहान्तंसंशयंहृदि॥छेत्तुमर्हसिसर्वज्ञवचोभिर्नय
नैपुणैः॥२७॥त्वत्तोज्ञानंहिजीवानांप्रमोषस्तेत्रशक्तितः॥त्वमेवह्यात्ममायायागतिंवेत्थनचापरः॥२८॥श्रीभगवा
नुवाच॥प्रकृतिःपुरुषश्चेतिविकल्पःपुरुषर्षभ॥एषवैकारिकःसर्गोगुणव्यतिकरात्मकः॥२९॥ममांगमा
यागुणमय्यनेकधाविकल्पबुद्धीश्चगुणैर्विधत्ते॥वैकारिकस्त्रिविधोध्यात्ममेकमथाधिदैवमधिभूतमन्यत्॥
॥३०॥

षेवाममकिंप्रयोजनंतत्राह।।त्वमेवेति।।२८।।विकाराःविकाराभ्यांनानात्वैकत्वाभ्यांसापेक्षनिरपेक्षाभ्यांप्रकाशाःप्रकाशाभ्यां
चासंतभेदंवक्तुमाह।।प्रकृतिःपुरुषश्चेतिविकल्पोऽसंतभेदएव।।कुतइत्यपेक्षायांप्रकृतिशब्दोक्तदेहादिसंघातस्यविकारि
त्वंतावद्दर्शयति।।एषइति।।एषःसर्गःसृज्यतइतिसर्गोदेहादिसंघातःवैकारिकःविकारवान्।।अत्रहेतुः।।गुणव्यतिकरा
त्मकःगुणक्षोभकृतः।।२९।।नानात्वमाह।।ममेति।।विकल्पभेदंत्तबुद्धीश्च।।अनेकधात्वंप्रपंचयति।।वैकारिकःअनेकविका
रवानपिस्थूलेनमार्गेणतावत्त्रिविधः।।त्रैविध्यमेवाह।।अध्यात्ममिति।।एकंरूपं।।३०।।

॥सा॰ ए॰॥
॥८६॥

तानिरूपाणिदर्शयति॥ छगव्याल्तं॥ रूपंअधिभूतं॥ अत्ररंध्रेचक्षुर्गोलकेप्रविष्टंअर्कवपुःअंशोऽधिदैवमिति॥ सापेक्षप्र
काशतामाह॥ परस्परमिति॥ चक्षुषारूपंज्ञायतेतदन्यथाऽनुपपद्यमानंरंध्रिष्ठात्रीचक्षुः॥ तत्रव्यस्यन्यथाऽनुपपद्यमान
दधिष्ठात्रीदेवता॥ ततश्चक्षुषःप्रवृत्तिस्ततोरूपज्ञानमित्येवमेतत्त्रयंपरस्परंसिद्ध्यति॥ अत्ररंध्रेइतिविशेषणव्यावर्त्य
माह॥ छव्यातोपयोगितया॥ यस्तुखेआकाशेअर्कोवर्त्ततेमंडलात्मासतुस्वतःसिद्ध्यति॥ चक्षुर्विषयत्वेपिप्रतियोग्य
पेक्षाभावमात्रेणस्वतःइत्युक्तंइदानीमात्मनोविकारित्वाद्यभावेनभेदमाह॥ यद्यस्मात्आत्माएषामध्यात्मादीना
माद्यःकारणं॥ अतःएकरूपःअभिन्नश्चतस्मादेतेभ्योऽपरोभिन्नःस्वप्रकाशोदपीत्याह॥ स्वयाऽनुभूत्यास्वतःसिद्ध
छरूपमार्कवपुरन्तरंध्रेपरस्परंसिध्यतियःस्वतःखे॥ आत्मायदेषामपरोयआद्यःस्वाभ्याऽनुभूत्याऽखिलसि
द्धसिद्धिः॥ एवंत्वगादिश्रवणादिचक्षुर्जिह्वादिनासादिचित्तयुक्तं॥ ३१॥ योऽसौगुणक्षोभकृतोविकारःप्र
धानमूलान्महतःप्रसूतः॥ अहंत्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामसऐंद्रियश्च॥ ३२॥ ७०॥ ७॥ ७॥

प्रकाशेनअखिलानांसिद्धानांपरस्परंप्रकाशकानामपिप्रकाशकःसर्वेषामपिसामान्यतश्चित्प्रकाशविषय
त्वात्॥ अतएवतस्यस्वप्रकाशत्वंसिद्धं॥ चक्षुषिदर्शितंत्रैविध्यमिंद्रियांतरेष्वप्यतिदिशति॥ एवमिति॥ यथाच
क्षुःएवंत्वगाद्यपीत्यर्थः॥ त्वक्स्पर्शोवायुरिति॥ श्रवणंशब्दोदिशश्चेति॥ जिह्वारसोवरुणइति॥ नासागंधोऽश्विना
विति॥ चित्तेनयुक्तमंतःकरणांतरमपि॥ तत्रचित्तंचेतयितव्यंवासुदेवइति॥ मनोमंतव्यंचंद्रइति॥ बुद्धिर्बोद्धव्यंब्र
ह्मेति॥ अहंकारोऽहंकर्त्तव्यंरुद्रइति॥ एवंत्रैविध्यमित्यर्थः॥ ३१॥ ननुपुनरपिवैलक्षण्यमात्रमेवोक्तंत्रिविधप्रपंचव्य
तिरिक्तात्मप्राप्तिस्तुकुतःस्यात्अहंकारनिरसात्तुकुतःत्रिविधविकल्पनिवृत्त्येवेत्याशयेनाह॥ यइति॥ योसावहमहं
कारस्तमेवाह॥ गुणक्षोभकरोतीतितथाततःपरमेश्वरात्कालाद्यनिमित्तात्॥ प्रधानंमूलमुपादानंयस्यतस्मान्महतः

प्रसूतोविकारःसन्निविधःमोहमयस्यविकल्पस्यहेतुः॥ निवर्त्तलमेवाह॥ वैकारिकइति॥ ३२॥

॥साम॰॥
॥८६॥

सकुतो निवर्त्तते ॥ आत्मा ऽज्ञानविलसितत्वात् तस्मा ज्ञानेनैव सा इत्यायेनाह ॥ आत्मापरिज्ञानमय इति ॥ ननु कथं मोहमयत्वं वि
कल्पस्य अहंकारस्य वा केचित्स्वसत्वांगीकारात्तत्राह ॥ विवाद इति ॥ अयं भिदार्थनिष्ठो विवादोप्यात्मापरिज्ञानमय इत्यन्व
यः ॥ यद्वा विवादः सर्वोपि भिदार्थनिष्ठ एव न तु वस्तुमात्रनिष्ठः अतः परस्परयुक्तिभिरेव भेदस्य निराकृतत्वात् मोहमय
त्वं सिद्धमिति ॥ ननु यद्यहंकारो विकल्पश्च नास्ति अलं तर्हि तन्निवृत्तिप्रयासेन तत्राह ॥ व्यर्थोपि अर्थरहितोपि स्वरूप
भूतात् मत्तो बहिर्मुखानां नैवोपरमेत ॥ प्रसक्तत त्वत्कृतैः कर्मभिरुच्चनीचदेहेषु ते संसरंतीति ॥ २३ ॥ तत्र पृच्छति ॥ त्वत्त

आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः ॥ व्यर्थोपि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोका
त् ॥ २३ ॥ उद्धव उवाच ॥ त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो ॥ उच्चावचान्यथा देहान् गृण्हंति विसृजंति च ॥ २४ ॥ त
न्ममाख्याहि गोविंद दुर्विभाव्यमनात्मभिः ॥ न ह्येतत्प्रायशो लोके विद्वांसः संति वंचिताः ॥ २५ ॥ श्रीभगवानुवाच ॥ मनः
कर्ममयं नॄणामिंद्रियैः पंचभिर्युतं ॥ लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्तते ॥ २६ ॥ ध्यायन्मनोनुविषयान्दृष्टान्वानु
श्रुतानथ ॥ उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनु शाम्यति ॥ २७ ॥

इति ॥ व्यापकस्यात्मनो देहाद्देहांतरगमनं ॥ अकर्तुः कर्माणि नित्यस्य च जन्ममरणादीनि कथमिति भावः ॥ २४ ॥ एतद्विद्वांसोन सं
ति हि यस्मान्मायया वंचिताः मोहिताः ॥ २५ ॥ लिंगशरीराध्यासेन सर्वं घटत इति उत्तरमाह ॥ मन इति ॥ प्रधानत्वेन पंचभिरि
ति ॥ निर्देशोऽन्येषामप्युपलक्षणार्थः ॥ देहाद्देहांतरं प्रतियातितत्तोऽन्य एवात्मा तन्मनोनुवर्त्तते अहंकारेणानुगच्छति ॥ २६ ॥ ननु
मनसोपि पूर्वदेहवियोगो देहांतरसंयोगश्च कथं भवतीति चेत्तस्मृतिवियोगयोगाभ्यामिति वक्तुं तयोः कारणमाह ॥ ध्यायन्नि
ति ॥ कर्मतंत्रत्वात्कर्मोपस्थापितान् दृष्टान्वा अनुश्रुतान्वैदोक्तान्विषयान् ॥ अनुध्यायन् अथ अनंतरं ध्यायमानेषु उद्यत्स्व
विर्भवत्सु ॥ एवं विषयेषु च सीदत्सु लीयमानं भव
ति ॥ तदनंतरं तत्तस्य स्मृतिः पूर्वापरसंधानं नश्यति ॥ २७

ततः किमतआह। विषयेति। कर्मोपस्थापितदेवादिदेहेषुयंताभिनिवेशोनआत्मानंपूर्वदेहंपुनर्मृतोनस्मरेत्॥ इतियन्मन
सैवयातनादेहाभिनिवेशोनभयशोकादिदेवादिदेहाभिनिवेशोनहर्षतर्षादिर्हतोःपूर्वदेहंअसंतविस्मृतिः अहंकारनिवृत्ति
स्तदभिमानिनोजंतोर्जीवस्यमृत्युरुच्यते। नतुदेहवल्लाशः॥४९॥ जन्मतुविषयस्यआत्मतयास्वीकृतिंअभिमानंप्राहुः
नतुदेहवदुत्पत्तिःनचपुत्रादिदेहवल्लीयतिमायमात्रेण। किंतुसर्वभावेनअभेदेनअभिमानमात्रेणोत्पत्तिमरणेदृष्टां
तद्वयं। यथास्वप्नश्चमनोरथश्चेत्यर्थः॥४९॥ दृष्टांतौविवृणोति। स्वप्नमिति। तत्रवर्तमानस्वप्नादौपूर्वंचेतिअपूर्वमिव

विषयाभिनिवेशोननात्मानंयत्पुनःस्मरेत्पुनः॥ जंतोर्वैकस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः॥४९॥ जन्मत्वात्मतयापुंसः
सर्वभावेनभूरिद॥ विषयस्वीकृतिंप्राहुर्यथास्वप्नमनोरथः॥४९॥ स्वप्नंमनोरथंचेत्थंप्राक्तनंनस्मरत्यसौ॥ तत्रपूर्व
मिवात्मानमपूर्वंचानुपश्यति॥४०॥ इंद्रियायनसृष्ट्येदंत्रैविध्यंभातिवस्तुनि॥ बहिरंतर्भिदाहेतुर्जनोऽसज्जनकृद्य
था॥४१॥

सन्वयः॥ पूर्वंसिद्धमप्यात्मानमपूर्वमिवअद्यजातमिवपश्यतीत्यर्थः॥४०॥ उपसंहरति। इंद्रियाणांमयनंमनःतस्यदेहांत
राभिनिवेशोनयासृष्टिःउत्पत्तिःतयावस्तुनिआत्मनितदभिमानेनेदंत्रैविध्यंउत्तममध्यमनीचत्वंअसदेवभाति
सन्वयः॥ एवंभूतआत्माबाह्याभ्यंतरभेदहेतुश्चभवति। बाह्यविषयभियानअंतरान्सुखादींश्चपश्यतीत्यर्थः॥ य
थाजनोजीवःस्वप्नेबहूनअसतोजनान्देहानकुर्वन्पश्यन्बहुरूपोभवतितद्वत्॥ यद्वाइदंत्रैविध्यंअध्यात्मादिरूपं
भाति। असज्जनकृत्दुष्टपुत्रोत्पादकजनःपितास्वयंसमोपिपुत्राभिमानतस्तदरिमित्रादिषुयथाभेदहेतुर्भवतितद्वत्

तदेवं लोकप्रसिद्धौ जन्ममरणे निरूप्य ॥ सूक्ष्मावदृष्टावपि तौ वैराग्याय निरूपयति ॥ नित्यदा प्रतिक्षणं भूतानि शरीराणि उ
त्पद्यंते नश्यंति ॥ कालस्यातिसूक्ष्मत्वात्तत्कृतं भवनाभवनं वा विवेकिभिर्न लक्ष्यते ॥४२॥ सर्वतो जन्ममरणयोरज्ञाने कार
णमेतत्तद्भवेत् ॥ सत्यमेव तयोः कुतः इत्याशंक्यानुमानेन साधयति ॥ यथार्चिषामिति ॥ अर्चिषां परिणामादिभिः स्रोत
सां गत्यादिभिः ॥ फलानां पाकादिभिर्यथावस्थाविशेषाः कृताः कालेनेति पूर्वस्यानुषंगः ॥ आदिशब्देन तेजोबलकामको
लानामुपादानं ॥ विमतं प्रतिक्षणोत्पत्तिविनाशवत् अवस्थाभेदवत्त्वात् दीपज्वालादिवदित्यनुमानम् ॥४३॥ कथं त

नित्यदा ह्यंग भूतानि भवंति न भवंति च ॥ कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते ॥४२॥ यथार्चिषां स्रोतसां च फला
नां वा वनस्पतेः ॥ तथैव सर्वभूतानां वयोऽवस्थादयः कृताः ॥४३॥ सोयं दीपोऽर्चिषां यद्वत्स्रोतसां तदिदं जलं ॥ सो
यं पुमानिति नृणां मृषा गीर्धीर्मृषायुषां ॥४४॥ मा स्वस्य कर्मबीजेन जायते सोप्ययं पुमान् ॥ म्रियते वाऽमरो भ्रांत्या
यथाऽग्निर्दारुसंयुतः ॥४५॥

र्हि प्रत्यभिज्ञा तत्राह एवं सादृश्यावलंबिनी सा इत्याह ॥ सोयमिति ॥ सादृश्यादर्चिषामेव यथा सोयं दीप इति प्रत्यभिज्ञा ॥ यथा च
स्रोतसां प्रवाहजलानामेव तदिदं जलं ॥ तथा सोयं पुमानिति धीर्गीश्च मृषा ॥ नृणां बहूनां शरीरिणां मृषा व्यर्थमायुर्येषां
अविवेकिनां तेषां भवति ॥४४॥ ननु कथं देहाध्यासवतः पुंसः कर्मजन्ममरणानि संति नान्यस्येति व्यवस्था न हि घटे तद्घटस्य पु
रुषभेदेन सत्त्वमसत्त्वं चेति ॥ न अज्ञस्यापि वस्तुतस्तदभावादित्याह ॥ मास्वस्येति ॥ मा स्वस्य नैवात्मनः कर्मणा बीजभूतेन सोपि
अज्ञोपि पुमान् जायते म्रियते वा ॥ किंतु अयं भ्रांत्या अजन्मापि तज्जो अमरोपि म्रियत इव ॥ यथा महाभूतं तेजोरूपो
ग्निराकल्पांतमवस्थितोपि दारुयोगवियोगाभ्यां जन्मनाशौ प्राप्नोतीति तद्वत् ॥४५॥

सिद्धवत्कृत्योक्ताः वयोवस्थाः प्रपंचयति॥ निषेको जठरप्रवेशः गर्भस्तन्मध्येवृद्धिः बाल्यं आपंचमाब्दात्॥ कौमारं आ
षोडशाद्वर्षात्॥ ततो यौवनमापंचत्वारिंशतः ततो वयो मध्यमाषष्ठिवर्षात्॥४६॥ देहसंबंधाज्जन्ममरणादीनी रूपपा
दितमर्थमुपसंहरति॥ एताइति॥ हि स्फुटं अन्यस्यात्मनः देहस्य संबंधिनीस्तनूः अवस्थागुणसंगात् प्रकृत्यविवेका
त्॥ उपादत्ते॥ कश्चित्परमेश्वरानुगृहीतः कथंचित् जहाति॥ अवस्थावतो देहस्य॥ दृष्टानावस्थावानिति विवेकज्ञा
नेन॥४७॥ ननु तदानीं मृद्धितत्वेन जन्ममरणवान् देहो न दृश्यते तत्राह॥ आत्मन इति॥ पितृदेहस्यौर्ध्वदेहिकं कुर्वतोप्य

निषेकगर्भजन्मानि बाल्यकौमारयौवनं॥ वयोमध्यं जरामृत्युरित्यवस्थास्तनोर्नव॥४६॥ एतामनोरथमयीर्हि
न्यस्योच्चावचास्तनूः॥ गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च॥४७॥ आत्मनः पितृपुत्राभ्यामनुमेयौ भ
वाभवौ॥ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः॥४८॥ तरोर्बीजविपाकाभ्यां यो विद्वान् जन्मसंयमौ॥ तरो
र्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक्॥४९॥ प्रकृतेरेवमात्मानमविविच्याबुधः पुमान्॥ तत्वेन स्पर्शसंमूढः सं
सारं प्रतिपद्यते॥५०॥९

यद्दर्शनात्॥ पुत्रदेहस्य च जातकर्माणि जन्मदर्शनादात्मनः स्वस्य देहस्यापि भवाप्ययावनुमेयौ॥ एवं च द्वयस्य लक्षसति
भवाप्ययवतां वस्तूनां देहानामभिज्ञो द्रष्टा द्वयलक्षणः भवाप्ययधर्मको न भवति॥४८॥ एतदेव दृष्टांतेन स्पष्टय
ति तरोरिति॥ तरुशब्देनोद्भिज्जमात्रस्योपलक्षणं॥ किंतु फलपाकांतस्य व्रीह्यादेरित्यर्थः॥ यद्वा तरोरेवांऽयं परिणामो वि
पाकः बीजाज्जन्म विपाकात्॥ संयमं नाशं च विद्वान्॥४९॥ अविवेकिनः संसारं प्रपंचयति॥ प्रकृतेरिति पंचभिः॥ त
त्वेन तत्वतो विविच्य तत्वदृष्ट्या स्पर्शेषु विषयेषु संमूढ इति वा॥५०॥९

गुणभेदेनत्रिविधंतत्रापितत्तत्तारतम्येनैकैकत्राद्विविधंसंसारमाह ॥ सत्वेति ॥५१॥ नन्वकर्त्तुरात्मनःकुतःकर्मभिर्भ्रमणंतत्रा
ह ॥ नृत्यतोगायतोजनाननुपश्यन्ननुकरोति ॥ तद्वत्स्वरतालादिगतिशृंगारकरुणादिरसंचमनस्यनुवर्त्तयतीत्यर्थः ॥ अ
नुकारयतेगुणैर्बलादित्यर्थः ॥ अनेनदृष्टांतेनद्रष्टृधर्माहृष्टरिस्फुरतीतिदर्शितं ॥५२॥ उपाधिधर्मास्त्रोपहितेऽवभासंतेइ
त्यत्रदृष्टांतमाह ॥ यथांभसेति ॥ तीरस्थास्तरवोधावंतइवदृश्यंतेजलेप्रतिबिंबितावाचंचलाइवेति ॥ विषयग्राहकेणमन

सत्वसंगादृषीन्देवान्रजसाऽसुरमानुषान् ॥ तमसाभूततिर्यक्त्वंभ्रामितोयातिकर्मभिः ॥५१॥ नृत्यतोगायतोऽप
श्यन्यथैवानुकरोतितान् ॥ एवंबुद्धिगुणान्पश्यन्ननीहोप्यनुकार्यते ॥५२॥ यथांभसाप्रचलतातरवोपिचलाइव ॥
चक्षुषाभ्राम्यमाणेनदृश्यतेचलतीवभूः ॥५३॥ यथामनोरथधियोविषयानुभवोमृषा ॥ स्वप्नदृष्टाश्चदाशार्हत
थासंसारआत्मनः ॥५४॥ अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्त्तते ॥ ध्यायतोविषयानस्यस्वप्नेऽनर्थागमोय
था ॥५५॥ तस्मादुद्धवमाभुंक्ष्वविषयानसदिंद्रियैः ॥ आत्माग्रहणनिर्भातंपश्यवैकल्पिकंभ्रमं ॥५६॥ क्षिप्तोवमानि
तोऽसद्भिःप्रलब्धोऽसूयितोऽथवा ॥ ताडितःसन्निबद्धोवावृत्त्यावापरिहापितः ॥५७॥
सापरिकल्पिताएवतेषुविषयेषुलावण्यादयोगुणाःनवस्तुतःसंति ॥ अतोमनोनिबंधनएवसंसारइत्यभिप्रेत्याह
कगुणाश्चाह्यवभासंतेइत्यत्रदृष्टांतमाह ॥ चक्षुषेति ॥५३॥ भोगस्यमिथ्यात्वेदृष्टांतद्वयमाह ॥ यथेति ॥ यथाएताःप्र
सिद्धामनोरथधियःस्वप्नदृष्टाश्चधियोयथामृषा ॥ एवमात्मनोविषयानुभवःसंसारोमृषा ॥५४॥ ननुयदिमृषातर्हिकिं
तन्निवृत्तिश्रमेणतत्राह ॥ अर्थेति ॥ अस्यआत्मनः ॥५५॥ अतोभोगोयमोनकर्त्तव्यइत्याह ॥ तस्मादिति ॥५६॥ दुःखप्रतीः
कारोद्यमपिपरित्यज्यपरमेश्वरनिष्ठेनैवभाव्यमित्याह ॥ क्षिप्तइति ॥ द्वाभ्यां ॥ क्षिप्तआक्षिप्तः ॥ तुन्नइतिवा ॥ प्रलब्ध

निष्ठितः निष्ठीनविषयीकृतः मूत्रितः मूत्रेणार्द्रीकृतः प्रकंपितः परमेश्वरनिष्ठातः प्रच्यावितोपि॥ कृच्छ्रगतः कष्टं प्रापितः
॥५८॥ एवं त्वदुक्तं यथाऽनुबुध्येयं तथा नः सर्वान्प्रति वद॥५९॥ त्वद्धर्मे निरतान्ते॥ विदुषामप्यसाङ्ग्यकृतमतिक्रमं अत्र
पराधं दुःसहं मन्ये इत्यन्वयः॥ प्रकृतिः स्वभावः॥ निरस्य सर्वसंदेहान कीकृत सुदर्शनं॥ प्रकाशितरहस्यं तं भजा
मि गुरुमीश्वरं॥६०॥ इत्येकादशे द्वाविंशोध्यायः॥२२॥छ॥ त्रयोविंशे तिरस्कारसहनोपायईर्यते॥ भिक्षुगीताप्रकारेण

निष्ठितो मूत्रितो वा खलैर्बहुधैवं प्रकंपितः॥ श्रेयस्कामः कृच्छ्रगत आत्मनात्मानमुद्धरेत्॥५८॥ उद्धव उ॰ यथैवम
नुबुध्येयं वद नो वदतां वर॥ सुदुःसहमिमं मन्य आत्मन्यसदतिक्रमं॥५९॥ विदुषामपि विश्वात्मन्प्रकृतिर्हि ब
लीयसी॥ ऋते त्वद्धर्मनिरतान्शांतांस्ते चरणालयान्॥६०॥ इति भागव॰ महा॰ एकादशे द्वाविंशोध्यायः॥२२॥
बादरायणिरु॰ स एवमाशंसित उद्धवेन भागवतमुख्येन दाशार्हमुख्यः॥ सभाजयन्भृत्यवचो मुकुंदस्तमाबभा
षे श्रवणीयवीर्यः॥१॥ श्रीभगवा॰ बार्हस्पत्य स वै नात्र साधुर्वै दुर्जनेरितैः॥ दुरुक्तैर्भिन्नमात्मानं यः समाधातुमी
श्वरः॥२॥छ

मनसः संयमो धिया॥१॥ दुर्जनोपद्रवो नूनं दुःसहोपि महीयसः॥ अतश्चतुर्भिरध्यायैः सहनोपायवर्णनं॥२॥ तत्र तावद
स्मिन्नध्याये भिक्षुगीतया मनोविजयः॥ उत्तरस्मिन्प्रकृतिपुरुषविवेकः॥ तदुत्तरस्मिन्गुणवृत्तिविजयः ततः पर
स्मिन्नैलगीतया विषयसंगत्यागेन सत्संग इति क्रमेणोपाया भगवता वर्ण्यंते॥ आशंसितः प्रार्थितः॥ भृत्यस्य वचः
सत्कुर्वन्नूतं भृत्यं प्रति आबभाषे॥१॥ तत्र तावदंगीकारं तस्तद्वचः संपूजयति द्वाभ्यां॥ हे बार्हस्पत्य बृहस्पतेः शिष्य अत्र लो
के स साधुर्नास्ति॥ यो दुर्जनोक्तैर्भिन्नं क्षुभितं मनः समयितुमीश्वरः स्यात्तु॥२॥

कुतइत्यतआह ॥ नेति ॥ यथा मर्मस्था मर्मस्वेव निसंस्थिता परुषोक्तिरूपाः इषवस्तुदंति ॥ व्यथयंति तथाऽतरे बाणाः न तुदंति
अतस्तैस्तथा न तप्यतइत्यर्थः ॥ ३ ॥ तथापि मया वक्ष्यमाणे रूपाये सर्वसौहृद्राख्यमिसभिप्रायेणेतिहासं प्रस्तौति ॥ महद्यथा
भवति तथा पुण्यमितिहासं गाथां कथयंति ॥ ४ ॥ स तु भिक्षुकः पूर्वं धनाढ्यः कष्टार्जितस्य धनस्य नाशेन संतप्यमानो नि
र्विण्णः सन् ॥ प्रव्रज्य भिक्षामटन् दुर्जनैरुपद्रुतः ॥ ५ ॥ प्रसक्तोपयोगिनीं गाथामगायतेति वक्तुं तस्य चरितमाह ॥ अवंति

न तथा तप्यते विद्धः पुमान्बाणैस्तु मर्मगैः ॥ यथा तुदंति मर्मस्था ह्यसतां परुषेषवः ॥ ३ ॥ कथयंति महत्पुण्य
मितिहासमिहोद्धव ॥ तमहं वर्णयिष्यामि निबोध सुसमाहितः ॥ ४ ॥ केनचिद्भिक्षुणा गीतं परिभूतेन दुर्जनैः
स्मरता धृतियुक्तेन विपाकं निजकर्मणां ॥ ५ ॥ अवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया ॥ वार्त्तावृत्तिः कद
र्यस्तु कामी लुब्धोऽतिकोपनः ॥ ६ ॥ ज्ञातयोऽतिथयस्तेन वाङ्मात्रेणापि नार्चिताः ॥ शून्यावसथ आत्मापि काले का
मैरनर्चितः ॥ ७ ॥ दुःशीलस्य कदर्यस्य द्रुह्यंते पुत्रबांधवाः ॥ दारा दुहितरो भृत्या विषण्णा नाचरन्प्रियं ॥ ८ ॥ त
स्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः ॥ धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ॥ ९ ॥ श्रीरस्तात्रयाय ॥

ष्विसादिना ॥ अवंतिषु मालवेषु वार्त्ता कृषिवाणिज्यरूपा वृत्तिर्यस्य ॥ कदर्यस्तु स्मृतावुक्तः ॥ आत्मानं धर्मकृत्यं च पुत्रदारांश्च
पीडयन् ॥ देवतातिथिभृत्यांश्च स कदर्य इति स्मृतः ॥ ६ ॥ तस्य ये ज्ञातयो बांधवाः अतिथयोऽध्वनीनाश्च ते न नार्चिता इत्यर्थः ॥
शून्यावसथे धर्मकामहीने गेहे देवाः ॥ ७ ॥ ८ ॥ यक्षाणां वित्तमिव केवलं रक्षणीयं वित्तं यस्य ॥ पंचभागिनः पंचयज्ञदेवताः ॥ ९ ॥

तेषामवध्यानमनादरः तेन विस्रस्तो विशीर्णः पुण्यस्य स्कंधः अर्थलाभमात्रहेतुरंशो यस्य तस्य ॥ बह्वायासैः कृष्यादिभिः केवलं श्रमो यस्मिन् तस्य ॥२०॥ दैवतः गृहदाहादिना कालतः निखातधान्यादि । नृणां पार्थिवानां च दंडैर्दस्यं तस्मात् ॥२१॥२२ नष्टरायः नष्टो राः अर्थो यस्य तस्य ॥ तपस्विनः संतप्तस्य ॥२३॥ मे मया आत्मा देहः ॥ व्यर्थैवात्मानुतापनं प्रपंचयति ॥ न

तदवध्यानविस्रस्तपुण्यस्कंधस्य भूरिद । अर्थोप्यगच्छन्निधनं बह्वायासपरिश्रमः ॥२०॥ ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव । दैवतः कालतः किंचिद्ब्रह्मबंधोर्नृपार्थिवान् ॥२१॥ स एवं द्रविणे नष्टे धर्मकामविवर्जितः । उपेक्षितश्च स्वजनैश्चिंतामाप दुरत्ययां ॥२२॥ तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः । खिद्यतो बाष्पकंठस्य निर्वेदः सुमहानभूत् ॥२३॥ स चाहेदमहो कष्टं वृथात्मा मेऽनुतापितः । न धर्माय न कामाय यस्यार्थायास ईदृशः ॥२४॥ प्रायेणार्थाः कदर्याणां न सुखाय कदाचन । इह चात्मोपतापाय मृतस्य नरकाय च ॥२५॥ यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः । लोभः स्वल्पोऽपि तान् हंति श्वित्रो रूपमिवेप्सितं ॥२६॥ अर्थस्य साधने सिद्धे उत्कर्षे रक्षणे व्यये । नाशोपभोग आयासस्त्रासश्चिंता भ्रमो नृणां ॥२७॥ ७

धर्मायेत्यादिना ॥ यस्य ईदृशो अर्थायासस्तेन मया ॥२४॥ नरकाय स्वस्य च ॥ स स्वधर्मधर्मानुष्ठानात् ॥२५॥ श्वित्रः श्वेतकुष्ठं ॥२६॥ निरूप्यमाणोऽर्थोऽनर्थ एवेत्याह ॥ त्रिभिः ॥ अर्थस्येति ॥ सिद्धेप्यर्थे तस्योत्कर्षे ॥ संवर्द्धने ॥ नाशोपभोगयोर्द्वंद्वैक्यं ॥ नाशे उपभोगे च स्वार्थः ॥ साधनोत्कर्षयोरायासः तत्र त्रासः चिंता च नाशे भ्रम इति ॥२७॥ श्रीदत्तात्रेयाय नमः

अर्थप्राप्यर्थास्तेयादयः॥ प्राप्तेर्थेस्मसादयोव्यसनैः सहनवव्यसनानि॥ स्त्रीद्यूतमद्यविषयाणित्रीणि॥१८॥१९॥ भेदवैरस्पर्द्धाः प
र्यंचंति॥ द्वाभ्यां॥ भिद्यंतेस्नेहंत्यजंति॥ कथंभूताः एकाः स्निग्धाः एकेएकप्राणाः तेचतेअत्यास्निग्धाः अतिप्रियाश्चेत्यर्थः॥
कुतः काकणिनापुरुषमात्रेण॥ विंशतिवराटिकाकाकिणीतया॥२०॥ संरब्धाः क्षुभिताः स्पृधः स्पर्द्धमानाः॥२१॥ इदंतावदर्थ
निष्ठानामतेऽनर्थाः॥ परलोकेप्यनर्थएतेषामित्याह॥ लब्ध्वेतित्रिभिः॥ मानुष्यंजन्मतत्॥ तत्रापिद्विजाग्र्यतांब्राह्मण्यं॥

स्तेयंहिंसानृतंदंभः कामः क्रोधः स्मयोमदः॥ भेदोवैरमविश्वासः संस्पर्द्धाव्यसनानिच॥१८॥ एतेपंचदशानर्थाह्यर्थ
मूलामतान्नृणां॥ तस्मादनर्थमर्थाख्यंश्रेयोर्थीदूरतस्त्यजेत्॥१९॥ भिद्यंतेभ्रातरोदाराः पितरः सुहृदस्तथा॥ एकाः
स्निग्धाः काकिणिनासद्यः सर्वेऽरयः कृताः॥२०॥ अर्थेनाल्पीयसाह्येतेसंरब्धादीप्तमन्यवः॥ त्यजंत्याशुस्पृधोघ्नंति
सहसोत्सृज्यसौहृदं॥२१॥ लब्ध्वाजन्मामरप्रार्थ्यंमानुष्यंतद्द्विजाग्र्यतां॥ तदनादृत्ययेस्वार्थंघ्नंतियांत्यशुभांग
तिं॥२२॥ स्वर्गापवर्गयोर्द्वारंप्राप्यलोकमिमंपुमान्॥ द्रविणेकोनुषज्जेतमर्त्योनर्थस्यधामनि॥२३॥ देवर्षिपितृभूतानि
ज्ञातीन्बंधूंश्चभागिनः॥ असंविभज्यचात्मानंयक्षवित्तः पतत्यधः॥२४॥ व्यर्थयार्थेहयावित्तंप्रमत्तस्यवयोबलं॥ कु
शलायेनसिध्यंतिजठरः किंनुसाधये॥२५॥७

स्वार्थंघ्नंति॥ आत्महितंनकुर्वंतियेतेयांति॥२२॥ अमरप्रार्थ्यतांदर्शयति॥ स्वर्गेति॥ लोकंदेहं अनुषज्जेत आसक्तिंकुर्यात्॥
२३॥ ऋषयोमनुष्यपस्तद्ब्रह्मयज्ञयोः देवताः देवपितृभूतानीतरद्ज्ञातयः सगोत्राः बांधवाविवाहादिनासंबद्धाः तान्॥ अ
न्यांश्चभागिनः भागार्हान्॥ आत्मानंचअसंविभज्यअन्नादिभिरसंतर्प्य॥२४॥ एवंविमृश्यानुतप्यमानआह॥ व्यर्थयार्थे

ईहयाप्रमत्तस्यममवित्तादिगतमितिशोच
नवित्तादिकंजातानिवकिंनमिश्रमितमुच्यते॥
नकोच्यते॥२५॥ ७

॥भा॰ ए॰॥
॥९३॥

अन्यमपिस्वसदृशंशोचति॥ कस्मादेवमनर्थंविद्वानपिसंक्लिश्यते॥ कारणंसंभावयति॥ कस्यचिदिति॥२६॥ ननुनायं
मोहितःक्लिश्यति॥ किंतुधनादिभिर्भोगादिवश्यतयाअतआह॥ किंधनैरिति॥ उतपुनरपि॥२७॥ इदानींसंपन्नविवेकः
सन्हृष्यन्नाह॥ नूनमितित्रिभिः॥ येनप्रीतेनात्मनःप्लवरूपोनिर्वेदोभवति॥ सहरिर्मेनूनंप्रीतइति॥२८॥ अंगंशो

कस्मात्संक्लिश्यतेविद्वान्व्यर्थयार्थेहयासकृत्॥ कस्यचिन्माययानूनंलोकोयंसुविमोहितः॥२६॥ किंधनैर्धन
दैर्वाकिंकामैर्वाकामदैरुत॥ मृत्युनाग्रस्यमानस्यकर्मभिर्वोतजन्मदैः॥२७॥ नूनंमेभगवांस्तुष्टःसर्वदे
वमयोहरिः॥ येननीतोदशामेतांनिर्वेदश्चात्मनःप्लवः॥२८॥ सोहंकालावशेषेणशोषयिष्येंगमात्मनः॥
अप्रमत्तोऽखिलस्वार्थेयदिस्यात्सिद्धआत्मनि॥२९॥ तत्रमामनुमोदेरन्देवास्त्रिभुवनेश्वराः॥ मुहूर्तेनब्रह्म
लोकंखट्वांगःसमसाधयत्॥३०॥ श्रीभगवानुवाच॥ इत्यभिप्रेत्यमनसाह्यावंत्योद्विजसत्तमः॥ उन्मुच्यहृदयग्रंथी
न्शांतोभिक्षुरभून्मुनिः॥३१॥ सचचारमहीमेतांसंयतात्मेंद्रियानिलः॥ भिक्षार्थंनगरग्रामानसंगोलक्षि
तोविशत्॥३२॥ छ

षयिष्येतपसा॥ यद्वाविघयारूपंनेष्यामि॥ यदिस्यात्कालावशेषस्तर्ह्यात्मन्येवसिद्धःतुष्टःसन्॥ अखिलेस्वार्थे
धर्मादिसाधनेअप्रमत्तःसन्॥२९॥ अनुमोदेरन्अनुगृण्हंतु॥ ननुदेवैरनुमोदितोपिजठरःस्वल्पेनकालेन
किंसाधयिष्यसितत्राह॥ मुहूर्तेनेति॥३०॥ अभिप्रेत्यनिश्चित्यआवंत्यःअवंतिदेशभवः हृदयग्रंथीन्अहंकारमम
तान्॥३१॥ असंगःआसक्तिरहितःअलक्षितःऔद्धत्यमद्योतयन्॥३२॥ श्रीदत्तात्रयायनमः॥ श्री०॥ छ॥ श्री०॥

॥राम॰॥
॥९३॥

प्रवयसं वृद्धं ॥ अवधूतं मलिनं पर्यभवन् अवमेनिरे ॥ हे भद्र परिभूतिभिः तिरस्कारैः ॥३३॥ परिभवानेव वर्णयति ॥ केचिदिति सप्तभिः ॥३४॥ भो भगवन् गृहाणेति ॥ दर्शितानि संति प्रदाय पुनरादधुः ॥३५॥ अन्ये मूत्रयंति मूर्ध्नि ष्ठीवंति फूत्कारेण श्लेष्माणं प्रक्षिपंति ॥३६॥ तर्जयंतीति ॥३७॥ क्षिपंति निंदंति ॥ निंदामेवाह ॥ एष धर्मध्वजः दंडलिंगोपजीवी शठो लोकवंचकः ॥ त

तं वै प्रवयसं भिक्षुमवधूतमसज्जनाः ॥ दृष्ट्वा पर्यभवन् भद्र बह्वीभिः परिभूतिभिः ॥३३॥ केचित्त्रिवेणुं जगृहुरेके पात्रं कमंडलुं ॥ पीठं चैकेऽक्षसूत्रं च कंथां चीराणि केचन ॥३४॥ प्रदाय च पुनस्तानि दर्शितान्याददुर्मुनेः ॥ अन्नं च भैक्ष्यसंपन्नं भुंजानस्य सरित्तटे ॥३५॥ मूत्रयंति च पापिष्ठाः ष्ठीवंत्यस्य च मूर्द्धनि ॥ यतवाचं वाचयंति ताडयंति न वक्ति चेत् ॥३६॥ तर्जयंत्यपरे वाग्भिः स्तेनोऽयमिति वादिनः ॥ बध्नंति रज्वा तं केचिद्बध्यतां बध्यतामिति ॥३७॥ क्षिपंत्येकेऽवजानंत एष धर्मध्वजः शठः ॥ क्षीणवित्त इमां वृत्तिमग्रहीत्स्वजनोज्झितः ॥३८॥ अहो एष महासारो धृतिमान् गिरिराडिव ॥ मौनेन साधयत्यर्थं बकवद्दृढनिश्चयः ॥३९॥ इत्येके विहसंत्येनमेके दुर्वातयंति च ॥ तं बबंधुर्निरुरुधुर्यथा क्रीडनकं द्विजं ॥४०॥ एवं स भौतिकं दुःखं दैहिकं दैविकं च यत् ॥ भोक्तव्यमात्मनो दिष्टं प्राप्तं प्राप्तमबुध्यत ॥४१॥ परिभूत इमां गाथामगायत नराधमैः ॥ पातयद्भिः स्वधर्मस्थो धृतिमास्थाय सात्विकी ॥४२॥

देवा दुः ॥ क्षीणवित्त इति ॥३८॥ महासारः अतिबली ॥३९॥ दुर्वातयंति तदुपर्यधोवायुं मुंचंति ॥ बबंधुः संखले ॥ निरुरुधुः ॥ कारागृहादिषु ॥ शुकसारिकादिर्यथा ॥४०॥ भौतिकं दुर्जनादिकृतं ॥ दैहिकं ज्वरादिनिमित्तं ॥ दैविकं शीतोष्णादिप्रभवं ॥ दिष्टं दैवप्राप्तं ॥४१॥ स्वधर्मात्पातयद्भिः परिभूतोपि सात्विकीं धृतिमास्थाय स्वधर्म एव स्थित इमां वक्ष्यमाणां गाथामगायत ॥ सात्विकी र

॥भा॰ ए॰॥
॥९२॥

तामेवाष्टादशभिः श्लोकैर्गाथामाह॥ नायमिति॥ न चात्मनापि मम हेतवः॥ मनः परं केवलं सुखदुःखयोः कारणं वदंति॥ मनसा हि
वपश्यति॥ मनसा स्मरणात्तौ सारिणौ कृतयः॥ ४२॥ परिवर्त्तनप्रकारमेवाह॥ मनस्त्वादिना॥ गुणानुगुणवृत्तीः सृजंति॥ ततश्च
तेभ्यो गुणेभ्यः शुक्लानि सात्विकानि कृष्णानि तामसानि लोहितानि राजसानि सवर्णाः तत्तत्कर्मानुरूपाः सृतयः देवतिर्यङ्
नरादिगतयः॥ ४४॥ तर्हि मनस एव संसारः स्यान्नात्मन इत्याशंक्याह॥ अनीह इति॥ अयमर्थः॥ अविषया मनोध्यासे
नैयमात्मनः संसृतिः न तु स्वतः यतस्तत्प्रहितस्येश्वरस्य सा नास्ति॥ किंतु तद्वतो जीवस्यैवेति॥ तदेतदाह॥ मनसा समी

॥द्विज उवाच॥ नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः॥ मनः परं कारणमामनंति संसारचक्रं परिव
र्त्तयेद्यत्॥ ४३॥ मनो गुणान्वै सृजते बलीयस्ततश्च कर्माणि विलक्षणानि॥ शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सव
र्णाः सृतयो भवंति॥ ४४॥ अनीह आत्मा मनसा समीहिता हिरण्मयो मत्सख उद्विचष्टे॥ मनः स्वलिंगं परिगृह्य का
मान् जुषन्निबद्धो गुणसंगतोसौ॥ ४५॥ दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि॥ सर्वे मनोनिग्र
हलक्षणांताः परो हि योगो मनसः समाधिः॥ ४६॥

हमानेन सह नियंतृत्वेन वर्त्तमानोपि परमात्मा अनीहः॥ तत्क्रियासंगरहितः॥ यतो हिरण्मयः विभाप्रान्तिप्रधानः कुतः यतो म
त्सखः मम जीवस्य सखा नियंता अत उद्विचष्टे उच्चैर्विचष्टे॥ अतिरोहितज्ञानेन केवलं पश्यतीत्यर्थः॥ असौ पुनरहं जीवः स्वलिंगं स्व
स्मिन् आत्मनि लिंगयति द्योतयति संसारमिति तथा तन्मनः परिगृह्य आत्मत्वेन स्वीकृत्य तस्य मनसो गुणैः कर्मभिः संगतः
संबद्धः गुणसंगाद्धि कामान् जुषन्निबध्यत इति॥ ४५॥ अतो मनोनिग्रहे कृते सर्वं कृतं स्यात्॥ तद्विनात्तु सर्वं व्यर्थमित्याह॥ दान
मिति द्वाभ्यां॥ स्वधर्मः नित्यनैमित्तिकः सद्व्रतान्येकादश्युपवासादीनि अन्यानि च यावंति कर्माणि॥ एतत्सर्वं मनोनिग्रहल
क्षणः अतो निष्ठाफलं येषां ते तथा॥ ननु ध्यानांगत्वं तेषां प्रसिद्धं तत्राह॥ मनसः समाधिर्निग्रह एव परो योगो ज्ञानं॥ ४६॥

॥राम॥
॥९२॥

अतोयस्यमनःसमाहितंभवतितस्यकिंकृत्यमस्तिवेतिपरंप्रश्नपरिहारान्निवस्वयमेवाह॥असंयतंविक्षिप्तंचेत्॥यद्वावि
नश्यतश्चालस्यादिनालीयमानंचेद्भवेत्तर्हिएभिर्ध्यानादिभिःकिंपरंप्रयोजनंस्यात्॥नकिंचिदित्यर्थः॥४७॥नन्वितरेन्द्रि
यजयःप्रयोजनंस्यात्तत्राह॥मनोवशाइति॥इन्द्रियाणितदधिष्ठातारोवा॥भीष्मोयोगिनामपिभयंकरोमनोलक्षणोदे
वःकुतःसहसःबलादपिबलिनोवासहीयान्अतस्तंयोवशवर्तिनंकुर्यात्॥सएवदेवदेवःसर्वेन्द्रियजेताभवितानान्यः॥

समाहितंयस्यमनःप्रशान्तंदानादिभिःकिंवदतस्यकृत्यं॥असंयतंयस्यमनोविनश्यद्दानादिभिश्चेदपरंकि
मेभिः॥४७॥मनोवशेऽन्येह्यभवंस्मदेवामनस्त्वनान्यस्यवशंसमेति॥भीष्मोहिदेवःसहसःसहीयान्युञ्ज्याद्वशेतंस
हिदेवदेवः॥४८॥तंदुर्जयंशत्रुमसह्यवेगंमरुंतुदंतंनविजित्यकेचित्॥कुर्वंत्यसद्ग्रहमत्रमर्त्यैर्मित्राण्युदासीनरि
पून्विमूढाः॥४९॥देहंमनोमात्रमिमंगृहीत्वाममाहमित्यंधधियोमनुष्याः॥एषोहमन्योयमितिभ्रमेणदुरंतपा
रेतमसिभ्रमंति॥५०॥७

तथाचश्रुतिः॥मनोवशोसर्वमिदंबभूवनान्यस्यमनोवशमन्वियाय॥भीष्मोहिदेवःसहसःसहीयानिति॥४८॥तन्नि
ग्रहव्यतिरेकेणतरनिग्रहायप्रवृत्तामूढाइत्याह॥अतःअसह्यरागाद्यावेगायस्यतं॥अतएवअरुंतुदंअरुर्मर्मतत्तु
दतिव्यथयतीत्यरुंतुदस्तं॥ततःनतिघ्नेःतंनविजित्यअजित्वातत्॥ततःकेचिन्मर्त्यैःकैश्चित्॥असद्ग्रहंकुर्वंति
तत्रचानुकूलप्रतिकूलादीन्॥अन्यान्मित्रादीन्कुर्वंतितेमूढाइत्यर्थः॥४९॥ततश्चानेनप्रकारेणसंसारेभ्रमंतीत्या
ह॥देहमिति॥मनोमात्रपरिकल्पितमिमंस्वदेहमिति॥पुत्रादिदेहंचममेतिस्वीकृत्यतमसिसंसारेभ्रमंति॥५०॥

ह

॥ भा॰ ए॰ ॥
॥९३॥

तदेवं मनस एव सुखदुःखकारणत्वमुपपाद्येदानीं जनादीनां षण्णामकारणत्वं प्रपंचयति ॥ जनस्त्विति षड्भिः ॥ अत्रात्रास्मि
न्पक्षे आत्मनः किं न किंचित् ॥ सुखदुःखकर्मत्वं तत्कर्तृत्वं चेत्यर्थः ॥ कुत इत्यत आह ॥ हि निश्चितं भौमयोर्भूविकार
योर्देहयोस्तत् ॥ न त्वात्मन ॥ अमूर्तस्याक्रियस्य च हननादिषु कर्मकर्तृत्वानुपपत्तेः ॥ तथा दुःखमात्मपर्यवसाय्येवेति
चेत् एवमपि परमात्मनः उभयोरप्येकत्वान्न कोपि विषयोस्तीति स्वदेहदृष्टांतेन दर्शयति ॥ जिह्वामिति ॥ ५१ ॥ यदि देवता
अस्य कनाम तत्रापि पक्षे आत्मनः किं ॥ यतो विकारयोर्विक्रियमाणयोर्देवतयोस्तत् ॥ हस्तेन मुखं भिहतं तेन वा हस्ते दष्टे त
दभिमानिनोर्वन्हीन्द्रयोरेव तत् ॥ न त्वविक्रियस्यानहंकारस्यात्मनः देवतानां च सर्वदेहेष्वभेदात्त कोपि विषयोस्तीति ॥

जनस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनश्चात्र हि भौमयोस्तत् ॥ जिह्वां क्वचित्संदशति स्वदद्भिस्तद्वेदनायां कतमाय
कुप्येत् ॥ ५१ ॥ दुःखस्य हेतुर्यदि देवतास्तु किमात्मनस्तत्र विकारयोस्तत् ॥ यदंगमंगेन निहन्यते क्वचित्क्रुध्येत कस्मै
पुरुषः स्वदेहे ॥ ५२ ॥ आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजः स्वभावः ॥ न ह्यात्मनोन्यद्यदि तन्मृषा स्या
त् क्रुध्येत कस्मान्न सुखं न दुःखं ॥ ५३ ॥ ७

स्वदेहदृष्टांतमाह ॥ यत्र यद्यंगं देवताधिष्ठानं हस्तमुखादि ॥ अत एव पूर्ववत्तद्देवतानधिष्ठानभूविकारवतोदाहरणं ॥ ५२ ॥
आत्मनः सुखदुःखाद्याकारपरिणामः अतः स एव हेतुर्यदि स्यात्तत्तत्र तस्मिन्पक्षे अन्यतः किं न किंचिदन्यतो भवति
यस्मै कुप्येदित्यर्थः ॥ यतो निज एव स्वभावः सः न त्वात्मनस्तथापरिणामान्यन्निमित्ताभवति ॥ अतोस्ति कोपि विषय
इति चेत्तत्राह ॥ नहीति ॥ आत्मव्यतिरिक्तं नास्त्येव यदि स्यादस्तीति प्रतीयेत तर्हि तन्मृषैव ॥ अतः कस्माद्धेतोः क्रुध्येत य
तो नास्ति निमित्तं ॥ न च सुखदुःखं चेत्यर्थः ॥ ५३ ॥ ७ ॥

॥ राम॰ ॥
॥९३॥

गृहपक्षेप्यजस्यात्मनः किं ॥ यतः जन्यत इति जनो देहस्तस्यैव जन्मलग्नापेक्षयाष्टमद्वादशाष्टमादिराशिस्थास्ते सुखदुःखयोर्निमि
त्तं भवंति ॥ किंच अंतरिक्षस्थे ग्रहे स्तन्नस्य ग्रहस्यैव पादाद्रुद्धिदृष्ट्यादिभेदैः पीडां वदंति विद्वांसः ननु गृहकोणादिस्थितस्य त
स्य तत् ॥ दृष्टिगोचरस्य पुरुषस्य ग्रहगतैव पीडा तल्लग्नोत्पन्नदेहे तस्याभिमानाद्भवति ॥ अतः पुरुषः ततो ग्रहाद्देहाच्चान्यः कस्मै क्रु
ध्येत ॥ ५४ ॥ कर्म हेतुश्चेत्तत्रास्मिन्पक्षे सत्योपगमः ॥ कर्मैव नास्ति ॥ कुतस्तस्य हेतुत्वमिति ॥ तदाह ॥ हि यस्मात् ॥ तत्कर्म एकस्य जडाज
डत्वे सति स्यात् ॥ जडत्वाद्धि कार्यित्वोपपत्तेः अजडत्वाच्च हितानुसंधानतः प्रवृत्तिसंभवात् ॥ अचित्तु जडो देहः अतस्तस्य प्रवृ
त्तिर्न संभवति ॥ पुरुषस्तु सुपर्णः शुद्धज्ञानस्वरूपः अतः कस्मै क्रुध्येत ॥ यतः सुखदुःखयोर्मूलभूतं कर्मैव नास्तीति ॥ ५५ ॥

ग्रहा निमित्तं सुखदुःखयोश्चेत्किमात्मनो ऽजस्य जनस्य तद्वै ॥ ग्रहैर्ग्रहस्यैव वदंति पीडां क्रुध्येत कस्मै पुरुषस्ततोन्यः ॥ ५४ ॥
कर्मास्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तद्धि जडाजडत्वे ॥ देहस्त्वचित्पुरुषोयं सुपर्णः क्रुध्येत कस्मै न हि कर्म मूलं ॥ ५५ ॥
कालस्तु हेतुः सुखदुःखयोश्चेत्किमात्मनस्तत्र तदात्मकोसौ ॥ नाग्नेर्हि तापो न हिमस्य तत्स्यात्क्रुध्येत कस्मै न परस्य द्वं
द्वं ॥ ५६ ॥ न केनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य ॥ यथाहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति भूतैः ॥ ५७ ॥

तत्र कालपक्षेपि आत्मनः किं यतोसौ कालात्मक एव ॥ अंशांशित्वात् ॥ स्वांशस्य स्वतः पीडा नास्ती यत्र दृष्टांतः नाग्नेर्हितो स्वतदंश
स्य ज्वालादेस्तापः दाहतानाशो नास्ति ॥ तत्रोपाधिभूतकाष्ठादाहात नाशः स्यात् ॥ इति दृष्टांतांतरमाह ॥ हिमस्य तद्धेसं तुह
शस्य तुषारकणस्य नाशः कस्यात् इत्यर्थः ॥ किंच ॥ आस्तामंशांशत्वं वस्तुतः पर एवायं ॥ न च परस्य द्वंद्वं सुखदुःखादिकमस्ती
ति ॥ ५६ ॥ तदेवं षड् एते हेतवः प्रसिद्धाः निरस्ताः यदि किंचित् द्वंद्वं तर्हि तत्संसरमुत्पादयेत् तदपि वस्तुमहिमावेक्षायां न संभवतीत्याह ॥ न
केनचिदिति ॥ नन्वपरोक्षः कथमपह्नूयते तत्राह ॥ यथेति ॥ संसृतिमविद्यमानामेव रूपयति प्रकाशयतीति तथा च तस्य
अहमः अहंकारस्य यथा स्यात् ॥ न तथा परतः प्रकृतेः परस्यात्मनो द्रूसबंधः ॥ अहंकारनिमित्तोसौ न वास्तव इत्यर्थः

अतोऽहमप्येतयैव परमात्मनिष्ठया तरिष्यामीत्याह। एतामिति। सोऽहमित्यन्वयः॥ नन्वियं निष्ठैव कथं भवेत्। तदाह। मुकुंदेति॥५८॥ प्रस्तावेन सह गाथार्थं संक्षेपतो दर्शयति द्वाभ्यां॥ इत्येवं नष्टद्रविणो निर्विण्णो गतक्लमः प्रव्रज्य गां पर्यटन्नसद्भिर्निराकृतोऽपि स्वधर्मादकंपितः सन्मुनिरमूं गाथामगायदित्यन्वयः॥५९॥ मित्रोदासीनरिपवः सर्वोऽपि संसा

एतां समास्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महर्षिभिः॥ अहं तरिष्यामि दुरंतपारं तमो मुकुंदांघ्रिनिषेवयैव॥५८॥ श्रीभगवानुवाच॥ निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य गां पर्यटमान इत्थं॥ निराकृतोऽसद्भिरपि स्वधर्मादकंपितोऽमूं मुनिराह गाथां॥५९॥ सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः॥ मित्रोदासीनरिपवः संसारस्तमसः कृतः॥६०॥ तस्मात्सर्वात्मना तात निगृहाण मनो धिया॥ मय्यावेशितया युक्त एतावान्योगसंग्रहः॥६१॥ य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां समाहितः॥ धारयंश्रावयेच्छृण्वन्द्वंद्वैर्नैवाभिभूयते॥६२॥ इति भागवते महापुराणे एकादशस्कंधे भिक्षुगीतायां त्रयोविंशोऽध्यायः॥२३॥

रः तमसः अज्ञानतः आत्मनो मनसो विभ्रममात्रकृतः न तात्विक इत्यर्थः॥६०॥ उक्तं द्वंद्वसंहननोपायमुपसंहरति। तस्मादिति॥६१॥ मनोनिग्रहाच्चान्योऽप्येवं श्रवणादिनिष्ठस्तत्फलं प्राप्नोतीत्याह॥ य इति॥ द्वंद्वैः सुखदुःखादिभिः॥६२॥ इति भागवते एकादशस्कंधे श्रीभागवतभावार्थदीपिकायां भिक्षुगीतं त्रयोविंशोऽध्यायः॥२३॥

भिक्षुगीताभिषंकृत्वाभक्तचित्तगतंहरिः॥मोहंनिघ्नन्निहाभातिपरमानंदरूपतः॥१॥चतुर्विंशेतुसांख्येनमनोमोहोनिवार्यते॥आ
त्मनःसर्वभावानामागमापायचिंतया॥२॥स्वपदंदृष्टंभक्तानामदृष्ट्वायसंयमं॥चित्तस्योक्तापुनःकृष्णःसांख्यमत्राहतत्कृते॥३॥
अद्वितीयात्परमात्मनोमाययाप्रकृतिपुरुषद्वारासर्वंद्वैतमुदेति॥पुनस्तत्रैवलीयतइत्यनुसंधानस्यदृढ़भ्रमोनिवर्ततइतिवृ
त्तुसांख्यंप्रस्तौति॥अथेति॥पूर्वैःकपिलादिभिर्विनिश्चितंवैकल्पिकंभेदनिमित्तंभ्रमंसुखदुःखादिरूपं॥१॥अथोचादःकाले
ज्ञानंद्रष्टातेनदृश्यःकृत्स्नोप्यर्थश्चअविकल्पितंविकल्पशून्यमेकमेवब्रह्मण्येवलीनमासीदित्यर्थः॥कदेत्यपेक्षायामाह॥आयु

॥श्रीभगवानुवाच॥अथतेसंप्रवक्ष्यामिसांख्यंपूर्वैर्विनिश्चितं॥यद्विज्ञायपुमान्सद्योजह्याद्वैकल्पिकंभ्रमं॥१॥आसीत्
ज्ञानमथोअर्थएकमेवाविकल्पितं॥यदाविवेकनिपुणाआदौकृतयुगेयुगे॥२॥तन्मायाफलरूपेणकेवलंनिर्वि
कल्पितं॥वाङ्मनोगोचरंसत्यंद्विधासमभवद्बृहत्॥३॥तयोरेकतरोह्यर्थःप्रकृतिःसोभयात्मिका॥ज्ञानंत्वन्यतमोभावः
पुरुषःसोऽभिधीयते॥४॥तमोरजःसत्वमितिप्रकृतेरभवन्गुणाः॥मयाप्रक्षोभ्यमायाःपुरुषानुमतेनच॥५॥ छ ७

गेयुगेभ्यःपूर्वंप्रलयइत्यर्थः॥तथाआदौयत्कृतयुगंतस्मिंश्च॥अन्यदापियदाविवेकनिपुणाःजनाःभवंतितदापितेषांभेदा
स्फूर्तेः॥२॥तद्बृहत्ब्रह्मवाङ्मनोगोचरंयथाभवतितथामायादृश्यफलंतत्प्रकाशःतद्रूपेणद्विधाऽभवत्॥३॥तयोर्द्विधा
भूतयोरंशयोर्मध्येउभयात्मिकाकार्यकारणरूपिणी॥४॥अभवन्अभिव्यक्ताबभूवुः॥मयापरमेश्वरेणजीवादृष्ट
प्रयुक्तत्वात्सृष्टेःपुरुषानुमतत्वं॥यद्वास्वस्यैवप्रकृतीक्षणरूपापापुरुषावस्थातदनुमतेनतत्तद्द्वारेणेत्यर्थः॥५॥ छ

सूत्रंक्रियाशक्तिमान्प्रथमोविकारः ततोमहान्ज्ञानशक्तिः॥नन्वयंमहानेवप्रथमोविकारःप्रसिद्धस्तत्राह॥सचज्ञानक्रि
यागर्भत्वात्सूत्रेणसंयुतःनपृथक्॥एकमेवतत्त्वंक्रियाज्ञानशक्तिभ्यांद्विधोच्यतेइत्यर्थः॥विमोहनःजीवस्यभ्रमहेतुःसंजा
तः॥६॥यतस्तन्मात्रादीनांकारणंमनःशब्देनदेवानामप्युपलक्षणं॥चिदचिन्मयःचिदाभासव्याप्तत्वादुभयग्रंथिरूपइति
जीवोपाधित्वंदर्शितं॥यद्यपितस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यादिश्रुतेरन्नमयंहिसौम्यमनइत्यादिश्रुतेश्च
प्रथमंभूतानिजायंतेतेभ्यश्चापंचीकृतेभ्यःप्राणादिक्रमेणसमष्ट्यात्मकलिंगशरीरं॥पंचीकृतेभ्यश्चब्रह्मांडंतस्मिन्

तेभ्यःसमभवत्सूत्रंमहान्सूत्रेणसंयुतः॥ततोविकुर्वतोजातोयोऽहंकारोविमोहनः॥६॥वैकारिकस्तैजसश्चतामस
श्चेत्यहंत्रिधा॥तन्मात्रेंद्रियमनसांकारणंचिदचिन्मयः॥७॥अर्थस्तन्मात्रकाज्जज्ञेतामसादिंद्रियाणिच॥तैज
सादेवताआसन्नेकादशचवैकृतात्॥८॥मयासंचोदिताभावाःसर्वेसंहत्यकारिणः॥अंडमुत्पादयामासुर्ममा
यतनमुत्तमं॥२॥९

विराजस्तदंतर्यामीलीलाविग्रहःक्षीराब्धिशायीश्रीनारायणःतन्नाभिपद्मेचवैराजस्यभोगविग्रहश्चतुराननःततोय
था॰ऽवसरमन्येषांजीवानामाविर्भावइतिप्रक्रियातथापिचिदचिदभिव्यक्तिपूर्वकोऽहंकारस्ततोभूतेंद्रियादिव्यवहारः॥इ
त्येतावतामहदादिक्रमेणसृष्टिरुच्यते॥तथाचोक्तं॥मल्लोहविस्फुलिंगाद्यैःसृष्टिर्याचोदिताऽन्यथा॥उपायःसोऽवताराय
नास्तिभेदःकथंचनेति॥७॥तस्मात्त्रिविधात्त्रिविधप्रपंचोत्पत्तिंदर्शयति॥अर्थइति॥तन्मात्रकात्शब्दादितन्मात्रकार
णात्तामसात्तदाशयोर्महाभूतरूपाजज्ञेबभूव॥भूतानामावरकस्वभावात्॥इंद्रियाणिदशतैजसात्राजसात्॥तेषांप्रवृ
त्तिस्वभावत्वात्॥वैकृतात्सात्विकात्देवताःदिग्वातार्कप्रचेतोश्विवन्हींद्रोपेंद्रमित्रकाश्चंद्रश्चेत्येकादश॥चशब्दान्मनश्च

सलिलेसंस्थियस्यतत्सलिलेसंस्थितिः तस्मिन्सलिलसंस्थितोऽण्डेश्रीनारायणरूपोलीलाविग्रहेणसमभवंस्थितइत्यर्थः ॥
विश्वाख्यंलोककारणंभूतंतत्रचात्मभूः चतुराननरूपभोगविग्रहेणपुनर्वैराजएवतस्मिन्नाविर्भूतइत्यर्थः ॥ २० ॥ रजसा
युक्तोमदनुग्रहात्तपसाऽसृजत ॥ भूः अतलादिसहिता भुवः अंतरिक्षलोकः स्वः स्वर्गलोकः महर्लोकादिरप्युपलक्षणं ॥ २१
लोकसृष्टिप्रयोजनमाह ॥ देवानामितिसार्द्धेन ॥ ओको निवासः परस्थानं ॥ त्रितयात्परं महर्लोकादि ॥ भूमेरधः अतलादि ॥ २२

तस्मान्नहंसमभवमंडेसलिलसंस्थिते ॥ ममनाभ्यामभूत्पद्मंविश्वाख्यंतत्रचात्मभूः ॥ २० ॥ सोऽसृजत्तपसायुक्तोर
जसामदनुग्रहात् ॥ लोकान्सपालान्विश्वात्माभूर्भुवःस्वरितित्रिधा ॥ २१ ॥ देवानामोकआसीत्स्वर्भूतानांचभुवःप
दं ॥ मर्त्यादीनांचभूर्लोकः सिद्धानांत्रितयात्परं ॥ अधोऽसुराणांनागानांभूमेरोकोऽसृजत्प्रभुः ॥ २२ ॥ त्रिलोक्यांगत
यःसर्वाःकर्मिणांत्रिगुणात्मनां ॥ योगस्यतपसश्चैवन्यासस्यगतयोमलाः ॥ महर्जनस्तपःसत्यंभक्तियोगस्यमद्गतिः ॥
॥ २३ ॥ मयाकालात्मनाधात्राकर्मयुक्तमिदंजगत् ॥ गुणप्रवाहएतस्मिन्नुन्मज्जतिनिमज्जति ॥ २४ ॥ अणुर्बृहत्कृशः
स्थूलोयोयोभावःप्रसिध्यति सर्वोप्युभयसंयुक्तः प्रकृत्यापुरुषेणच ॥ २५ ॥

एवंव्यवस्थायांकारणमाहसार्द्धेन ॥ त्रिलोक्यांपातालादिसहितायां ॥ योगादितारतम्येनयथोत्तरंमहर्लोकाद्यः मद्गतिर्वै
कुंठलोकः ॥ २३ ॥ तत्रतुमद्गतिव्यतिरि॰केणतरागतयश्चंचलाइत्याह ॥ वैराग्यार्थंमयाकालशक्तिनाधात्रापरमेश्वरेणक
र्मफलप्रदेनहेतुभूतेन ॥ गुणप्रवाहेसंसारे ॥ उन्मज्जतिनिमज्जति ॥ आसत्यलोकमुत्तमागतीःप्राप्नोति ॥ पुनर्निमज्जति ॥
आस्थावरंनीचाःगतीःप्राप्नोति ॥ २४ ॥ सृष्टिनिरूपणस्याद्वितीयात्मप्रतिपत्त्यर्थत्वात् ॥ तत्प्रतिपादनायकारणेनकार्यस्य

व्याप्तिमाह ॥ अणुरिति ॥ उभयेनसंयुक्तोव्याप्तः तदेवाह ॥ प्रकृत्येति ॥ २५ ॥

इदानीं कार्यस्य कारणात्मतां दर्शयति ॥ यस्य कार्यस्य यः आदिः कारणं ॥ अंतः लयः स्यान्नुं च तस्य मध्यं मध्यभावस्यापि स एव ॥
वैमसिद्धं मृत्सुवर्णादिषु ॥ अत एवाव्यभिचारित्वात्स एव सन्नेतरः ॥ अलं तर्हि मिथ्याभूतकार्यसत्त्वं स्यात्तत्राह ॥ विकार इति ॥
तैजसा इति ॥ तैजसाः कटककुंडलादयः ॥ पार्थिवा घटशरावादयश्च यथेति ॥ १६ ॥ नन्वेवं तर्हि स्वकार्यं प्रति महदादीनामप्याद्यं
तद्रूपत्वात् ॥ सत्यत्वं स्यात्तत्राह ॥ यदिति ॥ यद्रूपमुपादाय उपादानकारणतया स्वीकृत्य पूर्वः कारणरूपो महदादिर्भावः परं
अहंकारादिकं ॥ भावं विकुरुते सृजति ॥ यथा पिंडो मृदमुपादाय स्वयं निमित्तभूतो घटं सृजति तद्वत्स एव सन्निति ॥ पूर्वं
स्यानुषंगः ॥ कथं तर्हि मृत्तिकैव सत्यमित्यादिश्रुतेस्तत्राह ॥ आदिरिति ॥ यद्यदा यस्यादिरंतः अविवक्षते तत्तदा तत्सम

यस्त्वयस्यादिरंतश्च स वै मध्यं च तस्य सत् ॥ विकारो व्यवहारार्थो यथा तैजसपार्थिवाः ॥ १६ ॥ यदुपादाय पूर्वस्तु भावो
विकुरुते परं ॥ आदिरंतो यदा यस्य तत्सत्यमभिधीयते ॥ १७ ॥ प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ॥ सतोभि
व्यंजकः कालो ब्रह्म तत्त्रितयं त्वहं ॥ १८ ॥ सर्गः प्रवर्त्तते तावत्पौर्वापर्येण नित्यशः ॥ महान्गुणविसर्गार्थः स्थित्यंतो याव
दीक्षणं ॥ १९ ॥

भिधीयते ॥ अत्यापरमकारणस्यात्मनः सत्यत्वविकल्पयेसर्थ ॥ १७ ॥ ननु तथापि प्रकृतिपुरुषकालानामकार्यभूतानां भिन्न
त्वात् ॥ कथमद्वितीयता तत्राह ॥ प्रकृतिरिति ॥ अस्य सतः कार्यस्योपादानं या प्रकृतिः प्रसिद्धा ॥ यश्च तस्याधारः अधि
ष्ठाता पुरुषः यश्च गुणक्षोभेणाभिव्यंजकः कालस्तत्त्रितयं ब्रह्मरूपोहमेव ॥ न तु पृथक् प्रकृतेः शक्तित्वात् ॥ पुरुषकालयो
रवस्थारूपत्वात् ॥ १८ ॥ एवं तावत्कालत्रयेप्यव्यभिचारित्वात् ॥ ब्रह्मैव सत्यमिति वक्तुं तस्य सद्विकारणत्वेनादौ सत्त्वमुक्त्वा म
ध्येपि तस्यैव सत्त्वमुपपादयितुं तत्प्रवाहित्वेन सत्त्वं दर्शयति ॥ सर्गप्रवाहरूपायाः स्थितेरवधिमाह ॥ सर्ग इति ॥ महान् बहुलः
पौर्वापर्येण पितृपुत्रादिरूपेण नित्यशः अविच्छेदेन ॥ किमर्थं प्रवर्त्तते तदाह ॥ गुणेषु देहेषु विविधयोः सृज्यत इति गुणविसर्गो

जीवः तदर्थः तद्भोगप्रयोजनः किंपर्यंतं प्रवर्त्तते ॥ यावत्स्थिते रंतः सोपि किमवधिः तदाह ॥ यावदीक्षणं परमेश्वरस्य तावत् ॥ १९ ॥

प्रलयं निरूपयति॥ विराट् ब्रह्मांडमयः कालात्मना साध्यमानः व्याप्यमानः लोकानां महः सप्तविप्लवाः विविधाः कल्पाः ते यस्मिन् तं तादृशः स्वस्मिन् विकल्पयतीति तथा॥ स तथाभूतोऽपि पंचत्वरूपाय विशेषाय विभागाय कल्पते योग्यो भवति॥ पंचानां भूतानां मैक्यरूपस्तेषां पृथग्भावापत्ति यानान्यपतीत्यर्थः॥२०॥ तत्र तस्माद्धि एतस्मादात्मनः आकाशः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधिभ्योऽन्नं अन्नाद्रेतः रेतसः पुरुष इति श्रुतिक्रमसृष्टिक्रमं प्रातिलोम्येन प्रलयमाह॥ अन्न इति॥ मर्त्यशरीरं येनापचितं तस्मिन्नन्ने शतवर्षायामनावृष्ट्यां क्षीणे सति तत्रैव लीयत इत्यर्थः॥ अन्नं धानास्थबीजमात्रावशेषं भवतीत्यर्थः॥ धानाः भूमौ उत्पादनप्ररोहंतीत्यर्थः॥ भूमिर्गंधे संवर्तकादित्यशोषिता संकर्षणमुखाग्नि

विराण्मयासाध्यमानो लोककल्पविकल्पकः॥ पंचत्वाय विशेषाय कल्पते भुवनैः सह॥२०॥ अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते॥ धाना भूमौ प्रलीयंते भूमिर्गंधे प्रलीयते॥२१॥ अप्सु प्रलीयते गंधो आपश्च स्वगुणे रसे॥ लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते॥२२॥ रूपं वायौ स च स्पर्शे लीयते सोऽपि चांबरे॥ अंबरं शब्दतन्मात्र इंद्रियाणि स्वयोनिषु॥२३॥

नादग्धा च सती भूतसूक्ष्मगंधमात्रावशेषा भवति॥२१॥ अप्सु गंधः शतवर्षा वृष्ट्याप्लाव्यमानो प्सु लीयते॥ एवमेवापश्च ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवंति॥ ततो रसोऽपि तस्मिन् लीयते॥ ज्योतिश्च वायुनाभिभूयमानं रूपमात्रं सत् तस्मिन् लीयते॥२२॥ वायुश्च कालप्रेरितेनांबरेण ग्रस्तः स्पर्शमात्रः सन् तस्मिन्नंबरं च भूतादिनाऽहंकारेण ग्रस्यमानं शब्दतन्मात्रे॥ एवं तामसाहंकारकार्यस्य शब्दपर्यंतं लयमुक्त्वा राजसाहंकारकार्यस्याप्याह॥ इंद्रियाणि स्वयोनिषु स्वप्रवर्तकदेवतासु॥ तेषां प्रवृत्तिस्वभावत्वात्॥ प्रवृत्तेश्च देवताधीनत्वात्॥ तासु लय इति वाचा युक्तिः॥ वस्तुतस्तु स्वकारणे राजसाहं

योनिरिंद्रियदेवतागतत्वादेकत्वम विवक्षितं॥ योनयः देवतास्ता मनसि॥ कुतः ईश्वरे नियंतरि मनोयतोऽन्येषां भवं स्मदेवाहंस्
कृत्वात् इंद्रियलयोक्त एवान्नाप्यभिप्रायः॥ मनश्च देवताभिः सह वैकारिकेऽहंकारे स्यार्थः॥ तामसाहंकारकार्यावशेषजित
स्य शब्दस्य लयमाह॥ शब्दो भूतादिं तामसाहंकारं अप्येति तस्मिन् लीयत इत्यर्थः॥ भूतादिरिति कपलक्षणं॥ त्रिविधोप्य
हंकारो महति॥ जडांशं विहाय ज्ञानक्रियाशक्तिमात्ररूपो भवति॥ कथंभूतः प्रभुः समर्थः सर्वजन्मोगेहकत्वात्॥२४॥
सच महान् स्वकारणेषु गुणेषु ज्ञानक्रियाशक्तिमत्वाद्गुणवत्तमस्ताद्भावं विहाय गुणमात्ररूपो भवति॥ तेऽव्यक्ते प्रकृ

योनिर्वैकारिके सौम्य लीयते मनसीश्वरे॥ शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः॥२४॥ स लीयते महान्स्वेषु गुणे
षु गुणवत्तमः॥ तेऽव्यक्ते संप्रलीयंते तत्काले लीयतेऽव्यये॥२५॥ कालो मायामये जीवे जीव आत्मनि मय्यजे॥ आत्मा
केवल आत्मस्थो विकल्पापायलक्षणः॥२६॥७

तौ साम्यावस्थां गच्छंतीत्यर्थः॥ तदव्यक्तं काले कालाधीनत्वात्तेनैकीभूयावतिष्ठते॥ अव्यये उपरतवृत्तौ॥२५॥ मायामये
मायाप्रवर्त्तके ज्ञानमये वा॥ अत एव जीवतीति जीवः तस्मिन् महापुरुषे॥ अयं भावः॥ विश्वसृष्टेर्महापुरुषस्योपक
रणरूपः कालो वस्तुतो नसृज्यश्च॥ अतस्तदात्मनावतिष्ठत इत्यर्थः॥ तदुक्तं सप्तमे॥ कालं चरंतं सृजतीश आश्रयं
प्रधानपुंभ्यां नरदेव सत्यकृदिति॥ दशमे च॥ योयं कालस्तस्य तेऽव्यक्तबंधोचेष्टामाहुश्चेष्टते येन विश्वं॥ निमेषादि
वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्य इति॥ जीव आत्मनि प्रकृते लीनः तेन प्रतियोग्यभावात् परिपूर्णेन स्वरू
पेणावतिष्ठते आत्मा तु आत्मस्थ एव नान्यत्र लीयते यतः केवलो निरुपाधिः॥ तत्र हेतुः॥ विकल्पापायाभ्यां विश्वोत्पत्ति
लयाभ्यां लक्ष्यते॥ अधिष्ठानत्वेनावधित्वेन चेति तथा सः॥२६॥

अस्यकथनस्यप्रसक्तोपयोगमाह॥एवमिति॥मनसःकथंभेदनिमित्तोभ्रमःस्यात्जातोवाकथंहृदितिष्ठेदिति॥२७॥उपसं
हरति॥एषइति॥प्रतिलोमानुलोमाभ्यांसृष्टिसंसाराभ्यांपरावरदृशामयासर्वज्ञेनेत्यर्थः॥प्रत्यक्षमिवयेनेदंदर्शितंतत्त्वमा
त्मनः॥सांख्यप्रख्यानतस्तस्मैहरयेगुरवेनमः॥२८॥इत्येकादशेचतुर्विंशोध्यायः॥२४॥छ॥पंचविंशेस्वतैगुण्यप्रतिप
द्येनिरूप्यते॥चित्तप्रभवसत्त्वादिगुणवृत्तिरनेकधा॥१॥प्रकृतिपुरुषविवेकज्ञानवतोपियावत्प्रयत्नविशेषेणगुणत्र
यवृत्तिजयोनस्यात्तावत्तद्दृष्टोपरमःअतस्तज्जयोपायकथनायगुणवृत्तिनिरूपणार्थमाह॥गुणानामिति॥सहमिश्री

एवमन्वीक्षमाणस्यकथंवैकल्पिकोभ्रमः॥मनसोहृदितिष्ठेतव्योम्नीवार्कोदयेतमः॥२७॥एषसांख्यविधिःप्रो
क्तःसंशयग्रंथिभेदनः॥प्रतिलोमानुलोमाभ्यांपरावरदृशामया॥२८॥इतिश्रीभागवते॰एकादश॰भगव
दुद्धवसंवादेसांख्यविधिकथनंनामचतुर्विंशोध्यायः॥२४॥छ॥श्रीभगवानुवाच॥गुणानामसंमिश्राणांपुमान्ये
नयथाभवेत्॥तन्मेपुरुषवर्येदमुपधारयशंसतः॥१॥शमोदमस्तितिक्षेक्षातपःसत्यंदयास्मृतिः॥तुष्टिस्त्या
गोऽस्पृहाश्रद्धाह्रीर्दयादिःस्वनिर्वृतिः॥२॥छ

भूयवर्त्तमानाःसंमिश्रानसंमिश्राअसंमिश्रास्तेषांविभक्तानांगुणानांमध्येयेनगुणेनयथायादृशोभवेत्तद्
दकथयतोमत्तोनिबोधेत्यर्थः॥१॥तत्रसत्ववृत्तीराह॥शमइति॥ईक्षाविवेकःतपःस्वधर्मवृत्तिःस्मृतिःपूर्वाप
रानुसंधानं॥तुष्टिर्यथालाभेनसंतोषःसागोव्ययशीलत्वं॥अस्पृहावैराग्यं॥श्रद्धाआस्तिक्यं॥ह्रीःअनुचितेकर्म
णि॥लज्जा॥दयादान॥दयाहानगतिरक्षणमितिस्मरणात्॥आदिशब्देनार्जवविनयादि॥स्वनिर्वृतिःआत्मरतिः॥२॥

॥भा॰ ए॰॥
॥१९॥

रजसो वृत्तीराह ॥ कामो ऽभिलाषः हृद्गतव्यापारः मदो दर्पः तृष्णालाभेऽप्यसंतोषः स्तंभो गर्वः आशीः धनाद्यभिलाषेण द
ब्रतादिभेदबुद्धिः प्रार्थना ॥ भिक्षादिसुखं विषयभोगः महोत्साहः मदेन युद्धाद्यभिनिवेशः यशः प्रीतिः ख्यातिप्रियत्वं ॥ हास्यमुपहासः
वीर्यं प्रभावाविष्कारः बलेनोद्यमः न्यायेनोद्यमः सात्विक एव ॥ २ ॥ तमोवृत्तीराह ॥ क्रोध इति ॥ क्रोधो ऽसहिष्णुता ॥ लोभो व्यय
पराङ्मुखता ॥ अनृतं असत्यमलीकभाषणं ॥ हिंसा द्रोहः याञ्चा प्रार्थना दंभः धर्मध्वजित्वं ॥ क्लमः श्रमः कलिः कलहः शोक
मोहौ ॥ अनुशोचनं भ्रमश्च ॥ विषादार्ती दुःखदैन्यं च ॥ निद्रा तंद्रा ॥ आशा इदं मे भविष्यतीत्यन्वीक्षा ॥ भीः भयं ॥ अनुद्यमो जा

कामईहामदस्तृष्णास्तंभआशीर्भिदासुखं मदोत्साहो यशः प्रीतिर्हास्यं वीर्यं बलोद्यमः ॥ ३ ॥ क्रोधो लोभोऽनृतं हिंसा याञ्चा
दम्भः क्लमः कलिः शोकमोहौ विषादार्ती निद्राशाभिरनुद्यमः ॥ ४ ॥ सत्वस्य रजसश्चैव तमसश्चानुपूर्वशः ॥ वृत्त
यो वर्णितप्रायाः सन्निपातमथो शृणु ॥ ५ ॥ सन्निपातस्त्वहमिति ममेत्युद्धव यामतिः ॥ व्यवहारः सन्निपातो मनोमात्रें
द्रियासुभिः ॥ ६ ॥ धर्मे चार्थे च कामे च यदासौ परिनिष्ठितः ॥ गुणानां सन्निकर्षोयं श्रद्धारतिधनावहः ॥ ७ ॥ ७ ॥

चाकर्षतिधना ॥७॥

यं ॥ ४ ॥ अनुपूर्वशः क्रमेण एताः श्लोकत्रयेणोक्ता वर्णितप्रायाः अन्यास्त्वप्यूह्या इति भावः ॥ ५ ॥ विभक्तानां गुणानां वृत्तयो वर्णि
ताः मिश्राणामाह ॥ सन्निपात इति त्रिभिः ॥ अहं ममेति च मतावुक्तसर्वसवृत्तिसामानाधिकरण्यदर्शनात् सन्निपातत्वं ॥ अ
हंत्वात् कामी क्रोधी इत्यादि ॥ तथा मम शांतिरस्ति कामः क्रोधः इत्यादि द्रष्टव्यं ॥ तत्पूर्वकः सर्वव्यवहारश्च सन्निपातकार्य
मित्याह ॥ व्यवहार इति ॥ अत्र हेतुः ॥ मनश्च मात्राणि चासवश्च तैः मनआदीनां सात्विकतामसराजसत्वात्तैर्व्यवहारः सन्निप
तज इति भावः ॥ ६ ॥ असौ पुरुषो यदा धर्मादिषु परिनिष्ठितो भवति तदा मयः त्रिषु निष्ठारूपः सन्निकर्षः सन्निपातकार्यं धर्मादि
नां ॥ तत्र तमोरजः कार्यत्वात् विषयतः सन्निपातजत्वमुक्तं ॥ फलतश्च तथात्वमाह ॥ श्रद्धेति धनानि सत्वरजस्तमोमया

॥राम॰॥
॥१९॥

धर्मनिष्ठायामेव सन्निपातं दर्शयति ॥ प्रवृत्तिलक्षणे काम्ये धर्मे यदा पुंसो निष्ठा भवति तदा पुमान्यदा गृहाश्रम एवासक्तिस्तिष्ठेत्तत्स्व
नु पश्चात्स्वधर्मं च नित्यनैमित्तिके तिष्ठेत ॥ सापि गुणानां समितिः सन्निपातः ॥ हि यस्मात्काम्यधर्मगृहासक्तिस्वधर्माः रजस्तमः
सत्त्वमयाः इत्यर्थः ॥ ८ ॥ तदेवं मिश्रामिश्रगुणवृत्तीः प्रदर्श्येदानीं पुमान्येन यथा भवेदिति यदुक्तं तद्दर्शयति ॥ पुरुषमिति त्रिभिः ॥
९ ।१० ॥ हिंसा शत्रुमरणादिकमाशास्य यो मां भजेत्तं तामसं विद्यात् ॥ एतैर्गुणैरेवं भूतो भवतीति तात्पर्यार्थः ॥ ११ ॥ ननु तवापि गुणव
शेन कर्तृत्वादि विशेषात्केन विशेषेण त्वं सेव्यो जीवश्च सेवक इति नियमः कुतः यतो मां भजेतेति वारंवारमुच्यते तत्राह ॥ सत्त्वमिति ॥

प्रवृत्तिलक्षणे निष्ठा पुमान्यर्हि गृहाश्रमे ॥ स्वधर्मे चानुतिष्ठेत गुणानां समितिर्हि सा ॥ ८ ॥ पुरुषं सत्त्वसंयुक्तमनुमीयाच्छ
मादिभिः ॥ कामादिभी रजोयुक्तं क्रोधाद्यैस्तमसा युतं ॥ ९ ॥ यदा भजति मां भक्त्या निरपेक्षः स्वकर्मभिः ॥ तं सत्त्वप्रकृतिं वि
द्यात्पुरुषं स्त्रियमेव वा ॥ १० ॥ यदा आशिष आशास्य मां यजेत स्वकर्मभिः ॥ तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसं ॥ ११ ॥
सत्त्वं रजस्तम इति गुणा जीवस्य नैव मे ॥ चित्तजा यैस्तु भूतानां सज्जमानो निबध्यते ॥ १२ ॥ यदेतरौ जयेत्सत्त्वं भास्वरं
विशदं शिवं ॥ तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान् ॥ १३ ॥

जीवस्यैव न मे कुतः यतश्चित्तजाः जीवोपाधौ चित्ते अभिव्यज्यन्ते ॥ अतो यैः स एव बध्यते ॥ कीदृशः भूतानां देहरूपाणां अन्येषां म
ध्ये च सज्जमानः ॥ अहं तु नासज्जमानो गुणनियन्तृत्वेन ॥ सृष्ट्यादिकर्तापि नित्यमुक्तः अतो महान्विशेष इति भावः ॥ यद्वा
भूतानामपंचीकृतानां यत्कार्यं भूतं चित्तं ॥ अन्नमयं हि सोम्य मन इत्यादिश्रुतेः ॥ तत्स्वभावः ॥ अतो भूतोपहितस्य जीवस्यै
वेति ॥ अन्यत्समानं ॥ १२ ॥ तदेवं मिश्रामिश्रगुणकार्याणि प्रदर्श्येदानीमेकैकगुणाधिक्यकार्याणि दर्शयति ॥ यदेति सप्तदशा
भिः ॥ यदेतरौ गुणौ जयेत ॥ अभिभवेत् ॥ भास्वरं प्रकाशकं विशदं स्वच्छं शिवं शान्तं ॥ शिवत्वविशदत्वभास्वरत्वानां यथाक्रमं
सुखधर्मज्ञानहेतुत्वात्तदा तैर्युज्यते ॥ आदिशब्दाच्छमदमादिभिश्च ॥ १३ ॥

तमःसत्वंचकर्मभृतं॥रजःकर्तृसंगंसंगहेतुः॥भिदाभेदहेतुःचलंप्रवृत्तिस्वभावं॥अतःसंगहेतुत्वाद्यत्राश्रियाचयुज्येत॥
तत्कामःपुमान्भवतीत्यर्थः॥भिदाहेतुत्वात्॥दुःखेनयुज्येत॥द्वितीयाद्वैभयंभवतीतिश्रुतेः॥चलत्वात्कर्मणाचयुज्येत॥२५॥
यद्वारजःसत्वंकर्मभृतंतमःकर्मजयेत्तमूढंविवेकभ्रंशकं॥लयंआवरणात्मकंजडंअनुद्यमात्मकं॥अतोमूढत्वात्शो
कमोहहिंसाभिःलयत्वान्निद्रयाजडत्वादुद्यमाभावेनकेवलमात्रायायुज्येतेतिद्रष्टव्यं॥जनइतिपाठेलयात्मकत्वमेवनि
द्रात्रायोर्हेतुः॥२५॥किंचयदाचित्तंप्रसीदेत्तस्वच्छंभवेत्॥निर्वृत्तिरूपरतिः॥तत्तदामत्परंमदुपलब्धिस्थानंसत्वमुद्रिक्तं

यदाजयत्तमःसत्वंरजःसंगंभिदाचलं॥तदादुःखेनयुज्येतकर्मणायत्रासाश्रिया॥२४॥यदाजयेद्रजःसत्वंतमो
मूढंलयंजडं॥युज्येतशोकमोहाभ्यांनिद्रयाहिंसयात्राया॥२५॥यदाचित्तंप्रसीदेतइंद्रियाणांचनिर्वृतिः॥देहेऽभ
यंमनोऽसंगंतत्सत्वंविद्धिमत्पदं॥२६॥विकुर्वन्क्रिययाचाधीरनिवृत्तिश्चचेतसां॥गात्रास्वास्थ्यंमनोभ्रांतंरज
एतैर्निशामय॥२७॥सीदच्चित्तंविलीयेतचेतसोग्रहणेक्षमं॥मनोनष्टंतमोग्लानिस्तमस्तदुपधारय॥२८॥एधमा
नेगुणेसत्वेदेवानांबलमेधते॥असुराणांचरजसितमस्यद्धवराक्षसां॥२९॥७

विद्धि॥२६॥यदापुनःक्रिययाविकुर्वन्विकारंप्राप्नुवत्॥आधीर्भवति॥आसमंताद्धिसिताधीर्यस्यसः॥चेतसांबुद्धींद्रिया
णामनिवृत्तिःअनुपरतिःस्वस्वविषयेषुविसिसत्वेगात्राणिकर्मेंद्रियाणितेषामस्वास्थ्यंविकाराधिक्यंमनोभ्रांतंचंचल
रजउत्कटंनिशामयजानीहि॥२७॥यदासीदत्तूतिराभवत्॥चेतसोग्रहणेचिदाकारपरिणामेऽक्षमंसच्चित्तंविलीय
ते॥मनोपिसंकल्पात्मकंनष्टंलीनंतमोज्ञानंग्लानिर्विषादश्च॥भवति॥तत्तदातमउत्कटंउपधारयविद्धि॥२८॥किंच॥ए
धमानेइति॥इंद्रियाण्येवनिरत्तिप्रवृत्तिस्वभावानिदेवासुरराक्षसाइतिज्ञेयं॥यद्वाप्रसंगाद्दाधिदैविकानांगुणानामु
त्कर्षकार्याणिउक्तानिइतिज्ञेयं॥२९॥७

गुणोत्कर्षतोऽवस्थाभेदं दर्शयति ॥ सत्वादिति ॥ प्रसंगान्निर्गुणावस्थामाह ॥ तुरीयं चतुर्थमवस्थांतरं नाम त्रिषु जागरणादिषु संतत
मेकरूपमात्मतत्वमेवेत्यर्थः ॥ २० ॥ गुणोत्कर्षद्वारेण तत्कर्मफलनिष्ठां दर्शयति ॥ उपर्युपरीति ॥ ब्राह्मणा वेदार्थानुष्ठानाभियुक्ताः
ब्राह्मण इति पाठे ब्रह्मलोकमभिव्याप्येत्यर्थः ॥ आमुख्यात्स्थावरानभिव्याप्य अंतरचारिणः मनुष्या एव भवंति ॥ २१ ॥ देहाद्
क्रांतिकालीनगुणोत्कर्षफलमाह ॥ सत्वे वृद्धे सति प्रलीनाः मृताः रजोलयाः रजसि वृद्धे सति लयो येषां ते एवं तमोलया इत्यपि
निर्गुणा इत्यत्र तु लयश्च द्व्युपाधिनाज्जीवंतोऽपि निर्गुणा अस्मान्मामेव यांतीत्यर्थः ॥ २२ ॥ इदानीं गुणोत्कर्षकृतमेव तत्तत्फलसाधन

सत्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् । प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततं ॥ २० ॥ उपर्युपरि गच्छंति सत्वे
न ब्राह्मणा जनाः । तमसाधोऽध आमुख्याद्रजसांतरचारिणः ॥ २१ ॥ सत्वे प्रलीनाः स्वर्यांति नरलोकं रजोलयाः । तमो
लयास्तु निरयं यांति मामेव निर्गुणाः ॥ २२ ॥ मदर्पणं निष्फलं वा सात्विकं निजकर्म तत् । राजसं फलसंकल्पं हिंसाप्रा
यादि तामसं ॥ २३ ॥ कैवल्यं सात्विकं ज्ञानं रजो वैकल्पिकं तु यत् । प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतं ॥ २४ ॥ वनं
तु सात्विको वासो ग्रामो राजस उच्यते । तामसं द्यूतसदनं मन्निकेतं तु निर्गुणं ॥ २५ ॥ ७

कर्मत्रैविध्यमाह ॥ मदर्पणं मत्प्रीतिहेतोर्ज्ञानकृतं निष्फलं केवलदासभावेन वा कृतं यन्निजकर्म इत्यादि तत्सात्विकं ॥ फलं संक
ल्पितं यस्मिन् तत् ॥ हिंसाप्रायं हिंसोद्देशेन कृतं निष्फलं केवलदासभावेन कृतं यन्निजं कर्म हिंसाबहुलं च ॥ आदिशब्दा
त् दंभमात्सर्यादिकृतं ॥ २३ ॥ इदानीं सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमाह ॥ केवलं देहादिव्यतिरिक्तात्मविष
यं ॥ वैकल्पिकं देहादिविषयं यत्तद्रजः राजसं ॥ प्राकृतं बालमूकादिज्ञानतुल्यं ॥ मन्निष्ठं परमेश्वरविषयं ॥ २४ ॥
वनं विविक्तत्वात्सात्विको वासः ॥ भगवन्निकेतनं तु साक्षात्तदाविर्भावान्निर्गुणं स्थानं ॥ २५ ॥ श्रीदत्तात्रयाय नमः

कारकः कर्त्ता असंगी अनासक्तः रागांधः अत्यभिनिवेशवान्॥ स्मृतिविभ्रष्टः अनुसंधानशून्यः मदाश्रयः मदेकशरणः स
हि निरहंकारत्वान्निर्गुणः॥२६॥ अधर्मे धर्मइतिया श्रद्धा॥२७॥ पथ्यं हितं। पूतं शुद्धं॥ अनायस्तं अनायसतः प्राप्तं आहार्यं
भक्ष्यभोज्यादि इंद्रियाणां प्रेष्टं॥ कट्वम्ललवणादि॥ आर्त्तिदा अशुचि देन्यकरमशुद्धं च॥ चशब्दात् मन्निवेदितं निर्गुणमिस
भिप्रेतं॥२८॥ आत्मोत्थं सुखं मदुपाश्रयमित्यपि तत्तत्पदार्थविषयत्वेन ज्ञानवदूहितव्यं॥२९॥ उक्तं संसारहेतुभूतं त्रै
गुण्यमुपसंहरति। द्वाभ्यां॥ द्रव्यं पथ्यपूतादि। देशो वनग्रामादि॥ फलं सात्विकं सुखमित्यादि॥ कालः यदा भजे तं मां

सात्विकः कारकोऽसंगी रागांधो राजसः स्मृतः॥ तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः॥२६॥ सात्विक्याध्या
त्मिकी श्रद्धा कर्मश्रद्धा तु राजसी॥ तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा॥२७॥ पथ्यं पूतमनायस्तमा
हार्यं सात्विकं स्मृतं॥ राजसं चेंद्रियप्रेष्टं तामसं चार्त्तिदाशुचि॥२८॥ सात्विकं सुखमात्मोत्थं विषयोत्थं तु
राजसं॥ तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयं॥२९॥ द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः॥ श्रद्धावस्था
कृतिर्निष्ठा त्रैगुण्यः सर्व एव हि॥३०॥ सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः॥ दृष्टं श्रुतमनुध्यातं बुद्ध्या वा
पुरुषर्षभ॥३१॥

भक्त्या यदेतरोजयेदित्यादिना यो योर्थो उक्तः ज्ञानं कैवल्यं सात्विकं ज्ञानमित्यादि॥ कर्म मदर्पणमित्यादि॥ कारकः सात्विको
ऽसंगीत्यादि॥ श्रद्धा सात्विक्याध्यात्मिकीत्यादि॥ अवस्था सत्वाज्जागरणमित्या अकृतिः उपर्युपरि गच्छंतीत्यादिनोक्ता दे
वत्वादिरूपा निष्ठा सत्वे प्रलीनाः स्वर्यांतीत्यादिनोक्तस्वर्गादि॥ एवं सर्वोप्ययं भावस्त्रैगुण्यस्त्रिगुणात्मकः॥३०॥
न केवलमेष एव किंतु यावतः पुरुषाव्यक्ताभ्यां अधिष्ठिताः ते सर्वे भावा गुणमया एव तत्र पंच दृष्टमिति॥३१॥ श्री॰॥

इदानीं मुक्तं त्रैगुण्यस्य संसारहेतुत्वमनुवदंस्तन्निर्जयान्मोक्षमित्याह। एता इति सार्द्धेन। येन निर्जिताः स पश्चाद् विक्षिप्ते
न भक्तियोगेन मन्निष्ठः सन्मद्भावाय मोक्षाय प्रतिपद्यते योग्यो भवति॥ ३२॥ तस्माद्विवेकिनामिदमेव युक्तमित्याह।
ज्ञानविज्ञानयोः संभवो यस्मिंस्तमिमं देहं॥ ३३॥ भजनप्रकारमाह। निःसंग इति सार्द्धेन। सत्त्वसंसेवया सात्त्वि

एताः संसृतयः पुंसो गुणकर्मनिबंधनाः॥ येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः॥ भक्तियोगेन
मन्निष्ठो मद्भावाय प्रपद्यते॥ ३२॥ तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं॥ गुणसंगं विनिर्धूय मां भ
जंतु विचक्षणाः॥ ३३॥ निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः॥ रजस्तमश्चाभिजयेत्सत्त्वसंसेवया
मुनिः॥ ३४॥ सत्त्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शांतधीः॥ संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय मां॥ ३५॥
जीवो जीवविनिर्मुक्तो गुणैश्चाशयसंभवैः॥ मयैव ब्रह्मणा पूर्णो न बहिर्नांतरश्चरेत्॥ ३६॥ इति श्री
भागवते महापुराणे एकादशस्कंधे ऽष्टादशसाहस्र्यां वैयासिक्यां भगवदुद्धवसंवादे पंचविंशोऽध्यायः॥
॥ २५ ॥ छ

कान्येव सेवेत पुमान्सत्त्वविवृद्धये इति प्रागुक्तया॥ नैरपेक्ष्येण उपशमात्मकेन सत्त्वेनैव॥ ३४॥ एवं सति मां प्राप्नोतीत्याह॥
संपद्यत इति। जीवं जीवत्वकारणं लिंगशरीरं॥ मां प्राप्तस्य न पुनः संसार इत्याह। जीव इति। न बहिः विषयभोगेन नांत
रः तत्स्मरणेन॥ गुरुकृतामुरुसंसरणप्रथामजितपुण्यकथाकथनादिभिः॥ धुनुतनु भक्तिरसेन विवेकिनो न हि पुनः सु
लभं जनुरीदृशं॥ ३६॥ इत्येकादशे पंचविंशोऽध्यायः॥ २५॥ छ

षड्विंशेयोगनिष्ठायाविघातोदुष्टसंगतः॥साधुसंगेनतन्निष्ठापराकाष्ठेतिवर्ण्यते॥१॥योगिनोयोगविभ्रंशः संगतःसंभवेदिति॥स्व
र्वथातन्निरस्यर्थमैलगीतंवितन्यते॥२॥निःसंगोमांभजेद्विद्वानप्रमत्तोजितेंद्रिय इत्युक्तंतत्रविपक्षेऽनर्थंकथयिष्यन्जीवन्मु
क्तस्यापितर्हिसंगोदुर्निवारइसनर्थःस्यादिसाचांक्यइक्तानुवादपूर्वकंपरिहरतिसार्द्धाभ्यां॥मल्लक्षणंमत्स्वरूपंलक्ष्यते
येनतमिमंदेहलब्ध्वामद्धर्मेभक्तिरक्षणेआस्थितःसन्आत्मसंस्थंआत्मन्येवनियंतृत्वेनस्थितंपरमानंदरूपमात्मानं
मांसमुपैति॥सम्यक्प्राप्नोति॥२॥नचैवंसतस्यविषयसंगोनास्तीत्याह॥गुणमय्येति॥गुणमयीयाजीवयोनिःजीवो

॥श्रीभगवानुवाच॥मल्लक्षणमिमंकायंलब्ध्वामद्धर्मआस्थितः॥आनंदंपरमात्मानमात्मस्थंसमुपैतिमां॥१॥गु
णमय्याजीवयोन्याविमुक्तोज्ञाननिष्ठया॥गुणेषुमायामात्रेषुदृश्यमानेष्ववस्तुतः॥२॥वर्तमानोपिनपुमान्युज्यते
वस्तुभिर्गुणैः॥संगंनकुर्यादसतांशिश्नोदरतृपांक्वचित्॥तस्यानुगस्तमस्यंधेपतत्यंधानुगांधवत्॥३॥ऐलःसम्राडि
मांगाथामगायतबृहच्छ्रवाः॥उर्वशीविरहान्मुह्यन्निर्विण्णःशोकसंयमे॥४॥७

पाधिस्तयाविमुक्तः॥गुणेषुवर्त्तमानोपितैर्नयुज्यतेसंगंप्राप्नोति॥अत्रहेतुः॥अवस्तुभिः॥नन्ववस्तुभिरप्यन्येयुज्यमानाःदृश्यं
तेतत्राह॥अवस्तुत्वेनदृश्यमानेषु॥तथापिसंगंवर्जयेदित्याह॥संगमिति॥असतांलक्षणमाह॥शिश्नोदरेतर्पयंतीतिशि
श्नोदरतृपःतेषांक्वचित्कदाचिदपि॥आस्तांतावद्बहूनांसंगः॥किंतुतस्यैकस्याप्यनुषंगःअनुवर्त्तीअंधमनुगच्छतियोंऽध
स्तद्वत्॥३॥अत्रेतिहासमाह॥ऐलःपुरूरवाःसम्राट्चक्रवर्त्ती॥बृहच्छ्रवाःकीर्तिर्यस्यसःउर्वशीविरहात्प्रथमंमुह्यन्प
श्चात्कुरुक्षेत्रेतांसमागम्यगंधर्वदत्तेनाग्निनाइष्ट्वानिष्ठापुनरुर्वशीलोकंप्राप्यशोकसंयमेशोकापगमेसतिततोनिर्विण्णः

तस्य प्राक्तनीं मोहावस्थामाह ॥ सत्वेति ॥ घोरे तिष्ठेति ॥ हये जाये मनसा तिष्ठ घोरे वचांसि मिश्राकूणवा वहैनु ननौ मंत्रा अनुदिता
सत्तेमयस्करन्पर तेरन्चनाह न्नियेवमंत्रै विलपन् ॥ ५ ॥ वैकूल्यकारणमाह ॥ कामानिति ॥ वर्षाणां यामिनीः यांतीः अपयांतीरायां
तीः अगामिनीः ॥ आकृष्टचेतनायस्य सः ॥ ६ ॥ तस्य गंधर्वलोकं प्राप्तस्य बहुकालमुर्वश्या भोगानंतरं निर्विण्णस्य गाथामाह ॥
अथाद्द्याभिः ॥ तत्राष्टभिः ॥ अनुतापः प्रपंच्यते ॥ अहो इति ॥ यतो मया इमे अहोरात्ररूपाः आयुःखंडाः न स्मृताः ॥ ७ ॥ तद्वा

सत्वात्मानं व्रजंतीं तां नग्न उन्मत्तवन्नृपः ॥ विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लव ॥ ५ ॥ कामानतृप्तोनुजुषन्क्षुल्लो
कान्वर्षयामिनीः ॥ न वेद यांतीर्नायांतीरुर्वश्याकृष्टचेतनः ॥ ६ ॥ ऐल उवाच ॥ अहो मे मोहविस्तारः कामकश्मलचेतसः
देव्या गृहीतकंठस्य नायुःखंडा इमे स्मृताः ॥ ७ ॥ नाहं वेदाभिनिर्मुक्तः सूर्यो वाभ्युदितोमुया ॥ मुषितो वर्षपूगानां बताहा
नि गतान्युत ॥ ८ ॥ अहो मे आत्मसंमोहो येनात्मा योषितां कृतः ॥ क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः ॥ ९ ॥ सपरि
च्छदमात्मानं हित्वा तृणमिवेश्वरं ॥ यांतीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन् ॥ १० ॥ कुतस्तस्यानुभावः स्यात्तेज ईशि
त्वमेव वा ॥ योन्वगच्छं स्त्रियं यांतीं खरवत्पादताडितः ॥ ११ ॥ ७

हा ॥ नाहमिति ॥ अभिनिर्मुक्तः मयि रममाणे अस्तं गतः अभ्युदितो वा सूर्य इति ॥ अमुया उर्वश्या वंचितः बत खेदे ॥ उत अपि व
र्षपूगानामपि गतान्यहानि न वेद इति ॥ ८ ॥ येन संमोहेन आत्मा देहः क्रीडामृगवत् आधीनः ॥ ९ ॥ ननु प्रणयकुपितायाः अनु
नयार्थमधीनता युक्तैवेत्याशंक्य न तत्र तदस्तीत्याह ॥ सपरिच्छदं राज्यादिसहितं ईश्वरं चक्रवर्तिनं तृणमिव त्यक्त्वा यांतीमपि स्त्रि
यमन्वगमं अनुगतोस्मि ॥ १० ॥ किंच मम प्रभावाद्यभिमानो वृथैवेत्याह ॥ कुतः तस्य मे तेजो बलं ॥ खरो यथा पादताडितोपि खरीम
नुगच्छति तद्वत् ॥ ११ ॥ ७ ॥

एवंभूतस्यसर्वंसाधनंव्यर्थमित्याह॥किमिति॥सामेनन्यासेन॥विविक्तेनएकांतसेवया॥मौनेनवाङ्नियमेन॥२२॥अनुतप्तःस
न्नात्मानंनिंदतिद्वाभ्यां॥स्वार्थस्येति॥अकोविदंअज्ञातारं॥गोखरवत्॥गौरिवखरइव॥२३॥अधरासवंसेवमानस्यआ
त्मभूर्मनसिजःपुनःपुनरुद्भवन्॥२४॥एवमष्टभिर्निर्वेदोनिरूपितः॥इदानींतस्यविवेकमाह॥दशभिः॥पुंश्चल्येति॥
अयंभावः॥कर्मभिर्दैवानिष्ठाद्दुःखमेवप्राप्तोस्मि॥अतःपरमेश्वरमेवभजेयमिति॥२५॥परमेश्वरप्रसादंविनादै

किंविद्ययाकिंतपसाकिंत्यागेनश्रुतेनवा॥किंविविक्तेनमौनेनस्त्रीभिर्यस्यमनोहृतं॥२२॥स्वार्थस्याकोविदंधि
ङ्मांमूर्खंपंडितमानिनं॥योहमीश्वरतांप्राप्यस्त्रीभिर्गोखरवज्जितः॥२३॥सेवतोवर्षपूगान्मेउर्वश्याअधरास
वं॥नातृप्यत्यात्मभूःकामोवह्निराहुतिभिर्यथा॥२४॥पुंश्चल्यापहृतंचित्तंकोन्योमोचयितुंप्रभुः॥आत्मारा
मेश्वरमृतेभगवंतमधोक्षजं॥२५॥बोधितस्यापिदेव्यामेसूक्तवाक्येनदुर्मतेः॥मनोगतोमहामोहोनापया
सजितात्मनः॥२६॥किमेतयानोऽपकृतंरज्ज्वावासर्पचेतसः॥रज्जुस्वरूपाविदुषोयोऽहंयदजितेंद्रियः॥२७॥६

रूपदिष्टस्यापिदेव्यावाक्यात्मोहोननिवर्ततइत्याह॥बोधितस्यापीति॥देव्याउर्वश्यासूक्तवाक्येनयथार्थवचनेन॥पुरूरवो
मामृथामाप्रतप्तोमात्वावृकासोअश्रिवासउक्षन्॥नवैस्त्रैणानिसख्यानिसंतिसालावृकाणांहृदयान्येताइत्यनेन॥२६
पुंश्चल्यापहृतंचित्तमित्यादिनातस्याअपकारोस्मतःइदानींममैवायमपराधइत्याह॥किमेतयेति॥नःअस्माकंकामिना
मेतयाकिमपकृतंनकिंचिदपि॥यथारज्जुस्वरूपाविदुषोरज्जुद्रष्टुःपुंसःतस्यांसर्पकल्पनयाखिद्यतोपिरज्ज्वाकिमपकृतं
किमपिनापकृतंतद्वत्॥यद्यस्माद्योहमेवंभूतःसएवाजितेंद्रियत्वादपराधीत्यर्थः॥२७॥

ननुतथापिसैवसौगंध्यप्रेमादिगुणैःसंमोहमूलमिसाहक्वायंक्यतेपिपरिकल्पिताएवेसाह॥चतुर्भिः॥कायमिति॥मलीमसः
अतर्मलिनःसुमनसांकुसुमानामिवगंधस्सौमनस्यंशोभनमनोभावोवा॥१८॥ममत्वमपितस्मिन्परिकल्पितमेवेसाह॥
पित्रोःकिंस्वंकायःजनकत्वात्॥नुइतिवितर्के॥भार्यायावाभोगप्रदत्वात्॥अत्रानुप्रयुक्तमप्येतन्न्यायतुल्यत्वादुक्तं॥
स्वामिनोवा॥आधीनत्वात्॥अग्नेर्वाअंत्यसेष्यतदाहुतित्वात्॥श्वगृध्रयोर्वाभक्ष्यत्वात्॥किंचआत्मनःतत्कृतशुभाशु
भभागित्वात्॥सुहृदांवाउपकारित्वात्॥एवंयोननिश्चीयते॥१९॥तुच्छाकृमिविड्भस्मलक्षणानिष्ठाअंतोयस्मिन्॥

क्वायंमलीमसःकायोदौर्गंध्याद्यात्मकोशुचिः॥क्वगुणाःसौमनस्याद्याह्यध्यासोऽविद्ययाकृतः॥१८॥पित्रोः
किंस्वंनुभार्यायाःस्वामिनोग्नेःश्वगृध्रयोः॥किमात्मनःकिंसुहृदामितियोनावसीयते॥१९॥तस्मिन्कलेवरे
मेध्येतुच्छनिष्ठेविषज्जते॥ अहोसुभद्रंसुनसंसुस्मितंचमुखंस्त्रियः॥२०॥त्वङ्मांसरुधिरस्नायुमेदोमज्जा
स्थिसंहतौ॥विण्मूत्रपूयेरमतांकृमिणांकियदंतरं॥२१॥अथापिनोपसज्जेतस्त्रीषुस्त्रैणेषुचार्थवित्॥विषयेंद्रियसं
योगान्मनःक्षुभ्यतिनान्यथा॥२२॥अदृष्टादश्रुतात्भावान्नभावउपजायते॥असंप्रयुंजतःप्राणान्शाम्यतिस्तिमितंमनः
॥२३॥

कालेकलेवरेप्रियत्वेनगृहीते॥विषंगमेवाह॥अहोइति॥सुनसंशोभननासिकं॥२०॥अतोगुणारोपेणरममाणामाहत्याःकृमि
समाइसाह॥त्वगादिसंहतौतत्संघातेदेहेविण्मूत्रादौसंहतौरमतांकृमीणांवा॥२१॥यद्यप्येवंबीभत्सिताएवस्त्रियःअथापिनो
पसज्जेत॥अवलोकनादिनापिसंगंनकुर्यात्अर्थवित्विवेकी॥अत्रहेतुः॥विषयेति॥२२॥ननुकश्चिन्निमीलितनयनादेरपि
मनःक्षोभोदृश्यते॥सत्यं॥सोपिपूर्वदर्शनादिकंविनानभवतीसाह॥अदृष्टादिति॥भावात्पदार्थात्भावोमनःक्षोभःअतः

प्राणानिंद्रियाणिअसंप्रयुंजतःविषयेष्व...
मितंनिश्चलंस्यात्॥२३॥

इंद्रियैः कृत्वा अविश्रब्ध अविश्वासनीयः माहशामविवेकिनां ॥२४॥ फलितमाहद्वाभ्यां ॥ एवमिति ॥ नृपेषु देवेषु च दिव्य
तीति तथा ॥२५॥ उक्तिभिः हितोपदेशैरिति ॥ तीर्थदेवादिसंगादपि सत्संग श्रेयानिति दर्शयति ॥२६॥ सतां लक्षणमाह
संत इति ॥ विशेषणाष्टकस्य यथेष्टं हेतुहेतुमद्भावः ॥२७॥ न च तेषूपदेशापेक्षा अपि तु केवलं तत्सन्निधिरेव तारयति इत्या

तस्मात्संगो न कर्त्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः ॥ विदुषां चाप्यविश्रब्धः षड्वर्गः किमु माहशां ॥२४॥ श्रीभगवानुवाच ॥
एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय ॥ आत्मानमात्मन्यवगम्य मां वै उपारमज्ज्ञानविधूतमोहः ॥
॥२५॥ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान् ॥ संत एतस्य छिंदंति मनोव्यासंगमुक्तिभिः ॥२६॥ संतोऽनपेक्षा
मच्चित्ताः प्रशांताः समदर्शिनः ॥ निर्ममा निरहंकारा निर्द्वंद्वा निष्परिग्रहाः ॥२७॥ तेषु नित्यं महाभाग महाभागे
षु मत्कथाः ॥ संभवंति हि ता नृणां जुषतां प्रपुनंत्यघं ॥२८॥ ता ये शृण्वंति गायंति ह्यनुमोदंति चादृताः ॥ मत्पराः
श्रद्दधानाश्च भक्तिं विंदंति ते मयि ॥२९॥ भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते ॥ मय्यनंतगुणे ब्रह्मण्यानं
दानुभवात्मनि ॥३०॥ यथोपश्रयमाणस्य भगवंतं विभावसुं ॥ शीतं भयं तमोऽप्येति साधून्संसेवयातथा ॥
॥३१॥ निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायणं ॥ संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां ॥३२॥ ७ ७ ७

ह ॥ सद्भिः ॥२८॥ श्रवणादिभिरेवं मत्पराः श्रद्दधानाश्च संतो भक्तिं विंदंति ॥२९॥३०॥ विभावसुमग्निं सेवमानस्य त्रयमप्येति
नश्यति ॥ तथा कर्माद्विजाड्यं आगामिसंसारभयं तन्मूलमज्ञानं च नश्यतीत्यर्थः ॥३१॥ निमज्ज्योन्मज्जतां उच्चावचयोनीर्ग
च्छतां परमायणं परमाश्रयः ॥३२॥ ७

किंचयथान्नमेवप्राणोजीवनंअहमेवयथाशरणंधर्मएवयथाश्रेयपरलोकेवित्तंतथासंतएवअर्वाक्संसारपाताद्भिभ्यतःपुंसः अरणंशरणं॥३३॥किंचसतश्चक्षुंषिसगुणनिर्गुणज्ञानानि॥अर्कःपुनःसम्यगुत्थितोपिबहिःतद्पिएकमेवचक्षुरित्यर्थः॥३४ अध्यायार्थमुपसंहरति॥वैतसेनइति॥सुषुम्नभावेनोभावनंप्रविष्टस्यवीतासेनाऊर्वशीभावंप्राप्त स्यपुत्रोवैतसेनःपुरूरवाएवमुक्तप्रकारेणोर्वश्यालोकात्स्थानादवलोकनाद्वानिःस्पृहः॥ततोपिसत्संगादपिहेतोर्मुक्त

अन्नंहिप्राणिनांप्राणःआर्तानांशरणंत्वहं॥धर्मोवित्तंनृणांप्रेत्यसंतोर्वाग्बिभ्यतोरणं॥३३॥संतोदिशंतिच क्षूंषिबहिरर्कःसमुत्थितः॥देवताबांधवाःसंतःसंतआत्माहमेवच॥३४॥वैतसेनस्ततोप्येवमुर्वश्यालोकनिः स्पृहः॥मुक्तसंगोमहीमेतामात्मारामश्चचारह॥३५॥इतिश्रीभागवतेएकादशेषड्विंशोध्यायः॥२६॥छ॥ ॥श्रीउद्धवउवाच॥क्रियायोगंसमाचक्ष्वभवदाराधनंप्रभो॥यस्मात्त्वांयेयथार्चंतिसात्वताःसात्वतर्षभ॥१॥ए तद्वदंतिमुनयोमुहुर्निःश्रेयसंनृणां॥नारदोभगवान्व्यासःआचार्योंगिरसःसुतः॥२॥श्रीदत्तात्रयायनमः॥

संगःसन्नात्मारामोभूत्वायथेष्टंचचारेति॥३५॥इत्येकादशेषड्विंशः॥२६॥सप्तविंशेक्रियायोगःसघन्विन्तप्रसादकः॥स र्वकामाप्तिहेतुश्चसांगःप्रोक्तःसमासतः॥१॥रागाद्याकुलचित्तानांकुतोसंगादिसंभवः॥इतिकृष्णार्चनंभक्तमनुस्मसा नुपश्यति॥२॥क्रियायोगमिति॥भवदाराधनरूपंयस्मादितिकारणाधिष्ठानादिप्रश्नः॥सर्वकारणनिमित्तत्वस्यावशि ष्टत्वात्॥यथेति॥कस्मिन्नधिष्ठानादौकेनप्रकारेणेतिप्रश्नः॥येधिकारिणःसात्वताभक्ताः॥अस्यपुनर्विशेषःप्रश्न स्यकारणमाह॥चतुर्भिः॥एतदर्चनंनिःश्रेयसकरंवदंति॥आंगिरसःसुतोबृहस्पतिः॥२॥

निःसृतंत्वयोपदिष्टमित्यर्थः ॥ देव्यै पार्वत्यै ॥ ३ ॥ सर्ववर्णानां त्रैवर्णिकानां ॥ ४ ॥ विश्वेश्वरायेतेषामपि ईश्वर ॥ ५ ॥ कर्मकांडस्य पूजाविधानस्य नास्त्यंतो ग्रंथतः पारं चानुष्ठानतो यस्य तस्य ॥ ६ ॥ वैदिक एव मंत्रो वैदिकान्येवांगानि च यस्मिन् ॥ पुरुषसूक्तादिः स वैदिकः ॥ एवं तांत्रिकोपि ॥ मिश्रोऽष्टाक्षरादिः ॥ मखः पूजा ॥ ७ ॥ यदा त्रैवर्णिको यजेत तदा विशेषमाह ॥

निःसृतं ते मुखांभोजाद्यदाह भगवानजः ॥ पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान्भवः ॥ ३ ॥ एतद्वै सर्ववर्णानामाश्रमाणां च संमतं ॥ श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद ॥ ४ ॥ एतत्कमलपत्राक्ष कर्मबंधविमोचनं ॥ भक्ताय चानुरक्ताय ब्रूहि विश्वेश्वरप्रभो ॥ ५ ॥ श्रीभगवानुवाच ॥ न ह्यंतोऽनंतपारस्य कर्मकांडस्य चोद्धव ॥ संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः ॥ ६ ॥ वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः ॥ त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ॥ ७ ॥ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः ॥ यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे ॥ ८ ॥ अर्चायां स्थंडिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजः ॥ द्रव्येण भक्तियुक्तोऽर्चेत्स्वगुरुं माममायया ॥ ९ ॥ पूर्वं स्नानं प्रकुर्वीत धौतदंतोंगशुद्धये ॥ उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिना ॥ १० ॥ संध्योपास्यादिकर्माणि वेदतंत्रोदितानि मे ॥ पूजां तैः कल्पयेत्सम्यक्संकल्पः कर्मपावनीं ॥ ११ ॥ ७

यदा गर्भाष्टमैकादशद्वादशादिकाले स्वनिगमेन स्वाधिकारप्रवर्तनेन वेदोक्तं द्विजत्वं उपनयनं ॥ ८ ॥ अर्चायां प्रतिमादौ ॥ ९ ॥ स्नाने विशेषमाह उभयैर्वैदिकैस्तांत्रिकैश्च मंत्रैः ॥ १० ॥ किंच संध्योपासनादिकर्माणि ॥ उदितानि साकल्येन विहितानि यस्य यानि विहितानि तैः सह मे पूजां कुर्यात् ॥ न तु तानि परित्यज्येत्यर्थः ॥ सम्यक् परमेश्वरविषय एव संकल्पो यस्य तथाभूतः सन् ॥ कर्मपावनीं कर्मनिर्हारिणीं ॥ ११ ॥ ७

अर्चाभेदानाह सार्द्धेन। शैली शिलामयी। लौही सुवर्णादिमयी। लेप्या मृच्चंदनादिमयी। हृदि पूजायां मनोमयी। प्रकर्षेण तिष्ठत्यस्या
मिति प्रतिष्ठा प्रतिमैव। जीवस्य भगवतो मंदिरं। यद्वा प्रतिष्ठया कलान्यासेन। भगवन्मंदिरं भवतीति॥११॥ प्रतिमाभेदेन विशेष
माह सार्द्धेन। उद्वासो विसर्जनं। अस्थिरायामर्चने विकल्पः शालिग्रामे न कुर्यात्। सैकतायां कुर्यात्। अन्यत्र कुर्याद्वा न वेति
अविलेप्यायां मृन्मयलेख्यव्यतिरिक्तायां। अन्यत्र विलेप्यायां लेख्यायां च परिमार्जनमेव॥१२॥ इदानीं सकामनिष्काम

शैली दारुमयी लौही लेप्या लेख्या च सैकती॥ मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता॥ चलाचलेति द्विविधा
प्रतिष्ठा जीवमंदिरं॥१२॥ उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने॥ अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयं॥ स्न
पनं त्वविलेप्यायामन्यत्र परिमार्जनं॥१३॥ द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः॥ भक्तस्य च यथालब्धैर्हृदि भा
वेन चैव हि॥१४॥ स्नानालंकरणं प्रेष्ठमर्चायामेव तूद्धव॥ स्थंडिले तत्त्वविन्यासो वह्नावाज्यप्लुतं हविः॥ सूर्ये चाभ्यर्हणं प्रेष्ठं
सलिले सलिलादिभिः॥१५॥ श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि॥ भूर्य्यप्यभक्तोपहृतं न मे तोषाय कल्पते॥ गंधो धूपः सु
मनसो दीपोन्नाद्यं च किं पुनः॥१६॥७

भेदेन विशेषमाह। द्रव्यैरिति। प्रकर्षेण सिद्धैः शुद्धैः। अमायिनः निष्कामस्य भक्तस्य तु यथालब्धैः। यत्र चंदनादि सर्वथा
न लभ्यते तत्र हृदि भावेन भावनया। यद्वा हृदि चेन्मद्यागः तदा भावेन मनोमयैर्द्रव्यैरित्यर्थः॥१४॥ अधिष्ठानभेदेन प्रधा
नोपचारमाह सार्द्धेन। स्नानेति। तत्त्वविन्यासः यथास्थानमंगप्रधानदेवतानां तत्तन्मंत्रैः स्थापनं। अभ्यर्हणं उपस्थाना
चादि सलिलादिभिस्तर्पणादिभिस्तर्पणादिना यजनं॥१५॥ सर्वत्र साधारणमाह। श्रद्धयेति॥१६॥ श्रीराम॥॥७॥

॥ भा॰ ए॰ ॥
॥ २०५ ॥

एवमधिकारादिव्यवस्थामुक्त्वेदानीं पूजाप्रकारमाह ॥ शुचिरिति ॥ संभृताः संभाराः पूजाया साधनानि येन सः प्राग्गतैर्दर्भैः ॥ य
द्वा प्रागेव संभृतसंभारः सन्नासीनः ॥ न त्वासीनः सन् पश्चात्तत्तत्संभारार्थं वारंवारमुत्तिष्ठेदित्यर्थः ॥ प्राङ्मुखः उदङ्मुखो वा स्वा
सीनः अर्चायां तु स्थिरायां संमुखः अर्चाभिमुखः उपविष्टः सन् ॥ अथानंतरं गुर्वादिनमस्कारपूर्वकं यथोपदेशं स्वस्मिन्
कृतन्यासः कृतो मूलमंत्रन्यासो यस्यां तां सममार्चां अर्चां मृजेत् ॥ निर्माल्यापकर्षणादिना शोधयेत् ॥ २७ ॥ कलशं पूर्णकुंभं
प्रोक्षणीयं प्रोक्षणार्थोदकपात्रं उपसाधयेत् ॥ चंदनपुष्पादिभिः संस्कुर्यात् ॥ तदद्भिः प्रोक्षणीयाद्भिः देवयजनं देवपूजास्था

शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः ॥ आसीनः प्रागुदग्वार्चेदर्चायां त्वथ संमुखः ॥ कृतन्यासः कृतन्यासां म
दर्चां पाणिना मृजेत् ॥ २७ ॥ कलशं प्रोक्षणीयं च यथावदुपसाधयेत् ॥ तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च ॥ प्रोक्ष्य
पात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत् ॥ २८ ॥ पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि देशिकः ॥ हृदा शीर्ष्णाथ शिख
या गायत्र्या चाभिमंत्रयेत् ॥ २९ ॥ पिंडे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम ॥ अण्वीं जीवकलां ध्यायेन्नादांते सिद्ध
भाविताम् ॥ ३० ॥

नं ॥ पाद्याद्यर्थं त्रीणि पात्राणि कलशोदकैः पूरितानि तैस्तैर्द्रव्यैः साधयेत् ॥ २८ ॥ तत्र पाद्यादिद्रव्याणि ॥ पाद्ये श्यामाकदूर्वाब्जवि
ष्णुक्रांता इति स्मृताः ॥ गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः ॥ दूर्वा चेति क्रमादर्घ्यद्रव्याष्टकमुदीरितम् ॥ जातीलवंगकंकोलैर्मत
माचमनीयकमिति ॥ तानि च त्रीणि पात्राणि यथाक्रमं हृदयादिमंत्रैर्गायत्र्या च समस्तान्यभिमंत्रयेत् ॥ दैशिकः पूजकः ॥ २९
तदनंतरं पिंडे देहे वाय्वग्निसंशुद्धे इति कोष्ठगतेन वायुना शोषिते ॥ आधारगतेनाग्निना दग्धे पुनर्ललाटस्थचंद्रमंडला
मृतप्लावनेनामृतमये जाते तस्मिन् ॥ हृत्पद्मस्थां परां श्रेष्ठां जीवकलां श्रीनारायणमूर्तिं ध्यायेत् ॥ कथंभूताम् ॥ नादांते सि
द्धभाविताम् ॥ प्रणवस्याकारोकारमकारबिंदुनादाः पंचांशास्तन्मात्रकाः नादांते सिद्धैर्ध्याताम् ॥ तथा च श्रुतिः ॥ यो वेदादौ स्वरः

प्रोक्तो वेदांते च प्रतिष्ठितः ॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति ॥ २० ॥ ७

॥ राम ॥
॥ २०५ ॥

तयात्मभूतयास्वेनैवभावेनचिंतितयाऽमृतमयेपिंडेदीपेनप्रभयागृहमिवव्याप्तेसतितस्मिन्नेवादौमानसैरुपचारैःसं
पूज्यतन्मयःसन्नर्चादिष्वावाह्यस्थापनमुद्रयास्थापयित्वा॥२१॥कथंप्रपूजयेत्तदाह॥पाद्येतिद्वाभ्यां॥धर्मादिभिर्ममास
नंतत्रासनमध्येपद्मंचकल्पयित्वाभाभ्यांवेदतंत्राभ्यामुभयसिद्ध्यैमत्पाद्यादीनुपचारान्प्रकल्पयेदित्यन्वयः॥उपस
र्शःआचमनं॥अर्हणमर्घ्यं॥२२॥उभयसिद्ध्यैवेदतंत्रोक्तंभुक्तिमुक्तिप्राप्तये॥अयमर्थः॥धर्मज्ञानवैराग्यैश्वर्याण्या
सनपर्यंकस्याग्नेयाद्यादिचतुष्कोणेषुपादाःधर्मादीनिपूर्वादिदिक्षुगात्राणिसत्वाद्यःत्रयोगुणाःपट्टिकाःतत्रपूर्वादि

तयात्मभूतयापिंडेव्याप्तेसंपूज्यतन्मयः॥ आवाह्यार्चादिषुस्थाप्यन्यस्तांगंमांप्रपूजयेत्॥२१॥ पाद्योपस्पर्शा
र्हणादीनुपचारान्प्रकल्पयेत्॥ धर्मादिभिश्चनवभिःकल्पयित्वासनंमम॥२२॥ पद्ममष्टदलंतत्रकर्णिकाकेस
रोज्वलं॥ उभाभ्यांवेदतंत्राभ्याममह्यंतूभयसिद्धये॥२३॥ सुदर्शनंपांचजन्यंगदासीषुधनुर्हलान्॥ मुसलंकौस्तु
भंमालांश्रीवत्संचानुपूजयेत्॥२४॥ नंदंसुनंदंगरुडंप्रचंडंचंडमेवच॥ महाबलंबलंचैवकुमुदंकुमुदेक्ष
णं॥२५॥

क्रमेणमध्येचविमलोत्कर्षणीज्ञानक्रियायोगाप्रह्वीसत्येशानानुग्रहेतिनवशक्तयःएवंयथोपदेशंधर्मादिभिःश
क्तिभिश्चआसनंकल्पयित्वेति॥ कर्णिकायाःकेसरैस्तत्रस्थसूर्यादिमंडलैश्चोज्वलमित्यर्थः॥२३॥ आयुधादिपू
जामाह॥ सुदर्शनमितित्रिभिः॥ तत्रन्यस्तांगमित्यंगावरणपूजासूचिता॥ आसनेनैवशक्त्यावरणमप्युक्तं॥ ततः
सुदर्शनादिमुसलांतान्यायुधान्यष्टसुदिक्षुकौस्तुभमालाश्रीवत्सानुरसि॥२४॥ नंदादीन्पार्षदानष्टदिक्षुगरुडंपुरतः॥
॥२५॥

दुर्गादीनि कोणेषु ॥ गुरूनवामतः ॥ सुरानिंद्रादिलोकपालान् सर्वादिदिक्षु एवमेतान् ॥ देवस्याभिमुखान् प्रोक्षणादिभिरर्घ्यादिभिः पूजयेदित्यर्थः ॥ २६ ॥ पाद्यादीनुपचारान् प्रकल्पयेदित्युक्तं तानेव गुणविधिभिः प्रपंचयति ॥ चंदनेति षड्भिः ॥ २७ ॥ मंत्रानाह ॥ स्वर्णघर्मानुवाकः ॥ सुवर्णघर्मं परिवेद वेनमित्यादि ॥ महापुरुषविद्या ॥ जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ सुब्रह्मण्य नमस्तेस्तु महापुरुष पूर्वजेति ॥ पौरुषसूक्तं ॥ सहस्रशीर्षेत्यादि नीराजनादीनि ॥ इंद्रं नरो नेमधिता हवंत इत्यस्यामृचि गीतानि ॥ आदि

दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून् सुरान् ॥ स्वे स्वे स्थाने त्वभिमुखान् पूजयेत् प्रोक्षणादिभिः ॥ २६ ॥ चंदनोशीरकर्पूरकुंकुमागरुवासितैः ॥ सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभवे सति ॥ २७ ॥ स्वर्णघर्मानुवाकेन महापुरुषविद्यया ॥ पौरुषेणापि सूक्तेन सामभिर्नीराजनादिभिः ॥ २८ ॥ वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः ॥ अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितं ॥ २९ ॥ पाद्यमाचमनीयं च गंधं सुमनसोऽक्षतान् ॥ धूपदीपोपहार्याणि दद्यान्मे श्रद्धयार्चकः ॥ ३० ॥ गुडपायससर्पींषि शष्कुल्यापूपमोदकान् ॥ संयाव दधिसूपांश्च नैवेद्यं सति कल्पयेत् ॥ ३१ ॥ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं ॥ अन्नाद्यं गीतनृत्यानि पर्वणि स्युरुतान्वहं ॥ ३२ ॥ छ॥

शब्देन रौहिणादीनि ॥ २८ ॥ वस्त्राद्युपचारेष्वलंकारलक्षणगुणं विधत्ते ॥ वस्त्रेति ॥ पत्राणि कपोलवक्षस्थलादिषु लिखिताः पत्रभंगेषु ॥ मद्भक्तश्चेत्सप्रेम यथा भवति तथा यथोचितमलंकुर्वीतेत्युक्तार्थः ॥ २९ ॥ सर्वसाधारणं श्रद्धालक्षणगुणं विधत्ते ॥ पाद्यमिति ॥ ३० ॥ नैवेद्यलक्षणगुणं विधत्ते ॥ गुडपायसेति ॥ शष्कुल्यः तैलपक्वविशेषाः अपूपाः अपूपानां मंडकानां समूहाः सूपाः व्यंजनानि सति विभव इति विशेषः ॥ ३१ ॥ कालभेदेन गुणं वित्ते ॥ अभ्यंगेति ॥ अभिषेचनं पंचामृतादि स्नपनं ॥ अन्नाद्येति ॥ अन्नं भोज्यमपि भक्ष्यं ॥ पर्वण्येकादश्यादौ ॥ अन्वहं प्रत्यहं ॥ विभवे सतीति ॥ ३२ ॥

फलभूयस्त्वार्थिनोऽग्नावपिपूजाप्रकारमाह॥ विधिनास्वगृह्योक्तप्रकारेण॥मेखलादिभिरुपलक्षितेविहितेनिर्मिते॥ तदुक्तं॥वि
स्तारोऽप्यायतस्तिस्रोमेखलाश्चतुरंगुलाः॥हस्तमात्रोभवेद्गर्त्तःस्वयोनिर्वेदिकास्तथैवहि॥ उद्दीप्तंप्रज्वलितमग्निंपरितःस
मूहेत्एकत्रमेलयेत्॥२३॥दर्भैःपरिस्तीर्यपरितःप्रोक्षयेत्॥अन्वाधायान्वाधानसंज्ञकंव्याहृतिभिःसमित्प्रक्षेपणादि
रूपंकर्मकृत्वा॥अग्नेरुत्तरतःद्रव्याणिहोमोपयोगीन्यासाद्यनिधायप्रोक्षिण्याप्रोक्षणीपात्रोदकेनप्रोक्ष्याग्नौमांध्याये
त्॥२४॥शंखादिभिरुल्लसंतःशोभमानाश्चत्वारोभुजायस्यतं॥२५॥स्फुरंतिकिरीटादीनियस्यतं॥२६॥हवींषिघृतेनअभिघृत्वा

विधिनाविहितेकुंडेमेखलागर्त्तवेदिभिः॥ अग्निमाधायपरितःसमूह्यपाणिनोद्दीप्तं॥२३॥परिस्तीर्यायपर्युक्ष्यद्
न्वाधाययथाविधि॥ प्रोक्षण्यासाद्यद्रव्याणिप्रोक्ष्याग्नौभावयेत्तमां॥२४॥तप्तजांबूनदप्रख्यंशंखचक्रगदांबुजैः॥
लसच्चतुर्भुजैःशांतंपद्मकिंजल्कवाससं॥२५॥स्फुरत्किरीटकटककटिसूत्रवरांगदं॥श्रीवत्सवक्षसंभ्राज
त्कौस्तुभंवनमालिनं॥२६॥ध्यायन्नभ्यर्च्यदारूणिहवींषाभिघृतानिच॥प्रास्याज्यभागावाघारौदत्वाचाज्य
प्लुतंहविः॥२७॥जुहुयान्मूलमंत्रेणषोडशर्चावदानतः॥धर्मादिभ्योयथान्यायंमंत्रैःस्विष्टकृतंबुधः॥२८॥

निसंसिक्तानिदारूणिशुष्कसमिधःप्रास्यप्रक्षिप्य॥आघारौतन्नांत्रिकौयागौएवमाज्यभागौचदत्वातदर्थाआहुतिहु
त्वेत्यर्थः॥तत्राघारौ॥प्रजापतयेस्वाहा॥इंद्रायस्वाहेतिचोत्तरदक्षिणपरिधिसंधिमारभ्याग्निमध्यादापरिध्यंतंघृत
क्षरणरूपौआज्यभागौ॥अग्नयेस्वाहा॥सोमायस्वाहाइत्येवंहोमरूपौ॥२७॥मूलमंत्रेणाष्टाक्षरेण॥तथाषोडशर्चात्म
कोयस्मिन्तेनपुरुषसूक्तेनच॥अवदानतःप्रत्यृचमाहुतिग्रहणेनेत्यर्थः॥पुरुषसूक्तेनाराधनपक्षेसएवमूलमं
त्रः॥तत्रैवप्रत्यृचमवदानतोहोमइतिमंत्रैःस्वाहांतैर्नाममंत्रैर्यथान्यायंपूजाक्रमेणैवअग्नयेस्विष्टकृतेस्वाहेत्ये

वसिष्ठकृतंचंडिकृत्या॥२१७

ततोवन्हिस्थंभगवंतमभ्यर्च्यअभ्यनमस्कृत्यपार्षदेभ्योनंदादिभ्योदिक्षुबलिंहरेत्॥ ततःपूजास्थानमागत्यदेवस्याग्रेसमुप
विश्ययथाशक्तिमूलमंत्रंजपेत्॥३९॥ ततउभयत्रभगवतोभोजनसमाप्तिंध्यात्वाआचमनंदत्वा॥ उच्छेषंविष्वक्सेनाय
कल्पयित्वातदनुज्ञयायच्छात्स्वयंभुंजीत॥ ततःसुरभिमत्सुगंधवत्तांबूलाघंमुखवासंदत्वाउथपुनरपिअर्हयेतपु
ष्पांजलिनापूजयेत्॥४०॥ अभिनयतत्स्वस्मिन्नाविष्कुर्वन्क्षणिकःवैयग्र्यंपरित्यज्यलब्धावसरोभवेत्॥४१॥ स्तव
स्तोत्राणांभेदंदर्शयति॥ पौराणैःप्राकृतैरपि॥४२॥ कथंप्रणमेदित्यपेक्षायामाह॥ शिरइति॥ बाहुभ्यांदक्षिणोत्तराभ्यांपर

अभ्यर्च्याथनमस्कृत्यपार्षदेभ्योबलिंहरेत्॥ मूलमंत्रंजपेत्ब्रह्मस्मरन्नारायणात्मकं॥३९॥ दत्वाचमनमुच्छेषंवि
ष्वक्सेनायकल्पयेत्॥ मुखवासंसुरभिमत्तांबूलाद्यमथार्हयेत्॥४०॥ उपगायन्गृणन्नृत्यन्कर्माण्यभिनय
न्मम॥ मत्कथाःश्रावयंछृण्वन्मुहूर्तंक्षणिकोभवेत्॥४१॥ स्तवैरुच्चावचैःस्तोत्रैःपौराणैःप्राकृतैरपि॥ स्तुत्वाप्रसी
दभगवन्नितिवंदेतदंडवत्॥४२॥ शिरोमत्पादयोःकृत्वाबाहुभ्यांचपरस्परं॥ प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्ण
वात्॥४३॥ इतिशेषांमयादत्तांशिरस्याधायसादरं॥ उद्वासयेच्चेदुद्वास्यंज्योतिर्ज्योतिषितत्पुनः॥४४॥ अर्चादिषुयदा
यत्रश्रद्धामांतत्रचार्चयेत्॥ सर्वभूतेष्वात्मनिचसर्वात्माहमवस्थितः॥४५॥

ममदक्षिणोत्तरौपादौगृहीत्वा॥ यद्वाएवंततःपरस्परंनिबद्धाभ्यांकृतापराधइवप्रपन्नमित्यादिविज्ञप्त्याचप्रणमेत्॥४३॥
ततःशेषाग्रहणपूर्वकंवैकल्पिकोद्वासनप्रकारमाह॥ इतिअनयैवप्रार्थनयाशेषांनिर्माल्यंमयादत्तांध्यात्वाशिरस्या
धायधृत्वा॥ यद्युद्वासयेत्तर्हिप्रतिमायांयन्न्यस्तंज्योतिस्तत्पुनरपिहृत्पद्मस्थज्योतिष्येवोद्वास्यंउद्वासनीयं॥४४॥ एतेः
ष्वधिष्ठानेषुकिंमुख्यमित्यपेक्षायामाह॥ अर्चादिष्विति॥ यदायत्रश्रद्धातदातत्रनत्वधिष्ठानेमुख्यामुख्यत्वंकुतःयतःस
र्वभूतेष्विति॥४५॥७

उभयतः इहामुत्र ॥ ४६ ॥ समर्थं प्रसाह । मर्च्चामिति त्रिभिः ॥ पुष्पोद्यानानि च कारयेत् ॥ पूजायात्रोत्सवाश्रितान् पूजां प्रसहं ॥ यात्रा विशिष्टे पर्वणि बहुजनसमागमः ॥ उत्सवः वसंतादि महोत्सवः ॥ तदाश्रितान् क्षेत्रादीन् दत्वा ॥ ४७ ॥ पूजायात्रोत्सवाश्रितानि तस्य विवरणं ॥ पूजादीनामिति ॥ प्रवाहार्थं संततानुष्ठानार्थं ॥ मत्सार्ष्टितां मत्समानैश्वर्यं ॥ ४८ ॥ प्रतिष्ठादीनां व्यस्तसमस्तानां फलमाह ॥ प्रतिष्ठयेति ॥ मत्साम्यतां मया साम्यमित्यर्थः ॥ ४९ ॥ सकामं प्रसक्तं ॥ अहैतुकभक्तं प्रसाह ॥ मामेवेति ॥

एवं क्रियायोगपथैः पुमान्वैदिकतांत्रिकैः ॥ अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां ॥ ४६ ॥ मदर्चां संप्रतिष्ठाप्य मंदिरं कारयेद्दृढं ॥ पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान् ॥ ४७ ॥ पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं ॥ क्षेत्रापणपुरग्रामान्दत्वा मत्सार्ष्टितामियात् ॥ ४८ ॥ प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं ॥ पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥ ४९ ॥ मामेव नैरपेक्ष्येण भक्तियोगेन विंदति ॥ भक्तियोगं स लभत एवं यः पूजयेत मां ॥ ५० ॥ यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः ॥ वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतं ॥ ५१ ॥ कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च ॥ कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ॥ ५२ ॥ इति श्रीभा॰ एकादश॰ भगवदु॰ पूजाविधिकथनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ २७ ॥

अहैतुकभक्तियोग एव कथं भवतीत्यत्राह ॥ भक्तियोगमिति ॥ ५० ॥ दातुः फलमुक्तं ॥ अपहर्तारं निंदति ॥ य इति ॥ विड्भुक् विष्ठाभोजी कृमि ॥ ५१ ॥ कर्तुः यत्फलं तदेवान्येषामप्याह ॥ कर्तुरिति ॥ सारथेः सहकारिणः हेतोः प्रयोजकस्य अनुमोदितुश्च प्रेत्य तत्फलमित्यन्वयः ॥ कुतः यतः कर्मणामेते भागिनः भागार्हाः ॥ तत्रापि विशेषमाह ॥ भूयसि कर्मणि सारथ्यादौ च भूयः ॥ अधिकफलमिति ॥ ५२ ॥ पयः पत्रादिमात्रेण पूजिताय परमं पदं ॥ प्रागेव दित्सति प्रीतः स कृष्णः शरणं मम ॥ १ ॥ इमे कादश्यां स

अष्टाविंशे तु यः एवं विस्तरेणोपवर्णितः॥ ज्ञानयोगः पुनस्त्वासौ समाहृत्य निरूप्यते॥१॥ इदानीमतिविस्तरेणोक्तं ज्ञानयोगं संक्षेपेण वक्तुमाह। परेषां स्वभावाः शांतघोरादीन् कर्माणि च। तत्र हेतुः। विश्वमिति॥१॥ विपक्षे दोषमाह। परेति। स्वार्थात् ज्ञाननिष्ठा लक्षणात्। असति मिथ्याभूते द्वैते अभिनिवेशात्॥२॥ अभिनिवेशमेव दृष्टांततो दर्शयति। तैजसे राजसाहंकारकार्ये इंद्रियगणे निद्रया आपन्ने अभिभूते सति पिंडस्थो जीवः केवलं मनोमात्रेण मायां स्वप्नरूपां॥ ततो मनसि लीने सति नष्टचेतनः सन्। मस्रे वा मृत्युं सुषुप्तिं वा प्राप्नोति यथा तद्वदेव नानार्थदृक् द्वैताभिनिवेशी विपक्षं लयं च प्राप्नोतीति॥३॥ द्वैतासत्त्वात् तयास्तुतिनिंदे

श्रीभगवानुवाच॥ परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्॥ विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च॥१॥ परस्वभावकर्माणि यः प्रशंसति निंदति॥ स आशु भ्रश्यते स्वार्थादसत्यभिनिवेशतः॥२॥ तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः॥ मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक् पुमान्॥३॥ किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत्॥ वाचोदितं तदनृतं मनसा ध्यातमेव च॥४॥ छायाप्रत्याह्वयाभासा ह्यसंतोऽप्यर्थकारिणः॥ एवं देहादयो भावा यच्छंत्यामृत्युतो भयं॥५॥ आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः॥ त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः॥६॥७

योनिर्विषयत्वं प्रपंचयति सार्द्धैः षड्भिः॥ किं भद्रमिति॥ अवस्तुनो द्वैतस्य मध्ये किं भद्रं किं वा अभद्रं॥ कियद्वा भद्रं कियद्वा अभद्रमित्यर्थः॥ अवस्तुत्वमेवाह। वाचेति। बाह्येंद्रियोपलक्षणं॥ वाचा उदितं उक्तं चक्षुरादिभिश्च यद्गृह्यते तदनृतमिति॥४॥ नन्वेवं सति देहादिभावानामप्यसत्त्वात् कथं भयहेतुत्वं। तत्र सदृष्टांतमाह। छाया प्रतिबिंबं प्रत्याह्वयः प्रतिध्वनिः॥ आभासः शुक्तिरजतादि एते यथा असंतोऽप्यर्थकारिणो भवंति॥ आमृत्युतः मृत्युमभिव्याप्य॥ यद्वा मृत्युर्लयः यावत् ज्ञानेन न नैव लीयंते तावत्पर्यंतमित्यर्थः॥५॥ ननु स्रष्ट्रादिशक्तिभिरेव द्वैतं निरूपितं कथमसत्त्वं स्यात् तत्राह। आत्मैवेति सार्द्धाभ्यां॥ त्रायते पाल्यते त्राति पालयति॥६॥

अन्यस्मात्स्वप्नादिव्यतिरिक्तात्॥ त्रिविधा अध्यात्मादिरूपा भातिः प्रतीतिः॥७॥ ननु कथं निर्मूलं प्रतीयते तत्राह॥ इदमिति॥
ज्ञानविज्ञानयोर्नैपुण्यं निष्ठां सूर्यवत्समो भवेत्॥८॥ एतन्निष्ठाप्राप्त्युपायमाह॥ प्रत्यक्षेणेति॥ यदाद्यन्तवत्तत्तदसदिति ज्ञा
त्वा निःसंगो विचरेत्॥ आद्यन्तवत्त्वे प्रमाणानि॥ प्रत्यक्षेण घटादि अनुमानेन सावयवत्वेन दृश्यं घटादिवदिति॥ निगमेना प्रयुक्त
माकाशादि॥ आत्मसंविदा स्वानुभवेन सर्वं दृश्यमाद्यन्तवत्॥ असच्चेति ज्ञात्वेति॥९॥ ननु यद्यात्मसंविदा सर्वं दृश्यमा
नमसदिष्यते तर्ह्यात्मा स्वप्रकाशो देहादिश्चेतनं च दृश्यं जडमित्युक्तं स्यात्॥ तथा च संसारप्रतिभासो न घटेतेति चोद

तस्मान्न ह्यात्मनोऽन्यस्मादन्यो भावो निरूपितः॥ निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि॥७॥ इदं गुणमयं विद्धि त्रि
विधं मायया कृतं॥ एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणं॥ न निंदति न च स्तौति लोके चरति सूर्यवत्॥८॥ प्रत्यक्षे
णानुमानेन निगमेनात्मसंविदा॥ आद्यंतवदसज्ज्ञात्वा निःसंगो विचरेदिह॥९॥ श्रीउद्धव उवाच॥ नैवात्मनो न
देहस्य संसृतिर्द्रष्टृदृश्ययोः॥ अनात्मस्वदृशोरीश कस्य स्यादुपलभ्यते॥१०॥ आत्माऽव्ययोऽगुणः शुद्धः स्वयं
ज्योतिरनावृतः॥ अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः॥११॥७

यति॥ नैवेति॥ अनात्मस्वदृशोः जडाजडयोः अन्यहेतुः॥ द्रष्टृदृश्ययोः माभूत्तद्ध्यारोपितत्राह॥ उपलभ्यत इति॥१०॥
एतत्प्रपञ्चयति॥ आत्मेति॥ अव्ययत्वादि पंचविशेषणैर्नाशादिरागादिपुण्यापुण्यज्ञानपरिच्छेदनामसंभवं द्योत
ति॥ हेतुहेतुमत्वं तु यथेष्ट॥ अचित् जडः॥ अयं भावः॥ यथा वाऽग्निदारुणोर्भेदेनानुपलंभेऽपि दारु प्रकाश्यमेव॥
अग्निश्च प्रकाशकः॥ तथा देहात्मनोरपीति॥ न संसृतिस्तयोरन्यतरस्यापि न घटत इति॥११॥ श्रीरामचंद्राय
नमः॥ श्रीदत्तदिगंबराय नमः॥ श्रीकृष्णाय परते नमः॥ श्रीदत्तदिगंबराय नम॥ श्री॥७॥ श्री॥७॥७॥७॥

त

सस्संतथाप्युभयोरेवमविवेकएवसंसारालंबनमित्याहपंचभिः।।यावदिति।।सन्निकर्षणंसंबंधः।।नन्वसंगस्यकुतःसंबंधस्तत्रा
हा।।अविवेकिनइति।।अज्ञानकृतइत्यर्थः।।ननुस्वप्रकाशस्यकथमज्ञानतःसंसारस्तत्राह।।अपार्थोपिमिथ्याभूतोपिकेवलंफल
वान्फलंस्फूर्त्तिर्नतुतत्वतोऽस्तीत्यर्थः।।५२।।नन्वसत्तोदेहादेःकुतःसंसारस्फूर्त्तिहेतुत्वमपितत्राह।।अर्थेहीति।।अस्यात्मनः।।५३।।
ननुकथंचिज्ज्ञानतोविषयस्फूर्त्तिर्जीवन्मुक्तस्यापितुवारितिअनिर्मोक्षप्रसंगस्स्यात्तत्राह।।यथाहीति।।प्रस्वापःस्वप्नःबह्वनर्था
न्बिभर्तिपुष्णातीतितथा।।५४।।अहंकारलक्षणोदेहादिसन्निकर्षएवसंसारालंबनमित्यन्वयः।।व्यतिरेकाभ्यांदर्शयति।।शो

श्रीभगवानुवाच।।यावद्देहेंद्रियप्राणैरात्मनःसन्निकर्षणं।।संसारःफलवांस्तावदपार्थोप्यविवेकिनः।।५२।।अर्थेह्यविद्यमा
नेपिसंसृतिर्ननिवर्त्तते।।ध्यायतोविषयानस्यस्वप्नेऽनर्थागमोयथा।।५३।।यथाह्यप्रतिबुद्धस्यप्रस्वापोबह्वनर्थभृत्।।
सएवप्रतिबुद्धस्यनवैमोहायकल्पते।।५४।।हर्षशोकभयक्रोधलोभमोहस्पृहादयः।।अहंकारस्यदृश्यंतेजन्ममृत्युश्च
नात्मनः।।५५।।देहेंद्रियप्राणमनोभिमानोजीवोंऽतरात्मागुणकर्ममूर्त्तिः।।सूत्रंमहानित्युरुधेवगीतःसंसारआधावति
कालतंत्रः।।५६।।५

केति।।सुषुप्त्यादौतेषामदर्शनात्।।अहंसुखीतिवच्चैतन्यंसुखीतिप्रतीत्यभावाच्चदृश्यत्वाच्चस्वसुखादीनांकृशत्वादिवत्तद्ध
धर्मत्वानुपपत्तेरितिभावः।।५५।।ननुयद्यहंकारस्यसंसारस्तर्हिमुक्तिरपितस्यैवेतिमुक्तावहंकाराभावेदोषःप्रसज्येतत
त्राह।।देहेति।।देहादिष्वभिमानोयस्यसः।।आत्मैवतेषामंतर्हितोजीवः।।अतएवगुणकर्ममयीमूर्त्तिर्यस्यसः।।एवंसू
क्ष्मोपाधिर्बहुधैवसूत्रादिशब्दैर्गीतःसंसारपरमेश्वराधीनःसर्वतःआधावति।।अतोनायंदोषइतिभावः।।५६।।७

तदेवमहंकारकृतं बंधमुपपाद्येदानीं ज्ञानेन तन्निवृत्तौ मुक्तिरित्याह ॥ अमलमिति ॥ वस्तुतो मलशून्यं ॥ अज्ञानतस्तु बहुधैव रूपे
रूपितं प्रकाशितं ऐंद्रजालिकतुल्यमिति वा ॥ किं तत्तदाह ॥ मन इति ॥ मन आदीनां द्वंद्वः ॥ यद्वा मनः आदिषु क्रियत इति कर्म अ
हंकरणं ॥ गुरूपासनया निशितेन ज्ञानखड्गेन छित्त्वा ॥ २७ ॥ तदेव ज्ञानं स्वरूपसाधनफलैर्निरूपयति ॥ ज्ञानमिति ॥ विवेको
ज्ञानं ॥ साधनान्याह ॥ निगमो वेदः ॥ तपः स्वधर्मः प्रत्यक्षं स्वानुभवः ॥ ऐतिह्यं उपदेशः ॥ अनुमानं तर्कः ॥ फलमाह ॥ आद्यं
तयोर्यदस्य जगतः मध्येपि तदेव केवलं ॥ न तु जगदिति ॥ किं तत् ॥ कालः कलयति प्रकाशयति यः तथा हेतुः कारणं च य

अमलमेतत्तव बहुरूपरूपितं मनोवचःप्राणशरीरकर्म ॥ ज्ञानासिनोपासनया शितेनच्छित्त्वा मुनिर्गां विचरत्यतृष्णः
॥ २७ ॥ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं ॥ आद्यंतयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये ॥ २८ ॥
यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य ॥ तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥ २९ ॥

तदेव ॥ एतदुक्तं भवति ॥ यदस्य विश्वस्य कारणं प्रकाशकं च ब्रह्म तदात्मकमेवैतत् ॥ न ततः पृथगित्येवं निश्चयफलो नि
गमादिसाधनैर्जायते यो विवेकस्तज्ज्ञानमिति ॥ २८ ॥ तत्र नानाभेदव्यवहारालंबनस्यापि विश्वस्य कारणमात्रात्मकत्वं
सदृष्टांतमाह ॥ यथेति ॥ स्वकृतं सुष्ठु कुंडलादिरूपेण विरचितं यद्धिरण्यं ॥ कीदृशं ॥ यद्धिरण्मयस्य कुंडलादेरुत्पत्तेः पुरस्ता
न्नाशाच्च पश्चात् यदस्ति कटककुंडलमित्यादिनानाव्यपदेशैर्व्यवहारं प्राप्यमाणमपि तदेव यथा तद्वदस्य कारणभूतोऽहमेव नाना
व्यवहारालंबनं न तु मत्तः पृथग्विश्वमिति ॥ २९ ॥ श्रीदत्तात्रेयाय नमः ॥ श्रीरामचंद्राय नमः ॥ श्री ॥ छ ॥ छ ॥ छ ॥ छ ॥

तदेवंकार्यस्यकारणमात्रात्मकतामुक्त्वाप्रकाश्यस्यप्रकाशात्मकतामाह॥विज्ञानमिति॥त्र्यवस्थं॥यकारस्यएत्यकूपाठ
श्छंदोनुरोधेन॥जाग्रदादित्र्यवस्थंयद्विज्ञानंमनस्तदेवस्थाकारणभूतंचयद्गुणत्रयंयच्चकारणकार्यकर्तृ॥कारण
मध्यात्मंकार्यमधिभूतं॥कर्तृत्वमधिदैवं॥एवंगुणत्रयकार्यभूतंत्रिविधंजगत्॥एतद्येनतुर्येणसामान्यज्ञानमात्रेण
समन्वयेनभवति॥येनानुगतंप्रकाशातइत्यर्थः॥तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीति॥यथाच
सुषुप्तस्वसुषुप्तस्रो॥त्रस्यमात्रेभनुसोयन्मनोविदुरित्यादिश्रूयते॥ननुविशेषविज्ञानव्यतिरेकेणनतुर्यनामोपलभ्या
महेतत्राह॥व्यतिरेकतश्चसमाध्यादौयदस्तितदेवसत्यमिति॥१०॥एवंकालत्रयेप्यव्यभिचारिणःसत्सत्यमुक्तंव्यभिचारिण

विज्ञानमेतत्त्र्यवस्थमंगगुणत्रयंकारणकार्यकर्तृ॥समन्वयेनव्यतिरेकतश्चयेनैवतुर्येणतदेवसत्यं॥२०॥नय
त्पुरस्तादुतयन्नपश्चान्मध्येचतन्नव्यपदेशमात्रं॥भूतंप्रसिद्धंचपरेणयद्यत्तदेवतत्स्यादितिमेमनीषा॥२१॥
अविद्यमानोप्यवभासतेयोवैकारिकोराजससर्गएषः॥ब्रह्मस्वयंज्योतिरतोविभातिब्रह्मेंद्रियार्थात्मविकारचि
त्रं॥२२॥

स्वमसत्यतामाह॥नयदिति॥यद्भूतंकार्यंपुरस्तादुत्पत्तेर्नभवति॥यच्चपश्चान्नाशान्मध्येचतत्स्वरूपकंनास्ति॥किंतुव्यपदेशमा
त्रंनाममात्रं॥कुतः॥यतःयद्यत्परेणअन्येनभूतंजातंप्रसिद्धंप्रकाशितंचतत्तदेवकारणप्रकाशकंतावन्मात्रंस्यादित्य
यमितिमेमनीषाबुद्धिः॥वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यं॥सर्वंखल्विदंब्रह्मेत्यादिश्रूयते॥कारणप्रका
शकव्यतिरेकेणचकार्यस्यप्रकाश्यस्यचानुपलंभादितिभावः॥२१॥एवंसामान्यतःकार्यप्रकाश्ययोःकारणकप्रकाश
काभ्याममेदमुक्त्वाप्रस्तुतेतदुभयविवेकपूर्वकंप्रपंचस्यब्रह्माभेदमाह॥अविद्यमानइति॥योयंवैकारिकोविकारस
मूहःसएषःप्रागविद्यमानोराजसःसर्गःरजोद्वारेणब्रह्मकार्यभूतइत्यर्थः॥अवभासतेपिब्रह्मप्रकाश्यमित्यर्थः॥ब्रह्मतुस्व

यस्वतःसिद्धं॥ननुकार्यमित्यर्थः॥ज्योतिश्चप्रका
शकमित्यर्थः॥अतःकारणादिंद्रियाणिचअर्थास्त
न्मात्राणिचआत्मामनश्चदेवानामुपलक्षणं॥
विकाराःपंचभूतानि॥एवंचित्रंलेलैब्रह्मेवभातीति॥२२

उपसंहरति॥ एवमिति॥ एवंनिगमतपःप्रसक्षैत्तिर्यानुमानैःस्फुटंयथाभवतितथाब्रह्मविवेकहेतुभिः॥ तथापरस्यदेहादेरपवा
देनआत्मत्वनिरासनेनच॥ कीदृशेन॥ विशारदेननिपुणेनगुरूणानिमित्तभूतेनेतिवा॥ आत्मविषयसंदेहंछित्वास्वानंद
तुष्टःसन्नखिलेभ्यःइंद्रियादिभ्यउपारमेत्तनिःसंगोभवेत्॥२३॥ परापवादंप्रपंचयति॥ वपुरात्मानभवतिपार्थिवत्वात्
घटवत्॥ तथाइंद्रियाणितदधिष्ठातारोवाः॥ असुःप्राणःमनःधिषणाबुद्धिःसत्वंचित्तंअहंकृतिरेतेआत्मानभवंति॥
कुतःअन्नमात्रअन्नोपष्टंभ्यत्वात्शरीरवत्॥ वायुश्चजलंचकुताशानस्तेजःखंक्षितिरितिपंचभूतानिअर्थाःशब्दादयः

प

एवंस्फुटंब्रह्मविवेकहेतुभिःपरापवादेनविशारदेन॥ छित्वात्मसंदेहमुपरमेतस्वानंदतुष्टोऽखिलकामुकेभ्यः॥२३॥
नात्मावपुःपार्थिवमिंद्रियाणिदेवाह्यसुर्वायुर्जलंहुताशः॥ मनोन्नमात्रंधिषणाचसत्वमहंकृतिःखंक्षितिरर्थसाम्यं
॥२४॥ समाहितैःकःकरणैर्गुणात्मभिर्गुणोभवेन्मत्सुविविक्तधाम्नः॥ विक्षिप्यमाणैरुतकिंनुदूषणंघनैरुपेतैर्विगतैरवेः
किं॥२५॥ यथानभोवाय्वनलांबुभूगुणैर्गतागतैर्वर्तुगुणैर्नसज्जते॥ तथाक्षरंसत्वरजस्तमोमलैरहंमतेःसंसृति
हेतुभिःपरं॥२६॥७

साम्यंप्रकृतिश्चनात्माजडत्वात्॥ घटवत्॥ यद्वाहिशब्दोनानुमानांतराणिसूचितानि॥ तद्यथाइंद्रियाण्यात्मानभवंतिका
रणत्वात्॥ प्राणश्चवायुत्वात्बाह्यवायुवत्॥ भूतान्यात्मानभवंतिजडत्वात्॥ घटवदित्यनुमानानि॥२४॥ एवंविवेकवतान्
वतोमुक्तस्यनेंद्रियादिकृतगुणदोषसंबंधइत्याह॥ समाहितैरिति॥ मत्सुविविक्तधाम्नःममसुष्ठुविविक्तधामस्वरूपंय
नतस्यप्रकाशकस्यगुणदोनभवंतिइतिरविदृष्टांतेनोक्तं॥२५॥ प्रसंगब्रह्मत्वेनावस्थितस्यनकेपिगुणदोषाइत्याकाशदृष्टां
तेनाह॥ यथेति॥ वाय्वादीनांशोषणदहनक्लेदनरजोधूसरत्वादिभिःगतागतैरागमापायिभिर्ऋतुगुणैःशीतोष्णादिभिर्वा॥
अहंमतेःअहंकारात्परमक्षरंसंसृतिहेतुभिर्नयुज्यते॥ यद्वाअहंकारस्यसंसृतिहेतुभिरिति॥२६॥७॥

मुक्तनरसम्यक्ज्ञानीनयेयेष्टमाचरेदित्याह॥द्वाभ्यां॥तथापीति॥गुणेषुविषयेषुरजःरागःमनःकषायःइतिदुर्निरासतामाह॥२७
एतदेवदृष्टांतेनोपपादयति॥यथेति॥नृणामामयोरोगःअसाधुअसम्यग्यथाभवतितथाअपक्वकषायकर्मअपक्वात्अदग्धाः
कषायारागादयस्तन्मूलानिकर्माणिचयस्मिन्तत्॥अतएवसर्वसंगंसर्वैपुत्रादिषुसज्जमानंमनःकुयोगिनमसम्यक्ज्ञा
निनंविध्यतिभ्रंशयति॥२८॥ननुकथंचिद्विषयसंगेयदियोगभ्रंशःस्यात्॥अलंतर्हिसोपायेनयोगमार्गेणतत्राह॥कुयोगि
नइति॥मनुष्यभूतैर्बंधुशिष्यादिरूपैस्त्रिदशैरुपसृष्टैःप्रेरितैः॥तथाचश्रुतिः॥यस्मान्नदेषांनप्रियंयदेतन्मनुष्याविदुरिति॥

तथापिसंगःपरिवर्ज्जनीयोगुणेषुमायारचितेषुतावत्॥मद्भक्तियोगेनदृढेनयावद्रजोनिरस्येतमनःकषायः॥२७॥यथा
ऽमयोऽसाधुचिकित्सितोनृणांपुनःपुनःसंतुदतिप्ररोहन्॥एवंमनोऽपक्वकषायकर्मकुयोगिनंविध्यतिसर्वसंगं॥२८॥
कुयोगिनोयेविहितांतरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः॥तेप्राक्तनाभ्यासबलेनभूयोयुंजंतियोगंनतुकर्मतंत्रं॥२९॥
करोतिकर्मक्रियतेचजंतुःकेनाप्यसौचोदितआनिपातात्॥नतत्रविद्वान्प्रकृतौस्थितोपिनिवृत्ततृष्णःस्वसुखा
नुभूत्या॥३०॥तिष्ठंतमासीनमुतव्रजंतंशयानमुक्षंतमदंतमन्नं॥स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमति
र्नवेद॥३१॥६२

भूयोजन्मांतरे॥ननुकर्मतंत्रंकर्मविस्तारं॥२९॥ननुविदुषामपिसर्वथाकर्मदुष्परिहरमितिपुनःसंसारःस्यात्॥अतआह॥
करोतीति॥विदुषोऽन्योऽसौजंतुर्देहएवभोजनादिकर्मकरोति॥क्रियतेविक्रियतेच॥तेनकर्मणापुण्याद्यपिप्राप्नोतीत्यर्थः॥
केनापिसंस्कारादिनाचोदितःसन्॥आनिपातात्मरणपर्यंतंकर्मकरोति॥विद्वांस्तुप्रकृतौदेहेस्थितोपितत्रकर्मणिनविक्रि
यते॥निरहंकारत्वाद्धर्षविषादादिभिःसंसारंनप्राप्नोति॥३०॥किंच॥आस्तांतावदैहिककर्मभिर्विकारशंका॥यतोदेहमप्यसौ
नपश्यतीत्याह॥तिष्ठंतमिति॥उक्षंतंमूत्रयंतंस्वभावप्राप्तमन्यदपिदर्शनस्पर्शनादिईहमानंकुर्वंतमात्मानंदेहं॥३१॥

नन्विंद्रियवतःसर्वथाकथमदर्शनंसंभवतितत्राह।यदिस्मेति॥यद्यपिअस्मसतांबहिर्मुखानामिंद्रियाणामर्थंपश्यति।तथापिना
नात्वात्॥मिथ्यास्वप्नवदिसनुमानेनविरुद्धंबाधितंसत्अन्यदात्मव्यतिरिक्तंमनीषिवस्तुतयानमन्यते।स्वापादुत्थायप्रबुध्य
संस्कारमात्रेणस्वाप्नंविषयंस्फुरंतंअतएवस्वयमेवतिरोभवंतंयथानद्रष्टा॥२२॥तद्वदेवमात्मानविक्रियतइत्युक्तं॥नन्वेतदुप
पन्नंबद्धावस्थयात्यज्यमानत्वात्।मुक्तावस्थायांचगृह्यमाणत्वात्।नहिव्रीहयोवघातेनव्रीहिभावंसागस्तंदुलीभावेनगृ
ह्यमाणानविक्रीयंतेतत्राह।पूर्वमिति।बंधावस्थायांगुणैःकर्मभिश्चित्रमज्ञानकार्यंदेहेंद्रियादिलक्षणं।आत्मन्यध्यासे
नाविविक्तंगृहीतमासीत्।तदेवपुनर्ज्ञानेनैवनिवर्तते।आत्मातुनकेनापिरूपेणगृह्यतेनापिसज्यते।अयंभावः॥मूलं॥

यदिस्मपश्यत्सदिंद्रियार्थंनानानुमानेनविरुद्धमन्यत्।नमन्यतेवस्तुतयामनीषिस्वाप्नंयथोत्थायतिरोदधानं॥२२॥
पूर्वंगृहीतंगुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग।निवर्ततेतत्पुनरीक्षयैवनगृह्यतेनापिविसृज्यआत्मा॥२३॥
यथाहिभानोरुदयोन्नचक्षुषांतमोनिहन्यान्नतुसद्विधत्ते।एवंसमीक्षानिपुणासतीमेहन्यात्तमिस्रंपुरुषस्यबुद्धेः॥२४॥
एषःस्वयंज्योतिरजोऽप्रमेयोमहानुभूतिःसकलानुभूतिः।एकोऽद्वितीयोवचसांविरामेयेनेषितावागसवश्चरंति॥२५॥

क्रियाफलत्वेतावदात्मनोविकारः॥तस्याज्ञारोपितात्ज्ञानमात्रनिवर्त्तिरूपत्वात्॥नात्मसंस्पर्शित्वंबंधमोक्षयोः॥अतोनविका
रइति॥२३॥एतदेवदृष्टांतेनस्पष्टयतियथेति।नतुपूर्वमेवसत्घटादिपुनर्विधत्ते।करोति।मेसमीक्षाआत्मविद्या॥२४॥आ
त्मनोनिर्विकारतांप्रपंचयति।एषइति।अनेनापरोक्षतयानित्यप्राप्तस्यात्मनःप्राप्तिंवारयति।स्वयंज्योतिरित्यनेनाज्ञान
मलापाकरणलक्षणांविकृतिंवारयति।अजइत्युत्पत्तिंवारयति।अप्रमेयइतिज्ञानलक्षणातिशयाधानेनसंस्कारं।महा
नुभूतिरितिदेशकालपरिच्छेदाभावेनास्तित्ववृद्धिविपरिणामापक्षयनाशान्।स्वयंज्योतिष्ट्वेहेतुःसकलानुभूति

रिति॥ एकोऽद्वितीय इति विकारहेतोरन्यस्याभावान्नकोपि विकार इति दर्शयति॥ ननु श्रुतिविषयस्य कथं स्वयंज्योतिष्ट्वमित्यत्राह॥ वचसां विरामेष्यगोचरं चेत्तेन न निबद्धोस्त्यसौ॥ तथा च श्रुतिः॥ यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति॥ तत्र हेतुः॥ येनेषिता प्रेषि ताः॥ तथा च श्रुतिः॥ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः॥ केनेषितां वाचमिमां वदन्ति॥ चक्षुः श्रोत्रं क उ देवो युनक्ति॥ श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स प्राणस्य प्राणश्चक्षुषश्चक्षुरिति॥ २५॥ अद्वितीयत्वमुपपादयितुं भेदस्या वास्तवत्वमाह॥ एतावानिति॥ केवले अभिन्ने आत्मन् आत्मनि विकल्प इति यत्॥ एतावान्सर्वोप्यात्मनो मनसः संमोहः भ्रमः॥ यतः स्वमात्मानमन्तरेण विना यस्य विकल्पस्यावलंबः॥ आश्रयो नास्ति रज्जुं तम् भ्रमस्येव मुक्तिं विना॥ नेह नास्ति किंचन॥ इद्द्रोमा

एतावानात्मसंमोहो यद्विकल्पस्तु केवले॥ आत्मन्नृते स्वमात्मानमवलंबो न यस्य हि॥ २६॥ यन्नामाकृतिभिर्ग्राह्यं पंचवर्ण मबाधितं॥ व्यर्थेनाप्यर्थवादोयं द्वयं पंडितमानिनां॥ २७॥ योगिनोऽपक्वयोगस्य युंजतः काय उत्थितैः॥ उपसर्गैर्विहन्येत तत्रायं विहितो विधिः॥ २८॥ ७

याभिः पुरूरूपईयते युक्तात्यस्य हस्यः ज्ञाता दृश्नोस्येवं उसादिश्रुतेस्सर्यः॥ ३६॥ केचित्तु नः प्रत्यक्षादिप्रतीत प्रपंचबाधायोगात्॥ वेदांतार्थानां च कृत्स्नस्यार्थकर्तृप्रतिपादनपरत्वेनार्थवादत्वात्॥ द्वैतं सत्यमिति मन्यंते तन्मतमनूद्य दूषयति॥ यदिति॥ नामाकृतिभिः नामरूपाभ्यां लक्षितं पंचभूतात्मकं द्वयं द्वैतं॥ यत्तत् दबाधितमिति॥ पंडितमानिनां अत्र वयं पंडिता इत्यभिमानवतां वेदांतेष्वयमर्थ इति प्रतीतिः न तत्वविदां॥ यतः अर्थेनापि विनाप्यपार्थेन साप्रतीतिः॥ तथाहि॥ न तावद्विध्यैकवाक्यत्वं तेषामस्ति॥ यतोऽर्थवादत्वं स्यात्॥ न चाकर्तृभोक्तृपरमानंदरूपात्मा प्रतिपादनं कर्मविधिविरोधितां भजते॥ न चाबाधितत्वं द्वैतस्य॥ नामरूपात्मकत्वात्॥ ग्रासत्वात्॥ पंचवर्णात्मकत्वात्॥ स्वप्नवद्दिसाधनुमानैर्वाचारंभणादिश्रुतिभिश्च बाधितत्वादिति॥ २७॥ तदेवं ज्ञानयोगं सपरिकरं निरूप्येदानीं तन्निष्ठस्य विघ्नप्रतीकारमाह॥ योगिन इति त्रिभिः॥ योगं युंजतः कायोपपतैरेवोत्थ

योगधारणया सोमसूर्यादिधारणया संतापशैत्यादीन्॥ आसनैर्वायुधारणान्वितैर्वातादिरोगान्॥ तपोमंत्रौषधैः पापग्रहसर्पादिकृतान्॥३९॥ ममानुध्यानादिभिः कामादीन् योगेश्वरानुवृत्त्या दंभमानादीन् हन्यात्॥४०॥ अन्ये तु देहसिद्ध्यर्थमेव तत्सर्वं कुर्वंति तद्दूषयति॥ केचित्पुनरेतैरुपायैर्देहमेव सुकल्पं जरारोगादिरहितं वयसि तारुण्ये स्थिरं कृत्वा॥ अदृष्टपरकायप्रवेशादिसिद्धये तत्तद्धारणारूपं योगं युंजंति॥ न तु ज्ञाननिष्ठारूपं॥४१॥ कुशलैः प्राज्ञैरादरणीयं न भवति॥ वनस्पतिवदात्मैव स्थायी श

योगधारणया कांश्चिदासनैर्धारणान्वितैः॥ तपोमन्त्रौषधैः कांश्चिदुपसर्गान्विनिर्दहेत्॥३९ कांश्चिन्ममानुध्यानेन नामसंकीर्त्तनादिभिः॥ योगेश्वरानुवृत्त्या वा हन्यादशुभदांछनैः॥४०॥ केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं॥ विधाय विविधोपायैरथ युंजंति सिद्धये॥४१॥ न हि तत्कुशलादृत्यं तदायासो ह्यपार्थकः॥ अंतवत्वाच्छरीरस्य फलस्येव वनस्पतेः॥४२॥ योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात्॥ तच्छ्रद्दध्यान्न मतिमान्योगमुत्सृज्य मत्परः॥४३॥ योगचर्यामिमां योगी विचरन्मदपाश्रयः॥ नांतरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः॥४४॥ इति भाग॰ एकाद॰

अष्टाविंशोऽध्यायः॥४४॥७

रीरं तु फलवन्नश्वरमित्यर्थः॥४२॥ ननु कश्चित्समाध्यंगत्वेनापि प्राणायामादियोगे क्रियमाणे जरारोगाद्यभावो दृश्यते सत्यं तथापि समाधिमुत्सृज्य न तत्र सज्जेतेत्याह॥ योगमिति॥ तत् तां देहसिद्धिं न श्रद्दध्यात् न विश्वसेत्॥४३॥ तदेवं विघ्नप्रतीकारैर्योगं कुर्यादित्युक्तं॥ मच्छरणस्य तु न विघ्नशंकापीत्याह॥ योगचर्यामिति॥ विचरन् आचरन् स्वसुखे अनुभूः अनुभूतिर्यस्य सः॥ स्पृहामूला हि विघ्नाः सा च मदपाश्रयस्य न वर्त्तते॥ अतोंतरायैर्विहतः स्वानंदपूर्णो भवतीति॥ समाहृत्य स्वयोगं तु समस्तोपनिषद्रसं॥ सख्युर्मुख्यतमां भक्तिं मुक्त्यै पुनरुपादिशत्॥४४॥ इति एकादशे अष्टाविंशः॥२८॥७

उनम्निंशेतु यः पूर्वं विस्तरेणोपवर्णित ॥ भक्तियोगस्तमेवाह स्वभक्ताय समासतः ॥१॥ अतिकृच्छ्रमिवालक्ष्य योगं संगैकसंपदि सुखोपायं पुनः कृष्णमुद्धवः परिपृच्छति ॥२॥ अनात्मनः अवशीकृतमनसः अंजसा अप्रयासेनैव यथा सिद्ध्येत्तत् अंजसा सुबोधं यथा तथा मे ब्रूहि ॥२॥ सुदुष्करतां प्रपंचयति ॥ प्रायश इति ॥ मनो युंजंतो निगृह्णंतः विषीदंति क्लिश्यंति ॥ कुतः असमाधानात् अनिग्रहात् कथंचिन्मनोनिग्रहे च कर्शिताः श्रांताः संतः ॥३॥ यस्मादेवं केचन विषीदंति ॥ अथातः अत एव ये हंसाः सारासारविवेकचतुराः ते तु आनंददुघं समस्तानंदपरिपूरकं तव पदांबुजमेव सुखं यथा भवति तथानुनिश्रितं आश्रयेरन् सेवंते ॥ अमी तु त्वन्मायया विहताः किं ॥ ये योगकर्मभिर्मानिनः संतो न आश्रयंते ॥ यद्वा अमी त्वदुक्ताः त्वन्मायया

॥उद्धव उवाच॥ सुदुष्करामिमां मन्ये योगचर्यामनात्मनः ॥ यथांजसा पुमान्सिध्येत्तन्मे ब्रूह्यंजसाच्युत ॥१॥ प्रायशः पुंडरीकाक्ष युंजंतो योगिनो मनः ॥ विषीदंत्यसमाधानान्मनोनिग्रहकर्शिताः ॥२॥ अथात आनंददुघं पदांबुजं हंसाः श्रयेरन्नरविंदलोचन ॥ सुखं तु विश्वेश्वर योगकर्मभिस्त्वन्माययामी विहिता न मानिनः ॥३॥ किं चित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वं ॥ योऽरोचयत्सह मृगैः स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः ॥४॥

न विहिताः अत एव योगकर्मभिः कृत्वा मानिनो न भवंति ॥ अन्ये तु त्वन्मायया मोहिताः संतो वयं योगज्ञाः वयं कर्मकुशलाः इति केवलं गर्विता भवंति न तु मुच्यंत इत्यर्थः ॥३॥ त्वदुक्तास्तु त्वत्प्रसादेन कृतार्था भवंतीति नाति चित्रमित्याह ॥ किमिति ॥ अनन्यशरणेषु दासेषु तवात्मात्मसात्त्वं तदधीनत्वं यत् ॥ यथा नंदगोपी बलिप्रभृतिषु एतत्किं चित्रं नाश्चर्यमित्यर्थः ॥ यतो यो भवान् श्रीरामरूपेण मृगैर्वानरैः सह साहित्यं सख्यमिति यावत् ॥ अरोचयत् ॥ प्रीत्या कृतवान् ॥ कथंभूतः ॥ ईश्वराणां ब्रह्मादीनां यानि श्रीमंति किरीटानि तेषां तटानि अग्राणि तैः पीडितं लुठितं पादपीठं यस्य ॥ स्वयं तथाभूतोपि सन् ॥४॥

ऽतः त्वां परित्यज्य को नाम अन्यत्संश्रये दित्याह ॥ तं त्वेति ॥ तमेवंभूतं त्वां को नु विसृजेत् ॥ न भजेत् ॥ कथंभूतः स्वकृतवित् बलिप्रह्लादादिषु त्वया कृतमनुग्रहं जानन् ॥ यद्वा अस्मिन्नेवांतर्यामितया कृतमुपकारं विद्वान् ॥ तदेवाह ॥ अखिलात्मदयितेश्वरं ॥ अखिलस्य जगतः आत्मानं चेतयितारं ॥ आत्मत्वादेव दयितं प्रेष्ठं सुसेव्यं ॥ ईश्वरत्वाद्धृदयं भजनीयं ॥ किंच आश्रितानां सर्वार्थदं ॥ तर्हि किंफलोद्देशेनाहं सेव्यः नहि नहि ॥ किमप्यनिरुक्तं ॥ स्वर्गादित्वयादत्तमपि को वा भजेत् सेवेत ॥ कथंभूतं तत्स्वर्गादि ॥ यत्केवलं भूसे इंद्रियभोगाय अनु अनंतरमेव तद्विस्मृतये भवति ॥ यद्वा त्वद्व्यतिरिक्तं किमपि देवतांतरं धर्मज्ञानादिसाधनं वा भूत्यै ऐश्वर्याय संसारस्य विस्मृतये मोक्षाय को वा भजेत् ॥ न कोपि ॥ ननु तत्साधनं विना भोगमोक्षादिफलं कथं स्यात्तत्राह ॥ किं वेति ॥ त

तं त्वाखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत को नु ॥ को वा भजेत्किमपि विस्मृतयेऽनु भूत्यै किं वा भवेन्न तव पादरजोजुषां नः ॥ ५ ॥ नैवोपयंत्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरंतः ॥ योंतर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति ॥ ६ ॥ श्रीशुक उवाच ॥ इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः ॥ गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहरस्मितः ॥ ७ ॥

उक्तं ॥ यावै साधनसंपत्तिः पुरुषार्थचतुष्टये ॥ यां ते विना तदाप्नोति नरो नारायणाश्रय इति ॥ ५ ॥ आस्तामन्यभजनवार्ता त्वत्कृतोपकारस्स्वत्वय्यात्मनिवेदनेनैव तिष्कृतिर्नान्यथेत्याह ॥ नैवेति ॥ अपचितिं प्रत्युपकारं आनृण्यमिति यावत् कवयो ब्रह्मविदोपि नैवाप्नुवंति ॥ यतः त्वत्कृतमुपकारं स्मरंतः ऋद्धमुदः उपचितपरमानंदाः ॥ उपकारमेवाह ॥ बहिराचार्यवपुषा गुरुरूपेण अंतश्चैत्यवपुषा अंतर्यामिरूपेण अशुभं विषयवासनां विधुन्वन्निरस्यन् स्वगतिं निजरूपं प्रकाशयतीति तस्य तव ॥ ६ ॥ ईश्वरेश्वरो हरिः ॥ जगत्क्रीडनकं क्रीडोपकरणं यस्य सः ॥ ननु जगत्सृष्ट्यादिना ब्रह्मरुद्रादयः क्रीडंतीति तत्राह ॥ स्वशक्तिभिः सत्वादिभिर्गृहीतमूर्तित्रयो येन सः ॥ सप्रेम प्रेमसहितं मनोहरं स्मितं यस्य सः ॥ सप्रेमं यथा भवति तथा जगादेति वा ॥ ७ ॥ श्री ॥ ७ ॥

हंतेति संहर्षसंबोधनं॥ सुमंगलान् सुखस्वरूपान्॥ मृत्युं संसारं दुर्जयं मन्यैरुपायैः॥८॥ धर्मानेवाह॥ कुर्यादिति त्रयोदशभिः॥ मां
स्मरन् शनकैरसंभ्रमतः कुर्यात् तदाह॥ मयीति॥ अर्पितं मनश्चित्तं संकल्पविकल्पानुसंधानात्मकं येन॥ अत एव मद्धर्मेष्वेवा
त्ममनसो रतिर्यस्य सः॥९॥ पुण्यदेशत्वलक्षणं मद्भक्तैरिति॥ देवादिषु ये मद्भक्तास्तेषामाचरितानि कर्माणि चाश्रयेत॥१०॥ सत्रे
ण संभूय वा॥११॥ अंतरंगां भक्तिमाह॥ मामिति त्रिभिः॥ सर्वभूतेष्वात्मनि चात्मानमीश्वरं स्थितं मामेवेक्षेत॥ ननु कथमेक
स्य सर्वेषु वृत्तिस्तत्राह॥ बहिरंतः पूर्णमित्यर्थः॥ तत्कुतः अपावृतमनावरणं॥ तदपि कुतः॥ यथा खं॥ असंगत्वादित्यर्थः॥१२

॥श्रीकृष्ण भगवानुवाच॥ हंत ते वर्णयिष्यामि मम धर्मान्सुमंगलान्॥ यान्श्रद्धयाचरन्मर्त्यो मृत्युंजयति दुर्जयं॥८॥ कुर्या
त्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन्॥ मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः॥९॥ देशान्पुण्यान्समाश्रयेत मद्भक्तैः सा
धुभिः श्रितान्॥ देवासुरमनुष्येषु मद्भक्ताचरितानि च॥१०॥ पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान्॥ कारयेन्नृत्य
गीताद्यैर्महाराजविभूतिभिः॥११॥ मामेव सर्वभूतेषु बहिरंतरपावृतं॥ ईक्षेतात्मनि चात्मानं यथा खममलाशयः॥१२॥
इति सर्वाणि भूतानि मद्भावेन महाद्युते॥ सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः॥१३॥ ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्य
र्के स्फुलिंगके॥ अक्रूरे क्रूरके चैव समदृक् पंडितो मतः॥१४॥

हे महाद्युते॥ अतिप्राज्ञेति॥ अनेन प्रकारेण केवलं ज्ञानरूपां दृष्टिमाश्रितः सन् सर्वाणि भूतानि मद्भावेन मन्यमानः सभाजय
न्पंडितो मत इत्युत्तरेणान्वयः॥१३॥ ननूत्तमाधमेष्वेकरूपेण सभाजनमपांडित्यमेव स्यात्॥ पूज्यपूज्यादिव्यतिक्रमादित्याशंक्य
तामेव ज्ञानदृष्टिं प्रपंचयति॥ ब्राह्मण इति॥ विषमेष्वपि समदृक् समं मामेव पश्यन्॥ वैषम्यमेव चतुर्धा दर्शयति॥ ब्राह्म
णेषु पुक्कस इति जातिवैषम्यं॥ पुक्कसोऽसज्जातिविशेषः॥ स्तेने ब्रह्मस्वापहारिणि॥ ब्रह्मण्ये ब्राह्मणेभ्यो दातरीति कर्मतः॥ अ
र्के विस्फुलिंग इति गुणतः॥ अक्रूरे शांते क्रूरे वेत्ति स्वभावतः॥१४॥ ७

नरेष्वीश्वरदृष्टिं कुर्वतः स्मयःफलविशेषमाह॥ नरेष्विति॥ समोनमहीनेषु स्पर्द्धादयः स्वस्मिन्नहंकारश्चहिनिश्चितं वियंतिनश्यंति॥ १५॥ अतोंऽतर्यामीश्वरदृष्ट्यासर्वान्प्रणमेदित्याह॥ विसृज्येति॥ स्मयमानान्हसतःस्वान्सखीन्॥ तथादैहिकीं दृशं॥ अहमुत्तमःसतु नीचइतिदृष्टिं तयादृष्ट्यायाव्रीडालज्जातांचविसृज्यचांडादीनभिव्याप्यप्रणमेत॥ १६॥ एवंपंचभिःश्लोकैरुक्तायाःसदृष्टेः अवधिमाह॥ द्वाभ्यां॥ यावदिति॥ १७॥ तस्यएवंकुर्वतःपुंसःसर्वंब्रह्मात्मकमेवभवति॥ कुतः आत्ममनीषयासर्वत्रेश्वरदृष्ट्याबाधविघातया अतःपरितोब्रह्मैवपश्यन्सर्वतःक्रियामात्रादुपरमेत॥ १८॥ किमयमेवोपायः अस्तिवान्योपीसपेक्षायांसंतिबहवःपसमीची

नरेष्वभीक्ष्णंमद्भावोपुंसोभावयतोऽचिरात्॥ स्पर्द्धासूयातिरस्काराःसाहंकाराविंयंतिहि॥ १५॥ विसृज्यस्मयमानान्स्वान्दृशंव्रीडांचदैहिकीं॥ प्रणमेद्दंडवद्भूमावाश्वचांडालगोखरं॥ १६॥ यावत्सर्वेषुभूतेषुमद्भावोनोपजायते॥ तावदेवमुपासीतवाङ्मनःकायवृत्तिभिः॥ १७॥ सर्वंब्रह्मात्मकंतस्यविद्ययात्ममनीषया॥ परिपश्यन्नुपरमेत्सर्वतोमुक्तसंशयः॥ १८॥ अयंहिसर्वकल्पानांसध्रीचीनोमतोमम॥ मद्भावःसर्वभूतेषुमनोवाक्कायकर्मभिः॥ १९॥ नह्यंगोपक्रमेध्वंसोमद्धर्मस्योद्धवाण्वपि॥ मयाव्यवसितःसम्यक्निर्गुणत्वादनाशिषः॥ २०॥ योयोमयिपरेधर्मःकल्पतेनिःफलायचेत्॥ तदायासोनिरर्थःस्याद्भयादेरिवसत्तम॥ २१॥ ७

नस्त्वयमेवेत्याह॥ अयंहीति॥ १९॥ भगवद्धर्मलक्षणोपायस्यसमीचीनत्वमेवोपपादयति द्वाभ्यांनहीति॥ अंगहेउद्धवअनाशिषो निष्कामस्यधर्मस्योपक्रमेसति अण्वपिईषदपिवैगुण्यादिभिर्नाशोनास्त्येव॥ यतोमयैवनिर्गुणत्वादयंधर्मःसम्यग्व्यवसितो निश्चितः॥ नतुमन्वादिमुखेनकथंचित्॥ २०॥ किंचयोयइति॥ अयमर्थः॥ किंवक्तव्यंमद्धर्मस्यनध्वंसइति॥ यतोलौकिकोपि योयोनिरर्थःव्यर्थःआयासःसोपिमयिपरे॥ निष्फलायचेत्कल्पतेनिष्कामतयाअर्पितश्चेत्तर्हिधर्मएवस्यात्॥ निरर्थायासद

भांतः॥ अथवायमर्थो लोकोर्हेतोः पलायनतांकीता
सिद्धुःसामंत्रदता॥ २४॥ ४

अतो मनुजनमेव बुद्धेर्विवेकस्य मनीषायाश्चातुर्यस्य च फलमित्याह॥ एष इति॥ तामेव दर्शयति॥ सत्यमनृतं च मामां अनृतेना॰
सत्येन मर्त्येन विना शिना मनुष्यदेहेन इह अस्मिन्नेव जन्मनि प्राप्नोतीतियत् सैव बुद्धिर्मनीषा चेति॥ बुद्धिर्विवेकः मनीषा चातु
र्यं॥२२॥ महाप्रकरणार्थमुपसंहरति॥ द्वाभ्यां॥ एष इति॥२३॥२४॥ किंच आख्यातानखानं॥ तदनुसंधानकथनपठनश्रवण
पराणामप्येतदेव फलं भवतीत्याह॥ चतुर्भिः॥ सुविविक्तमिति॥ मया सुविविक्तं दत्तोत्तरं॥ एतदाख्यानमपि यो धारयेत् तु अ

एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणां॥ यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतं॥२२॥ एष तेऽभिहितः कृत्स्नो ब्रह्मवादस्य
संग्रहः॥ समासव्यासविधिना देवानामपि दुर्गमः॥२३॥ अभीक्ष्णशस्ते गदितं ज्ञानं विस्पष्टयुक्तिमत्॥ एतत् विज्ञाय
मुच्येत पुरुषो नष्टसंशयः॥२४॥ सुविविक्तं तव प्रश्नं मयैतदपि धारयेत्॥ सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति॥२५॥
य एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलं॥ तस्याहं ब्रह्मदायस्य ददाम्यात्मानमात्मना॥२६॥ य एतत्समधीयीत पवित्रं पर
मं शुचि॥ स पूयेताहरहर्मां ज्ञानदीपेन दर्शयन्॥२७॥ य एतच्छ्रद्धया नित्यमव्यग्रः शृणुयान्नरः॥ मयि भक्तिं परां कुर्वन्क
र्मभिर्न स बध्यते॥२८॥ अप्युद्धव त्वया ब्रह्म सखे समुपधारितं॥ अपि ते विगतो मोहः शोकश्चासौ मनोभवः॥२९॥ नैतत्त्व
या दांभिकाय नास्तिकाय शठाय च॥ अशुश्रूषोरभक्ताय दुर्विनीताय दीयतां॥३०॥ ७

नुसंदध्यात् सः ब्रह्मगुह्यं वेदेपि रहस्यं॥२५॥ सुपुष्कलं यथा भवति तथा ब्रह्मदायस्य ब्रह्मददातीति तथा तस्य ज्ञानोपदेष्टु॥२६॥
समधीयीत उच्चैः पठेत्॥ परमं शुचिः अन्येषामपि शोधकं॥ पूयेत शुध्येत॥२७॥२८॥ सम्यग्ज्ञानानुत्पत्तौ पुनरप्युपदेक्ष्या
मीत्याशयेनाह पृच्छति॥ अपीति॥ अपि किं॥२९॥ उपधारितमाकलय्याह नैतदिति॥ शठाय वंचकाय॥३०॥ श्री॥ ७॥ ७॥

शूद्राणां योषितां च यदि भक्तिः स्यात् तर्हि ब्रूयात्॥ अतस्तासामधिकारस्सर्वं॥२३॥ एतज्ज्ञानेन च पुमान् कृतार्थो भवतीत्याह॥ नैतदि
ति॥ अत्र दृष्टांतमाह॥ पीयूषं स्वादु॥२२॥ ननु संति बहूनि ज्ञेयानि तत्तत्फलसाधनानि सत्सं॥ सत्यं भक्तानां भक्तस्य तु सर्वं मह्यमेव
अतो मदेककारणो भवेत्याह॥ ज्ञान इति॥ ज्ञानादौ यावान् धर्मादिलक्षणः चतुर्विधोऽर्थः तावान् सर्वोऽपि ते अहमेव॥ तत्र ज्ञाने मोक्षः
कर्मणि विहिते धर्मः॥ कर्मण्येव स्वाभाविके तु कामः॥ योगे त्वणिमादिसिद्धयः॥ वार्तायां कृष्यादावर्थः॥ दंडनीतावैश्वर्यमिति

एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च॥ साधवे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषितां॥२१॥ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यम
वशिष्यते॥ पीत्वा पीयूषममृतं पातव्यं नावशिष्यते॥२२॥ ज्ञाने कर्मणि योगे च वार्तायां दंडधारणे॥ यावानर्थो नृणां
तात तावांस्तेऽहं चतुर्विधः॥२३॥ मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे॥ तदामृतत्वं प्रतिपद्यमा
नो मयात्मभूयाय च कल्पते वै॥२४॥ श्रीशुक उवाच॥ स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचो निशम्य॥ बद्धां
जलिः प्रीत्युपरुद्धकंठो न किंचिदूचेऽश्रुपरिप्लुताक्षः॥२५॥ विष्टभ्य चित्तं प्रणयावघूर्णं धैर्येण राजन् बहु मन्यमानः॥ कृ
तांजलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविंदं॥२६॥ उद्धव उवाच॥ विद्रावितो मोहमहांधकारो य आश्रितो मे तव
सन्निधानात्॥ विभावसोः किं नु समीपगस्य शीतं तमो भीः प्रभवंत्यजाद्य॥२७॥
सिद्ध्यैश्वर्ययोरपि कामांतरंगत्वात् चतुर्विधं॥२३॥ कुतस्त्वत्त आह॥ मर्त्य इति॥ यदा त्यक्तसमस्तकर्मा सन्मे निवेदितात्मा भ
वति तदासौ मे विचिकीर्षितः विशिष्टं कर्तुमिष्टो भवति॥ ततश्चामृतत्वं मोक्षं प्रतिपद्यमानः॥ मयात्मभूयाय मदैक्याय मत्स
मानैश्वर्यायेति यावत्॥ कल्पते योग्यो भवति वै भुवं॥२४॥ आदर्शितो योगमार्गो यस्मै सः॥२५॥ प्रणयेनावघूर्णं क्षुभितं चित्तं
धैर्येण विष्टभ्य बहु मन्यमानः॥२६॥ मे मया य आश्रितः आसीत्॥ स तव सन्निधानेनैव विद्रावितः॥ प्रभवंति किं नु॥ बाधा

किंचयद्यपित्वत्सन्निधानाद्देवगतः॥तथापिअनुकंपिताभवताविज्ञातुमयःप्रदीपश्चप्रसर्पितःस्वमाययापहतःपुनःसम
र्पितःअतस्तवकृतज्ञःयस्त्वयाकृतमनुग्रहंजानातिसकोनामत्वदीयंपादमूलंहित्वाऽन्यच्चरणंसमीयात्तमाश्रयेत॥३८
किंच॥दाराहर्द्दिषुत्वयास्वमाययास्नेहपाशःप्रसारितः॥सत्वयैवात्मतत्वज्ञानशास्त्रेणखङ्गेणछिन्नः॥३९॥एवंयद्यपि
त्वयाबहुकृतंतथाप्येतावत्प्रार्थयन्नाह।नमोस्त्विति॥अनुशाधिशिक्षय॥अनुशासनीयमाह॥यथेति॥मुक्ताव

प्रसर्पितोमेभवताऽनुकंपिनाभृत्यायविज्ञायनमयःप्रदीपः॥हित्वाकृतज्ञस्तवपादमूलंकोन्यत्समीयाच्चरणंत्व
दीयं॥३८॥वृक्णश्चमेसुदृढस्नेहपाशोदाराहर्दव्यंकसात्मजेषु॥प्रसारितःसृष्टिविवृद्धयेत्वयास्वमाययाह्यात्म
सुबोधहेतिना॥३९॥नमोस्तुतेमहायोगिन्प्रपन्नमनुशाधिमां॥यथात्वच्चरणांभोजेरतिःस्यादनपायिनी॥४०॥
॥श्रीभगवानुवाच॥गच्छोद्धवमयादिष्टोबदर्याख्यंममाश्रमं॥तत्रमत्पादतीर्थोदेस्नानोपस्पर्शनैःशुचिः॥४१॥
ईक्षयालकनंदायाविधूताशेषकल्मषः॥वसानोवल्कलान्यंगवन्यभुक्सुखनिःस्पृहः॥४२॥तितिक्षुर्द्वंद्वमात्रा
णांसुशीलःसंयतेंद्रियः॥शांतःसमाहितधियाज्ञानविज्ञानसंयुतः॥४३॥मत्तोनुशिक्षितंयत्तेविविक्तमनुभावय
न्॥मय्यावेशितवाक्चित्तोमद्धर्मनिरतोभव॥४४॥७

प्यनपायिनी॥४०॥तदुक्तमोमिसंगीकृत्यतथापिमयादिष्टोलोकसंग्रहायएतावत्कुर्वित्याह॥गच्छेति॥आदिष्टोनियुक्तः॥
४१॥स्नानादेःपूर्वमेवमत्पादतीर्थोदकमूर्त्तायाअलकनंदायाःगंगायाईक्षया॥वसानःपरिदधानः॥४२॥द्वंद्वमात्राणांशीतोष्णा
दिविषयाणांसुशीलः॥आर्जवादिस्वभावोसभवः॥४३॥तत्त्वयाविविक्तंसुविचारितं॥तिस्रःत्रिगुणात्मिकागतीःअतिक्रम्य॥४४॥

हरिमेधसासंसारंहरतिमेधायस्यतेनश्रीकृष्णेन॥ अद्वंद्वपरोपिसुखदुःखनिर्मुक्तोपि॥ अपक्रमेनिर्गमसमये॥४५॥ किंचसुदुस्त्य
जःस्नेहोयस्मिन्तेनवियोगात्कातरोभीतः अतएवतंपरिहर्तुमशक्नुवन्नातुरोविह्वलःसन्कृच्छ्रंकष्टंययौप्राप॥ ततश्चभर्तृपादु
केतेनैवदत्तेमूर्ध्निबिभ्रत्॥ अतिनिर्बंधरूपयातदाज्ञयापुनःपुनर्नमस्कृत्यययौ॥ अत्रचपृष्ठतोन्वगमंभर्तुःपादविश्ले
षणाक्षमइत्यादितृतीयस्कंधोपक्रमोक्तानुसारेणबदरिकाश्रमंगच्छन्भगवतःप्रभासयात्रामुपश्रुत्यस्नानैःपृष्ठतोगतःस
न्॥ उपसंहृतनिजकुलंभगवंतमेकांतेदृष्ट्वातत्कालप्राप्तेनमैत्रेयेणसहपुनःकृपयाभगवतोपदिष्टंतत्त्वमाकलय्यततः

अतिव्रज्यगतीस्तिस्रोमामेष्यसिततःपरं॥ श्रीशुकउवाच॥ सएवमुक्तोहरिमेधसोद्धवःप्रदक्षिणंतंपरिसृत्यपा
दयोः॥ शिरोनिधायाश्रुकलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोप्यपक्रमे॥४५॥ सुदुस्त्यजस्नेहवियोगकातरोनशक्नु
वंस्तंपरिहातुमातुरः॥ कृच्छ्रंययौमूर्ध्निभर्तृपादुकेबिभ्रन्नमस्कृत्यययौपुनःपुनः॥४६॥ ततस्तमंतर्हृदिस
न्निवेश्यगतोमहाभागवतोविशालां॥ यथोपदिष्टांजगदेकबंधुनातपःसमास्थायहरेरगाद्गतिं॥४७॥ यएतदानं
दसमुद्रसंभृतंज्ञानामृतंभागवतायभाषितं॥ कृष्णेनयोगेश्वरसेविताङ्घ्रिणासच्छ्रद्धयासेव्यजगद्विमुच्यते॥४८॥

ज्ञातोययावितिहृव्यं॥४६॥ विशालांबदरिकाश्रमंगतःसन्हरेर्गतिमगात्॥ कथंभूतां॥ तेनैवजगदेकबंधुनायथोपदिष्टां॥
तदामत्तत्त्वंप्रतिपद्यमानोमयात्मभूयायचकल्पतेवै॥ अतिव्रज्यगतीस्तिस्रोमामेष्यसिततःपरमित्येवमुक्तप्रकारां॥
४७॥ आनंदसमुद्रोभगवद्भक्तिमार्गस्तस्मिन्संभृतमेकीकृतं॥ एतद्यःसच्छ्रद्धयाआसेव्यईषदपिसेवितावर्त्ततेसवि
मुच्यतइतिकिंवक्तव्यं॥ तत्संगेनजगदपिविमुच्यतइत्यर्थः॥४८॥ श्रीदत्तात्रेयायनमः॥ श्रीरामचंद्रायनमः॥ ७

एवंकृतोपदेशंजगद्गुरुंप्रणमितिः॥भवभयमिति॥भवःसंसारःभयंचजरारोगादिनिमित्तंतदुभयंनिवर्त्तानांचभक्तस्ववर्गाणांय
पायोग्यमपहंतुंयोमत्तद्रूपंउपजह्रेउद्धृतवान्॥तदेवाह॥वेदसारमेकं॥किंतत्ज्ञानविज्ञानरूपंचतत्त्व॥सारंश्रेष्ठंच॥भृंग
वत्॥भृंगोयथापुष्पमकोपयन्नेवामृतमपहरति॥तथास्वयंस्वकृतवेदानुसारेणैवउद्धृतमेकंतज्ञोभयंयथायथंभ
क्तवर्गानपाययत्॥तंनतोस्मीति॥४९॥येनानुकंपितविश्वमुद्भवप्रश्ननिर्णयैः॥तंवंदेपरमानंदनंदनंदनरूपिणं॥१॥इ
त्येकादशेएकोनत्रिंशोध्यायः२९ ७ त्रिंशेतुप्राग्उपक्षिप्तमौशलच्छलतोहरिः॥स्वधामगंतुमन्विच्छन्संजहारनिजंकुलं॥१॥

भवभयमपहंतुंज्ञानविज्ञानसारंनिगमकृदुपजह्रेभृंगवद्वेदसारं॥अमृतमुदधितश्चापाययद्भृत्यवर्गान्पुरुषमृषभमा
द्यंकृष्णसंज्ञंनतोस्मि॥४९॥इतिश्रीभाग॰एकाद॰भगवउ॰एकोनत्रिंशोध्यायः॥२९॥७॥राजोवाच॥ततोमहाभागवतेउद्ध
वेनिर्गतेवनं॥द्वारवत्यांकिमकरोद्भगवान्भूतभावनः॥१॥ब्रह्मशापोपसंसृष्टेस्वकुलेयादवर्षभः॥प्रेयसींसर्वनेत्राणां
तनुंसकथमत्यजत्॥२॥प्रत्याक्रष्टुंनयनमबलायत्रलग्नंनशेकुःकर्णाविष्टंनसरतिततोयत्सतामात्मलग्नं॥यच्छ्रीर्वा॰
चांजनयतिरतिंकीर्त्यमानाकवीनांदृष्ट्वाजिष्णोर्युधिरथगतंयच्चतत्साम्यमीयुः॥३॥७

विरामायपुरापोरमुपक्षिप्तंहिमौशलं॥कथावसानेतत्रैवविशेषंपरिपृच्छति॥१॥तत इतित्रिभिः॥२॥ब्रह्मशापोपसंसृ
ष्टेस्वकुलेसतिं॥अयंभावः॥भगवतिनहिशापःप्रभवति॥यादववत्ानुकरणाच्चसोपिकथंचिन्मन्यमानः॥अतःकिमकरो
दितितदेतदुक्तं॥कथमत्यजदिति॥सर्वनेत्राणामितिसर्वेंद्रियाणामुपलक्षणं॥२॥तत्प्रपंचयति॥प्रत्याक्रष्टुमितियस्मि
न्रूपेलग्नंनयनंपरावर्त्तयितुंअबलाःनशेकुः॥यच्चकर्णरंध्रेणप्रविष्टंसत्सतामात्मनिलग्नंलिखितमिवतिष्ठति॥ततो
नसरतिननिर्गच्छति॥तस्यश्रीःशोभासंकीर्त्यमानाकवीनांवाचांरतिमुल्लासविशेषंजनयति॥तेषामानंजगत्स्रज्यतांजन
यतीतिकिंनुवक्तव्यं॥यच्चविष्णोरूपंजिष्णोरर्जुनस्यरथेस्थितंदृष्ट्वायुधिमत्तास्तत्साम्यंसारूप्यंईयुः॥प्रापुः॥तत्केनरू

दिवि सूर्यपरिवेषादीन् भुवि भूकंपादीन्॥ अंतरिक्षे दिग्दाहादीन् महोत्पातान्॥ स्वयमेवोत्पादितला स्वैः ऊ प्रतीकारान्॥४॥ यमस्य केतवो ध्वजा इव मृत्युसूचका इत्यर्थः॥ नः अस्माभिः॥५॥ प्रत्यक् पश्चिमवाहिनी॥६॥ अभिषिच्य स्नात्वा॥७॥ ब्राह्मणान् वयं कृतस्वस्त्ययनाः संतो गवादिभिः पूजयिष्यामः॥८॥ विधिः प्रकारः मंगलायनं च किंच देवद्विजगवां पूजा भवः उद्भवहेतुः देवलोके

॥ ऋषिरुवाच ॥ दिवि भुव्यंतरिक्षे च महोत्पातान्समुत्थितान्॥ दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदूनिदं॥४ श्रीभगवानुवाच॥ एते घोरा महोत्पाता द्वार्वत्यां यमकेतवः॥ मुहूर्तमपि न स्थेयमत्र नो यदुपुंगवाः॥५ स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः॥ वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती॥६ तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः॥ देवताः पूजयिष्यामः स्नपनालेपनार्हणैः॥७ ब्राह्मणांस्तु महाभागान्कृतस्वस्त्ययना वयं॥ गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः॥८ विधिरेष ह्यरिष्टघ्नो मंगलायनमुत्तमं॥ देवद्विजगवां पूजा भूतेषु परमो भवः॥९ श्रीशुक उवाच॥ इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः॥ तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः॥१० तस्मिन्भगवतादिष्टं यदुदेवेन यादवाः॥ चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितं॥११ ततस्तस्मिन्महापानं पपुर्मैरेयकं मधु॥ दिष्टविभ्रंशिता धियो यद्द्रवैर्भ्रश्यते मतिः॥१२॥छ

परम उद्भवो भविष्यतीति भावः॥९॥ मधुद्विषः वाक्यमाकर्ण्य तथेत्यभिनंद्य उत्तीर्य समुद्रं॥१०॥ सर्वश्रेयोपबृंहितं मिसत्र संधिरार्षः॥ भगवतानुक्तैरपि सर्वैः श्रेयोभिः सहितं चक्रुः॥११॥ पीयत इति पानं॥ मैरेयकं मदिराविशेषं मधुरसं दिष्टेन दैवेन विभ्रंशिता धियः॥ न ह्यन्यथा तस्मिन्स्थाने तदुचितमिति भावः॥ यस्य द्रवैः रसैः॥१२॥ श्रीरामचंद्राय॥छ॥

कृष्णमायाविमूढानामिति मुख्यो हेतुः॥संघर्षः कलहः॥१३॥१

ततोयुयुधुश्च॥१४॥पतंत्यःपतंत्यस्तत्रस्थाःपताकाःयेषुतैरथादिभिर्मिथःसमेत्यन्यहनन्नस्यमन्निसर्गः॥दद्भिर्दंतैरिव॥१५॥मिथःस
मेत्येतस्यप्रपंचः॥प्रद्युम्नसांबादिभिश्चतुर्भिः॥गदौश्रीकृष्णस्यभ्रातेकःपुत्रश्चापरःतौ॥सुमित्रासुरथावितिदैर्घ्यमार्षं॥सुर
२

महापानाभिमत्तानांवीराणांदृप्तचेतसां॥कृष्णमायाविमूढानांसंघर्षःसुमहानभूत्॥१३॥युयुधुःक्रोधसंरब्धावेलायामा
ततायिनः॥धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः॥१४॥पतत्पताकैरथकुंजरादिभिःखरोष्ट्रगोभिर्महिषैर्नरैरपि॥
मिथःसमेत्याश्वतरैःसुदुर्मदान्यहन्छरैर्दद्भिरिवद्विपावने॥१५॥प्रद्युम्नसांबौयुधिरूढमत्सरावक्रूरभोजावनिरुद्ध
सात्यकी॥सुभद्रसंग्रामजितौसुदारुणौगदौसुमित्रासुरथौसमीयतुः॥१६॥अन्येचयेवैनिशठोल्मुकादयःसहस्र
जिच्छतजिद्भानुमुख्याः॥अन्योन्यमासाद्यमदांधकारिताःजघ्नुर्मुकुंदेनविमोहिताभृशं॥१७॥दाशार्हवृष्ण्यंधकभो
जसात्वतामध्वर्बुदामाथुरशूरसेनाः॥विसर्जनाःकुकुराःकुंतयश्चजघ्नुर्मिथस्तेऽथविसृज्यसौहृदं॥१८॥पुत्रास्त्व
युध्यन्पितृभिर्भ्रातृभिश्चस्वस्रीयदौहित्रपितृव्यमातुलैः॥मित्राणिमित्रैःसुहृदःसुहृद्भिर्ज्ञातींस्त्वहन्ज्ञातयएवमू
ढाः॥१९॥शरेषुहीयमानेषुभज्यमानेषुधन्वसु॥शस्त्रेषुक्षीयमाणेषुमुष्टिभिर्जह्रुरेरकाः॥२०॥तावज्रकल्पाह्यभवन्परिघा
मुष्टिभिर्भृताः॥जघ्नुर्मिथस्तैःकृष्णेनवार्यमाणास्तुतंचते॥२१॥७

धनामावाकश्चित्॥१६॥मदांधेनमदतमसाबलात्कारिता॥१७॥दाशार्हादयोनवतत्तद्वंश्याः॥अर्बुदाःमाथुराःशूरसेनाश्चतत्तद्दे
शीयाः॥१८॥भ्रातृभिश्चेतिभ्रात्रादिशब्दानांसप्रतियोगिवाचित्वात्॥भ्रातरोमातुलाश्चसादिज्ञेयं॥मित्रैश्चमित्राणिच॥अहनन्ह
तवंतः॥१९॥धन्वसुधनुःषुजह्रुःजगृहुः॥२०॥परिघाःलोहदंडाः॥भृताःधृताःतंचश्रीकृष्णमपि॥२१॥श्रीरामचंद्राय॰

प्रत्यनीकं प्रतिपक्षं ॥ २२ ॥ एरकामुष्टिरूपौपरिघावुद्यम्य ॥ २३ ॥ स्पर्द्धानिमित्तः क्रोधः कुलं संक्षयं निन्ये ॥ २४ ॥ २५ ॥ पौरुषं योगं परमपुरुषध्यानलक्षणं ॥ तमेवाह ॥ संयोज्येति ॥ मानुष्यं लोकं भूर्लोकं मनुष्यरूपतां वा ॥ २६ ॥ धरोपस्थे भूतले ॥ २७ ॥ भ्राजिष्णुरूपं ॥ २८ ॥ तदेवा

प्रत्यनीकं मन्यमानाः बलभद्रं च मोहिताः ॥ हंतुं कृतधियो राजन्नापन्ना आततायिनः ॥ २२ ॥ अथ तावपि संक्रुद्धावुद्यम्य कुरुनंदन ॥ एरकामुष्टिपरिघौ चरंतौ जघ्नतुर्युधि ॥ २३ ॥ ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनां ॥ स्पर्द्धा क्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा वनं ॥ २४ ॥ एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः ॥ अवतारितो भुवो भार इति मेनेऽवशेषितः ॥ २५ ॥ रामः समुद्रवेलायां योगमास्थाय पौरुषं ॥ तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि ॥ २६ ॥ रामनिर्याणमालोक्य भगवान्देवकीसुतः ॥ निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलं ॥ २७ ॥ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया ॥ दिशो वितिमिराः कुर्वन् विधूम इव पावकः ॥ २८ ॥ श्रीवत्सांकं घनश्यामं तप्तहाटकवर्चसं ॥ कौशेयांबरयुग्मेन परिवीतं सुमंगलं ॥ सुंदरस्मितवक्त्राब्जं नीलकुंतलमंडितं ॥ पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं ॥ ३० ॥ कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः ॥ हारनूपुरमुद्राभिः कौस्तुभेन विराजितं ॥ ३१ ॥ वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः ॥ कृत्वोरौ दक्षिणे पादमासीनं पंकजारुणं ॥ ३२ ॥ मुसलावशेषायःखंडकृतेषुर्लुब्धको जरा ॥ मृगस्याकारं तच्चरणं विव्याधमृगशंकया ॥ ३३ ॥ ७

नुवर्णयति ॥ श्रीवत्सांकमिति ॥ चतुर्भिः ॥ २९ ॥ सुंदरस्मितं वक्त्राब्जं यस्मिन् ॥ पुंडरीकवदभिरामे सुंदरे अक्षिणी यस्मिन् तत् ॥ ३० ॥ ३१ ॥ वनमालया परीतान्यंगानि यस्मिन् तत् ॥ निजायुधैश्च परीतांगं पंकजारुणं वामं पादं दक्षिणे उरौ कृत्वासीनं रूपं बिभ्रत् ॥ ३२
जरा नाम कश्चित् लुब्धको मृगयुः मृगस्यास्यमिवाकारो यस्य तं चरणं ॥ ३३ ॥ ७

३४॥३५॥३६॥३७॥ब्रह्मशापकृतमेवतत्तत्रतवापराधइतिचेत्तत्राह॥यस्यतवात्मयोगरचितंस्वाधीनमायारचितंविरिंच्यःअस्यतनयाः
रुद्रादयश्च॥येचान्येगिरांपतयोवेदद्रष्टारःतेपिनविदुः॥तस्यतेअचिंत्यमायस्यएतत्ब्रह्मशापादिकंअंजसाअस्मत्कृतयःपापयोनयः

चतुर्भुजंतंपुरुषंदृष्ट्वासकृतकिल्बिषः॥भीतःपपातशिरसापादयोरसुरद्विषः॥३४॥अजानताकृतमिदंपापेनमधुसूदन॥क्षंतुमर्हसिपापस्यउत्तमश्लोकमेनघ॥३५॥यस्यानुस्मरणंनृणामज्ञानध्वांतनाशनं॥वदंतितस्यतेविष्णोमयाऽसाधुकृतंप्रभो॥३६॥तन्माशुजहिवैकुंठपाप्मानंमृगलुब्धकं॥यथापुनरहंत्वेवंनकुर्यांसदतिक्रमं॥३७॥यस्यात्मयोगरचितंनविदुर्विरिंच्यरुद्रादयोऽस्यतनयाःपतयोगिरांये॥त्वन्माययापिहितदृष्टयएतदंजःकिंतस्यतेवयमसत्कृतयोगृणीमः॥३८॥श्रीभगवानुवाच॥माभैर्जरेत्वमुत्तिष्ठकामएषकृतोहिमे॥याहित्वंमदनुज्ञातःस्वर्गंसुकृतिनांपदं॥३९॥श्रीशुकउवाच॥इत्यादिष्टोभगवताकृष्णेनेच्छाशरीरिणा॥त्रिःपरिक्रम्यतंनत्वाविमानेनदिवंययौ॥४०॥दारुकःकृष्णपदवीमन्विच्छन्नधिगम्यतां॥वायुंतुलसिकामोदमाघ्रायाभिमुखंययौ॥४१॥तंतत्रतिग्मद्युभिरायुधैर्वृतंह्यश्वत्थमूलेकृतकेतनंपतिं॥स्नेहप्लुतात्मानिपपातपादयोरथादवप्लुत्यसबाष्पलोचनः॥४२॥अपश्यतस्त्वच्चरणांबुजंप्रभोदृष्टिःप्रनष्टातमसिप्रविष्टा॥दिशोनजानेनलभेचशांतिंयथानिशायामुडुपेप्रनष्टे॥
॥४३॥

वयंकिंगृणीमःकथंवर्णयामःअतस्तदात्वमाशुमांजहीतिभावः॥३८॥३९॥इच्छाशरीरेणेत्यस्यायंभावः॥मुकुंदस्तत्वमयींनिजांमूर्तिमंतर्धायतत्रकृत्यैवविडंबनमात्रमितिएतत्स्वयंस्फुटीकरिष्यति॥देवादयोब्रह्ममुख्याःइत्यादिना॥४०॥४१॥तंपतितंतत्रदृष्ट्वातस्यपादयोर्निपपात॥४२॥४३॥

उदीक्षमाणस्य सूत स्यंदनः ॥४४॥४५॥ निर्वाणं योगमार्गेण ॥ मह्यामिती शरीराभिप्रायेण ॥४६॥४७॥ अविताः रक्ष्यमाणाः इंद्रप्रस्थं गमिष्यथ एतत्तत्र हेतिपूर्वेणान्वयः ॥४८॥ मन्मायारचनामेतां विज्ञायेति निजश्रीमूर्तेरंतर्हितत्वात्तद्वयाजेनाकं माकुर्वित्यर्थः ॥४९॥ कु

कुं इति ब्रुवति वैसूते रथो गरुडलांछनः ॥ खमुत्पपात राजेंद्र साश्वध्वज उदीक्षतः ॥४४॥ तमन्वगच्छन् दिव्यानि विष्णुप्रहरणानि च ॥ तेनातिविस्मितात्मानं सूतमाह जनार्दनः ॥४५॥ श्रीभगवानुवाच ॥ गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः ॥ संकर्षणस्य निर्याणं बंधुभ्यो ब्रूहि मद्दशां ॥४६॥ द्वारकायां च न स्थेयं भवद्भिश्च स्वबंधुभिः ॥ मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ॥४७॥ स्वं स्वं परिग्रहं सर्वमादाय पितरौ च नः ॥ अर्जुनेनाविताः सर्व इंद्रप्रस्थं गमिष्यथ ॥४८॥ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः ॥ मन्मायारचनामेतां विज्ञायोपशमं व्रज ॥४९॥ श्रीशुक उवाच ॥ इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः ॥ तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ॥५०॥ इति श्रीभागवते महापुराणे एकादशस्कंधे मौशले न यदुकुलक्षयो नाम त्रिंशोध्यायः ॥३०॥ श्रीकृष्णार्पणमस्तु ॥ ७ ॥ श्रीशुक उवाच ॥ अथ तत्रागमत् ब्रह्मा भवान्या च समं भवः ॥ महेंद्रप्रमुखा देवा मुनयः सप्रजेश्वराः ॥१॥ ७ ॥ ७

त्यस्य विनष्टत्वात् दुर्मनाः ॥५०॥ इत्येकादशे त्रिंशः ॥३०॥ एकत्रिंशे स्वकं धाम जगाम भगवानितः ॥ तमेवानुययुः स्त्रीसा वसुदेवादयस्ततः ॥१॥ देवान्यरूपान्विधायादौ भूयो देवान्विधायच ॥ श्रीकृष्णः स्वेच्छया धाम स्वतन्वैव समाविशत् ॥२॥ मुनयः सनकादयः प्रजेश्वराः मरीच्यादयः ॥१॥ ७॥

छिजागर॒ऽलोकवासिनः पक्षिणः मैत्रेयार्येयोवा॥ भगवतोनिर्याणं द्रष्टुकामाः संतः परमोत्सुकास्तत्रागमन्॥२॥ तेषामौत्सुक्यस्य कृ
तं महोत्सवमाह सार्द्धेन॥ गायंतश्चेति॥३॥ विभूतीः सिद्ध्यादींश्च॥ प्रमनेत्रे न्यमीलयदितित्रायं भावः एवं ब्रह्मादिभिः॥ स्वलोकाल्लोक
पालान्नः पाहि वैकुंठकिंकरान्॥ इति प्रार्थितत्वादिदानीं च स्वं स्वं लोकं प्रति नेतुमागतत्वात्तद्बहुकुत्सुचेतसु दाक्षिण्यात्तान् वंचयि
तुं समाधिमिव कुर्वन्नेत्रे न्यमीलयदिति॥४॥ योगिनामिव स्वच्छंदमरणं मंवारयति॥ लोकाभिरामामिति॥ अयमर्थः॥ योगि
नो हि स्वच्छंदमृत्यवः स्वतनुमाग्नेय्या योगधारणया दग्ध्वा लोकांतरं प्रविशंति भगवांस्तु न तथा॥ किंतु अदग्ध्वैव स्वतनुसहि

पितरः सिद्धगंधर्वाविद्याधरमहोरगाः॥ चारणायक्षरक्षांसि किन्नराप्सरसो द्विजाः॥ द्रष्टुकामा भगवतोनिर्याणं प
रमोत्सुकाः॥२॥ गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च॥ ववृषुः पुष्पवर्षाणि विमानावलिभिर्नभः॥ कुर्वंतः संकु
लं राजन्भक्त्या परमया युताः॥३॥ भगवानपि तान्वीक्ष्य विभूतीरात्मनो विभुः॥ संयोज्यात्मनि चात्मानं पद्मनेत्रे न्य
मीलयत्॥४॥ लोकाभिरामां स्वतनुं धारणाध्यानमंगलं॥ योगधारणयाग्नेय्यादग्ध्वा धामाविशत्स्वकं॥५॥ दिवि
दुंदुभयो नेदुः पेतुश्च सुमनसश्च खात्॥ सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः॥६॥ श्रीदत्तात्रयायनमः॥

त एव स्वस्कंधाम वैकुंठाख्यमविशदित्यर्थः॥ तत्र हेतुः॥ लोकानामभिरामः अभितो रमणं स्थितिर्यस्यां तां॥ तदाश्रयत्वेन जगतोपि
दाहप्रसंगादित्यर्थः॥ किंच धारणया ध्यानस्य च मंगलं शोभनं विषयं॥ इतरथा तयोर्निर्विषयत्वं स्यात्॥ तदुपासकानां तथैव तद्रूपसाक्षात्कारः फलप्राप्तिश्चेति भावः॥ इदानीं अघा शरीराभिप्रायेण वा यथा श्रुतमेवास्तु॥ तत्रापि तु लोकाभि
रामामित्यादि विशेषणानामानर्थक्यप्रसंगात्॥ तदप्यदग्ध्वा तिरोधाय निर्गत इत्येव सांप्रतं॥५॥ तदा तु स्वं स्वमेव लोकमा
गमिष्यतीति संभ्रमेण देवादिकृतः सर्वतो दुंदुभिनादपुष्पवृष्ट्यादि महोत्सवो भवदित्याह॥ दिवीति॥ भूमेः सकाशाच्छ्रीकृष्ण

तदा श्रीकृष्णेंतर्हिते सति कुतो गत इति वितर्कयंतोपि ब्रह्ममुख्या देवादयः स्वधामविशंतं श्रीकृष्णं न ददृशुः॥ तत्र हेतुः॥ अविज्ञातगति
मिति॥ कुत्रचित्कचित् ददृशुश्च॥ अतो गतिविस्मिता बभूवुरित्यर्थः॥ ८॥ अविज्ञातगतित्वं दृष्टांतेन स्पष्टयति॥ सौदामिन्या गति
र्यथा मर्त्यैर्न लक्ष्यते॥ देवैस्तु लक्ष्यते॥ तथा अभ्रमंडलं हित्वा गच्छतः श्रीकृष्णस्य देवैरपि न लक्ष्यते॥ किंतु तत्पार्षदैरेवेत्यर्थः॥ ९॥
अभिप्रायापरिज्ञानात् प्रथमं किंचिद्दृष्टांतेन स्पष्टमुक्तं तं दृष्टं पुनस्तमेवार्थं प्रपंचयति॥ राजन्निति त्रिभिः॥ परस्य सर्व
कारणतनुभृत्सु यादवादिषु जननाप्ययेहा आविर्भावतिरोभावचेष्टाः मायया अनुकरणमात्रमवेहि॥ नटो यथा अविकृत एव
नानारूपैर्जन्मादीन् विडंबयतीति तद्वत्॥ आस्तां तावद्यादवादिषु जन्मादिशंका॥ यावत् विश्वसर्गनिरोधादिष्वप्येवं विक सा

देवादयो ब्रह्ममुख्या न विशंतं स्वधामनि॥ अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः॥ ८॥ सौदामिन्या यथाकाशे यांत्या हि
त्वाभ्रमंडलं॥ गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः॥ ९॥ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः॥ विस्मितास्तां प्रशंसंतः
स्वं स्वं लोकं ययुस्तदा॥ १०॥ राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य॥ सृष्ट्वात्मनेदमनुविश्य विहृत्य
चांते संहृत्य चात्ममहिमोपरतः स आस्ते॥ ११॥ मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धं॥ जि
ग्येंतकांतकमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं सदेहं॥ १२॥ ७

तदेवास्तु इत्याह॥ सृष्ट्वेति॥ आत्मना स्वयमेवेदं जगत्सृष्ट्वा अंतर्यामित्वेनानुविश्य तत्र विहृत्य क्रीडित्वा अंते प्रलये संहृत्य चात्मा
त्ममहिना महिम्नाउपरतः सन्नास्ते॥ ११॥ न पुनरन्यथा मंतव्यं यतोऽस्मिन्नेवावतारे तत्प्रभावो निरतिशयो दृष्ट इत्याह॥ म
र्त्येनेति॥ यमेन स्वलोकं नीतं गुरुसुतं मर्त्येन तेनैव शरीरेण यः आनयत् आनीतवान्॥ शरणदः शरणागतरक्षकः॥ त्वां च ब्रह्मा
स्त्रदग्धं योरक्षितवान्॥ यश्च अंतकानामंतकमपि ईशं रुद्रं बाणसंग्रामे जितवान्॥ मृगयुं लुब्धकं सदेहं तेनैव देहेन स्वर्गं
अनयत् नित्ये॥ असौ स्वावने स्वरक्षणे अनीशः असमर्थः किं॥ १२॥ ७

ननुसमर्थश्चेत्तर्हिकिंचित्कालमत्रैवतेनवपुषाकिंनातिष्ठत्तत्राह॥तथापीति।यद्यपिउक्तप्रकारेणाशेषस्यजगतःस्थित्यादिषुअनन्य
हेतुःतिरस्कृतस्यएवकारणंस्वयं।यद्यस्मात्अशेषशक्तिधृक्तथापियादवान्संहृत्यनिजंवपुःअत्रावशेषितंप्रणेतुंकर्त्तुंनैच्छत्।
किंतुस्वमेवलोकमनयत्।अत्रहेतुः॥मर्त्त्येनदेहेनकिंनकिंचित्कार्यमितिस्वस्थानामात्मनिष्ठानांदिव्यांगतिमेवप्रकृष्टां

तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक्॥नैच्छत्प्रणेतुंवपुरत्रशेषितंमर्त्त्येनकिंस्वस्थगतिं
प्रदर्शयन्॥२२॥यएतांप्रातरुत्थायश्रीकृष्णपदवींपरां॥प्रयतःकीर्तयेद्भक्त्यातामेवाप्नोत्यनुत्तमां॥२३॥दारु
कोद्वारकामेत्यवसुदेवोग्रसेनयोः॥पतित्वाचरणावस्रैर्न्यषिंचत्कृष्णविच्युतः॥२४॥कथयामासनिधनंवृ
ष्णीनांकृत्स्नशोनृप॥तच्छ्रुत्वोद्विग्नहृदयाजनाःशोकविमूर्छिताः॥२५॥तत्रस्मत्वरिताजग्मुःकृष्णविश्लेषवि
ह्वलाः॥व्यसवःशेरतेयत्रज्ञातयोघ्नंतआत्मनं॥२६॥देवकीरोहिणीचैववसुदेवस्तथासुतौ॥कृष्णरामावपश्यं
तःशोकार्त्ताविजहुःस्मृतिं॥२७॥प्राणांश्चविजहुस्तत्रभगवद्विरहातुराः॥उपगुह्यपतींस्तातचितामारुरु
हुःस्त्रियः॥२८॥रामपत्न्यश्चतद्देहमुपगुह्याग्निमाविशन्॥वसुदेवपत्न्यस्तद्गात्रंप्रद्युम्नादीन्हरेःस्नुषाः॥२९॥

दर्शयन्॥अन्यथातेपिदिव्यांगतिमनादृत्ययोगबलेनदेहसिद्धिंविधायात्रैवस्थातुंयतेरन्॥तन्माभूदितिएतदर्थमिति
भावः॥२२॥एतामुक्तप्रकारांपदवींगतिं॥२३॥तदेवंभगवतास्वलोकंगच्छतावसुदेवादीनामपितत्प्राप्त्युपा
यश्चिंतितआसीत्तमाह॥दारुकइत्यादिना॥२४॥२५॥तत्रेति॥२६॥कृष्णरामौसुतावपश्यंतः॥२७॥२८॥२९॥श्री

सदुक्तिभिः सखाः अवितथाउक्तयो ये पुत्रैः॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः॥ मूढोयं नाभिजानाति लोको मामजमव्य यमित्यादिभिः॥२०॥ नष्टगोत्राणां नष्टसंततीनां॥ सांपरायिकं पिंडोदकादि॥२१॥२२॥२३॥२४॥ अलेति॥२५॥ आदितः आरभ्य श्रीकृष्णचरितकीर्तनस्य फलमाह॥ यएतदिति द्वाभ्यां॥२६॥ शांतमानि परममंगलानि॥ परमहंसगतौ॥२७॥

कृष्णपत्न्यो विविशुरग्निं रुक्मिण्याद्यास्तदात्मिकाः॥ अर्जुनः प्रेयसः सख्युः कृष्णस्य विरहातुरः॥ आत्मानं सांत्वयामास कृष्णगीतैः सदुक्तिभिः॥२०॥ बंधूनां नष्टगोत्राणामर्जुनः सांपरायिकं॥ हतानां कारयामास यथावदनुपूर्वशः॥२१॥ द्वा रकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात्॥ वर्जयित्वा महाराज श्रीमद्भगवदालयं॥२२॥ नित्यं सन्निहितस्तत्र भगवा न्मधुसूदनः॥ स्मृत्याऽशेषाऽशुभहरं सर्वमंगलमंगलं॥२३॥ स्त्रीबालवृद्धानादाय हतशेषान्धनंजयः॥ इंद्रप्रस्थं समा वेश्य वज्रं तत्राऽभ्यषेचयत्॥२४॥ श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः॥ त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथं॥२५॥ य एतद्देवदेवस्य विष्णोः कर्माणि जन्म च॥ कीर्तयेत् श्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते॥२६॥ इत्थं हरेर्भगवतो रुचिरावतार वीर्याणि बालचरितानि च शंतमानि॥ अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत॥२७॥ ६॥ इति श्रीभागवते महापुराणे एकादशस्कंधे अष्टादशसाहस्र्यां संहितायां एकत्रिंशोध्यायः॥३१॥ श्रीदत्तात्रयार्पणं॥

एवमेकादशस्कंधभावार्थस्य प्रदीपिका॥ स्वाज्ञानध्वांतभीतेन श्रीधरेण प्रकाशिता॥२७॥ ६॥ इति श्रीभागवते एकादशस्कंधे श्रीधरस्वामिकृतायां श्रीमद्भागवतभावार्थदीपिकायां एकत्रिंशोध्यायः॥३१॥ श्रीदत्तात्रयरूपगुरुचरणारविंदार्पणमस्तु॥

[OrderDescription]
,CREATED=17.10.19 13:53
,TRANSFERRED=2019/10/17 at 14:27:00
,PAGES=246
,TYPE=STD
,NAME=S0002060
,Book Name=M-672-SHRIMADBHAGWAT BHAVARTH DIPIKA TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF

FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF

FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF

FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF

FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF

FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF

FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF

FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF

FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF

FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF

FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF

FILE245=00000245.TIF
,FILE246=00000246.TIF
,